श्रीरामानुजायनमः श्री
सप्तमस्कंधे श्रीरामः ७

स. टी. भा. वी. १

श्रीमते रामानुजाय नमः । पूर्वस्मिन्स्कंधे षष्ठाध्याये हतवृत्रारितेति शक्रपार्ष्णिग्राहेण विष्णुनेति विष्णोरिंद्रस्य पक्षपाति
त्वमुक्तं तत्र सर्वांतरात्मनः सर्वभूतसुहृदो निरतिशयप्रियरूपस्यावाप्तकामस्य निरस्तनिखिलदोषस्य परमकारुणिकस्य भग
वतः कथं प्राकृतवद्वैषम्यनैर्घृण्यादिकमिति पृच्छति राजा समः प्रियः सुहृदित्यादिना त्रिभिः यद्यपि तत्तज्जीवकर्मगुणानुरूपेण तत्र फल
तया नियंतुर्न वैषम्यादिदोषप्रसक्तिरिति तत्र तत्र बहुवारमुक्तमिति न शंकावकाशस्तथापि तत्र तत्र प्रसंगादुक्तमेव तत् कथं पु
नः किं गुणानां कर्मणां च प्रत्येकं सुखदुःखादिनिमित्तत्वमुत समष्टि नाम यद्वा कर्मणामेव निमित्तत्वं गुणानां तु तद्धेतुत्वमुत गुणा
नामेव निमि... तत्त्वं कर्मणां तु गुणाय च यादि निमित्तत्वमित्याशंकापरिहारार्थं श्रोतुं च प्रश्नः समः इति हे ब्रह्मन् भगवान् पूर्णषाड्गुण्यः
निरस्तनिखिलदोषश्चानेनावाप्तकामत्वं सूचितं ततश्च स्वप्रयोजनविरोधित्वं च समः निरस्तनिखिलदोषत्वाद्वैषम्यविभाग
रहितः सुहृदाय देवादिष्वलकः तस्मा

श्रीगणेशाय नमः । प लि उ च । समः प्रियः सुहृद्ब्रह्मन् भूतानां भगवान्स्वयं इंद्रस्यार्थे क
थं दैत्यानवधीद्विषमो यथा १ न ह्यस्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः नैवासुरेभ्यो विद्वे
षो नोद्वेगश्चागुणस्य हि २ इति नः सुमहाभाग नारायणगुणान्प्रति संशयः सुमहाञ्जातस्तद्भवा
च्छेत्तुमर्हसि ३

तस्य सर्वभूतानां देवादी
नां स्वसुहृत्त्वेषोऽग्रात्मत्वादिति भावः न ह्यात्मनः किं चिद्धेतुरहितमप्यहितमात्मत्वादेव च निरतिशयप्रियः स एवंभूतः स्वयं साक्षाद्देवेंद्र
स्यार्थे प्रयोजनाय कथं दैत्यानवधीत् हतवान् यथा विषमः रागद्वेषादियुक्तः तद्वत् १ साक्षान्निःश्रेयसात्मनः पुरुषार्थस्वरूपस्य निर
तिशयानंदरूपस्येत्यर्थः अस्य भगवतः सुरगणैरिंद्रादिभिर्नह्यर्थः तदनुग्रहेणेंद्रादिभिः साध्यः कश्चित्पुरुषार्थो नास्तीति स्वयमेव साक्षान्निः
श्रेयसात्मत्वादिति भावः तथा असुरेभ्यः उद्वेगोऽभयं तेषु विद्वेषश्च नास्त्येव तन्निहंतुं वस्तुतः विशिनष्टि अगुणस्येति हि यस्मादगुणस्य
सत्त्वादिगुणानन्वलकरागद्वेषभयरहितस्य २ इतीत्थं हे महाभाग निर्गुणस्य श्रीनारायणस्य गुणान् प्रति गुणविषयको महा
न्संशयो जातः वर्तते तद्गुणास्तु समत्वादयः श्वेषामनुगुणानगुणैर्यत संशयात्मकं मम नं छेत्तुमर्होहि तुं भवान्
अर्हतिनान्यद्भवस्यर्थः ३ श्रीगुरुचरणकमलेभ्यो नमः । श्रीचक्रतुरंगाविजयतेतराम् । श्रीहनुमते नमः । श्री

ना४ · त्रिपादि · राम १

स. भा. टि. वि. २

सत्त्वमिति सत्त्वादयः प्रकृतेरंशगुणाः न त्वात्मनः परमात्मनः परमात्मशरीरभूतप्रकृतिस्वरूपगता न तु परमात्मस्वरूपगता इत्यर्थः तेषां सत्त्वादीनां सर्वेषां ह्रासविभवः उल्लासः उद्भवश्च युगपन्न भवति किं तु तत्तत्कर्मपरिपाककालानुगुणं कदाचित्कस्यचिद्ध्रासः कदाचित्कस्यचिदुल्लासश्च भवतीत्यर्थः जयकालेति सत्त्वस्य जयकाले उत्कर्षकाले कर्माधीनसत्त्वगुणोपचयकाले इत्यर्थः देवान्पोषयन्भजते अनुग्राहको भवति रजसः जयकालेऽस्यनुगुणः असुरान्भजते तमसो जयकाले तु यक्षरक्षांसि च तत्कालानुगुणः तत्कर्मविपाककालानुगुणो भजते अयं भावः गुणप्रवाहपतितानामन्तर्वर्गोपि यथासमयं कर्मवश्या गुणा इति तत्र सत्त्वाद्याः पृथिवीपते इति भगवत्पराशरवचनात् सत्त्वादिगुणानां तत्तज्जीवकर्मविपाककालानुगुणह्रासोल्लासरूपपरिणामप्रादुर्भावप्रसिद्धेः सत्त्वादिगुणानामुल्लासः सुखदुःखमोहाद्यापादक इति भगवतापीतं ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा रजस्येतानि जायन्ते विवृद्धे कुरुनन्दन अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च तमस्येतानि जायन्ते विवृद्धे कुरुनन्दनेति ईश्वरस्य तु सत्त्वादिगुणसम्बन्धः प्रमाणप्रतिपन्नं स्वेच्छया तदनुकूलं भवति सर्वनियन्तृतयावस्थितः ईश्वरः सत्त्व

सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः । न तेषां युगपद्राजन् ह्रास उल्लास एव च ॥ ७ ॥ जयकाले तु सत्त्वस्य देवर्षीन्
रजसोऽसुरान् । तमसो यक्षरक्षांसि तत्कालानुगुणोऽभजत् ॥ ८ ॥

कस्यचित्कस्यचिद्विजयं कस्यचित्पराजयं च न प्रतिदिशन्नपि तदुत्तरत्वात्कि।

सः २

५१ विपाककालानुगुणसत्त्वादिगुणोद्भवकाले तु देवादीनां विजयं प्रदिशन्नन्येषां तु पराजयं स तानुद्भवाभिभवयोश्च कर्माधीनत्वात्तदनुरूपप्रवर्तित्वा
३४ स्वस्यापि न वैषम्यमिति ननु कर्मपरिपाककालानुगुणोल्लाससुखकरीं अपि वैषम्यं तद्गुणप्रचुराणां देवादीनां जयसाहित्यमिति युक्तं इदं तु युक्तं र
जस्तमसोरुपचयदशायामसुरपक्षादीन्भजत इति तदुपचयस्य दुःखमोहादिफलकत्वेन पराजयाद्यावहत्वात् उच्यते रजस्तमसोरुल्लासकाले
२४ सुरादीन्भजतीत्यस्य तेषां जयमावहतीत्यर्थः अपि तु रजस्तमसोरुल्लासफलभूतदुःखमोहादिनिमित्तपराजयादिकमेव वहतीति चेन्नैवं देवासु ३४
रादीनामपि स्वकर्मविशेषपरिपाकानुगुणं सत्त्वोल्लासस्य तदा जयं प्रदिशतस्तेषां तु पराजयं प्रदेवादीनामपि कर्मविशेषपरिपाका राम २
२।२ नुगुणं सत्त्वोद्रेकदशायां जयं तेषामिति पुनः कर्मविशेषपरिपाकानुगुणरजस्तमसोर्जयः कदाचित्कः पराजयः असुरादीनां त्वपरोपनरजस्तमः
प्रचुरत्वात्तस्मिन्नेव प्रायेण जयसाम्यायशः पराजयः कदाचित्को [illegible] राजय इति ८ श्रीहनुमतो विजयते तत्राम् श्रीरस्तुः श्रीः ॥

पं. २ [illegible] रुद्रेकदशायां पराजयः एव च देवानामधिकं तमगुणोपचयदशायां च त्वप्राप्तानां सत्त्वप्रचुरत्वात्तस्यैव प्रायश

एवमादरेणोमुनिस्सावज्ञः प्रश्नमभिनंदति साध्विति हेमहाराजाद्भुतं प्राकृतत्वेनास्मज्जातीयत्वेनाचिंतयितुमशक्यं हरेश्चरितं प्रतिसाधु पृष्टं हरिचरित्रविषयकसंशयोद्धारणरूपत्वात् प्रश्नः साधीयानित्यर्थः साधुत्वमेव प्रश्नस्य स्पष्टयितुं चरित्रं विशिनष्टि यद्धरेश्चरितं भागवतानां महात्म्यं यस्मिंस्तादृशं अस्त्वेवं ततः किं तत्राह भगवद्भक्तिं वर्द्धयतीति भगवद्भक्तिवर्द्धनं भागवद्भक्तेर्वर्द्धनं वृद्धिर्यस्मादिति वा भागवतमहात्म्येन भगवद्भक्तिवर्द्धकेन युक्तत्वाद्भगवच्चरित्रस्य तद्विषयकः प्रश्नः साधुरिति भावः ४ अतएव तत्परमं पुण्यमतीव पुण्यं चरित्रं नारदादिभिर्ऋषिभिर्गीयते पतस्तत्प्रश्नः साधुस्ततो ऽहं कृष्णाय व्यासाय मुनये नत्वा हरेः कथां कथयिष्ये हरिगुणविषयकसंशयनरूपत्वात्प्रश्नस्य तद्गुणवर्णनरूपकथाकथनेनैवोत्तरयिष्यामीत्यभिप्रायेण कथां कथयिष्य इत्युक्तं ५ एवं कथाकथनं प्रतिज्ञाया पक्षत्वाद्विगुणाद्भवाभिभवादिलोकाहीनं जयपराजयौ सत्त्वादिगुणाश्रितत्वजीवकर्मायत्तौ द्भवाभिभवौ ततः प्रसिद्धाः कर्मवश्यागुणास्तेन सत्त्वाद्याः पृथिवीयत इत्यादिभिरतः सर्वोत्तरा लतया वस्थायत्तत्त्वज्ञोत्तमकर्मा   पं १

श्रीशुक उवाच साधु पृष्टं महाराज हरेश्चरितमद्भुतं यद्भागवतमाहात्म्यं भगवद्भक्तिवर्द्धनं ४ गीयते
परमं पुण्यमृषिभिर्नारदादिभिः नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथां ५ निर्गुणोपि ह्यजो ऽव्यक्तो भगवान्प्र
कृतेः परः स्वमायागुणमाविश्य बाध्यबाधकतां गतः ६ श्रीहनुमते नमः श्रीगुरवे नमः श्री॥

टी १   नगुणं गुणान्त्ररयं [illegible] श्वस्य पनवैषम्यादिकमिति यदि न स्यात् निर्गुण इति निर्गुणः हेयगुणरहितः रागद्वेषादिरहित इत्यर्थः अव्यक्तः प्रमाणान्तराणामगोचरः अनेन प्रत्यक्षादिप्रमाणगोचररागद्वेषादिदिव्यगुणयुक्तत्वाकृतत्वेन लक्षणमुक्तं अत एव घजः कर्माधीनत्वजन्मादिरहितः भगवान्षड्भागुणः प्रकृतेः परः भूमिरापोनलो वायुरपरेमितस्वत्वाद्वा मित्युक्ताविद विद्यात्मकप्रकृतिद्वयाद्विलक्षणः अपिशब्देनैवं विधस्यैव वैषम्यापन्नत्वासूच्यते यद्येवं विधः तथापि स्वमायागुणमाविश्य स्वांशभूतांगुणविशिष्टां प्रकृतिं समाविश्येत्यर्थः आविश्यान्प्रेरयन्परितः अतः अदितेः दितेः जाताजनानामितिशुतेः हरिर्यत्रं तिवक्ष्यमाणत्वाच्च बाध्यबाधकतां गतः बाध्यबाधके देवासुरवर्गयोः तत्राल तत्रान्तस्तरीरत्वेना वस्थितत्व इत्यर्थः गुणकर्मानुगुणप्रियमाणशरीरभूतदेवासुरवर्गगताबाध्यबाधकभावः न स्वरूपतस्तद्विलक्षणत्वात् परमात्मनः यथोदेहगतावस्था नात्मगता इति भावः ६ एतदेव प्रपंचयितुं तावद्गुणानां प्रकृतेरेव संबंधित्वं तेषां तत्तज्जीवकर्मानुसारेण परिणामस्वभावत्वं चाह श्रीरस्तुः।

स· भा· टी· वी· २

वृद्धिहेतुरितिवत्सर्वोतिरात्मतएवदेवादिकर्मानुगुणगुणान्प्रेरयतीतिनेश्वरस्यवैषम्यमित्युक्तमुपसंहरति यदेति हे राजन्नदः कर्मानुगुण्येनप्र।
रस्यगुणकालप्रेरकत्वात्यस्य गुणप्रेरकः कालः कालस्य प्रेरकः तत्प्रेरकश्चेशितेश्वरः सत्त्वकर्मपरिपाकायत्तकालकृतगुणोन्मे।
षसत्त्वगुणप्रचुरंसुरानीकमेववर्द्धयतितत्सेवनपरावर्द्धयतीत्यर्थः वहत्सप्रीतिपक्षपातपूर्वकत्वात्सुराणांप्रियः सन्तत्प्रत्यनीकान्सु
रानीकप्रतिपक्षान्रजस्तमः प्रचुरान्प्रमिणोतिविनाशयतितउरुश्रवाः विपुलकीर्तिस्सुरानीकविनाशनेनैवमस्याविशंसाभावनयान्य
पकीर्तिमानीश्वरः किं तु विपुलतमकीर्तिमानित्यर्थः ११ एवं सर्वभूतसुहृदः समस्येश्वरस्यचैद्यासुरादिजयायजयपदेत्वपि कर्मा।
नुगुण्यादिवैषम्याभावउक्तः इदानीं तस्यसर्वभूतसुहृत्त्वे इतिहासंदर्शयति अत्रैवेति अत्रैवतस्यसर्वभूतसुहृत्त्वे हेराजन्महाक्र
तौराजसूयेप्रीत्याआदरेणपृच्छते अजातशत्रवेयुधिष्ठिरायसुरर्षिणानारदेनेतिहासउदाहृतः १२ प्रसंगवन्निमित्तंचविवेनातिदिष्टेति

3

यस्मराजन्नपिकालंईशितासत्वेसुरानीकमिवैधयत्यतः तत्प्रत्यनीकानसुरान्सुरप्रियोरजस्तमस्कान्प्रमिणोत्युरुश्रवाः ११
अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा। प्रीत्यामहाक्रतौराजन्पृच्छतेजातशत्रवे १२ दृष्ट्वामहाद्भुतंराजाराजसूयेमहा
क्रतौ। वासुदेवेभगवतिसायुज्यंचेदिभूभुजः १३ तत्रासीनंसुरऋषिंराजापाण्डुसुतःक्रतौ। पप्रच्छविस्मितमनामुनीनांशृ।
ण्वतामिदं १४ युधिष्ठिरउवाच अहोअत्यद्भुतंह्येतद्दुर्लभैकान्तिनामपि वासुदेवेभगवतिप्राप्तिश्चैद्यस्यविद्विषः १५ एत
द्वेदितुमिच्छामःसर्वेएववयंमुने भगवन्निन्दयावेनोद्विजैस्तमसिपातितः १६ दमघोषसुतःपापआरभ्यकलभाषणात् राजसूयाख्येम

हाक्रतौचेदिभुजः शिशुपालस्यभगवतछिन्नशिरसः वासुदेवेभगवतिश्रीकृष्णेसायुज्यंसंश्लेषमहाद्भुतंदृष्ट्वाविस्मितचित्तः पाण्डुसुतोराजायु
धिष्ठिरः सत्क्रतौयज्ञसभायामासीनंउपविष्टंसुरर्षिनारदंमुनीनांशृण्वतांसतांइदंवक्ष्यमाणंपप्रच्छएवमाह १४ तदेवाह अहोइतिवाक्येन अ
हो आत्यद्भुतं तत्रहेतुः एकान्तिनामप्यनन्यप्रयोजनेनभगवन्तंभजतामपिदुर्लभं किंतत्परेतत्त्वेपरमतत्त्वेपुरुषविलक्षणेश्वरतत्त्वेश्रीकृष्णेचैद्य
स्यविद्विषःप्राप्तिरित्येतत् १५ हेमुनेनारदेतत्सर्वेवयंवेदितुंइच्छामः केनापिभावेनभगवन्तंस्मरतोतत्प्राप्तिःसंभवेदेवकिमत्रचित्रंतत्राह वेनइत्यपेक्षयापिताभगव।
निन्दयैववेनोद्विजैःब्राह्मणैःहुंकारमात्रेणनरकेछिन्नैःपातितः १६ दमघोषसुतश्चैद्यस्तुकलभाषणाद्बालमधुरभाषणादारभ्यबाल्यादारभ्येत्यर्थः श्रीरामश्रीराम

राम २

समायागुण [illegible] मविशेषबाध्यबाधकतागतइत्यनेननतुबाध्यबाधकेगुणेश्वासुरादिकैर्गुणैश्चस्वस्यानुप्रवेशउक्तःकथमनुप्रविष्टोविज्ञायतइत्यपे।
क्षायांतत्स्वानुप्रवेशात्प्रविष्टस्यापिविभिन्नस्वरूपस्याप्यचेतनसम्पर्कात्पोपेनविवे [illegible] चनीयत्वेनदृष्टान्तमाह ज्योतिरिति काष्ठादिषूत्पातिःप्रतीत
वस्तुवदनुप्रविष्टआभातितद्वदेवात्मास्वच्छःप्रकाशते अतएवात्मानमात्मनाअभिचाकशीतिश्रुतेरितिभावः संघातात्कारादिसंघातवद्देहें
२४ द्रियभोक्तृवर्गरूपसंघातान्नविविच्यतेप्रकृतिपुरुषेश्वरैस्तथायाथात्म्यविद्भिः प्रकृतिपुरुषाभ्यांविलक्षणत्वेनज्ञापतइत्यर्थः कवयस्तत्व
स्वयाथात्म्यविदस्त्वात्मस्थंजीवात्मनिस्थितं पश्यन्तीतितिष्ठन्त्यविज्ञानेतिष्ठन्नितिश्रुतेः आत्मानंपरमात्मानंसपिसाविवेककर्तृकंतज्ज्ञानि
योगमपेक्षितमर्थः अतःततःअनेकजन्मावसानेविवेकेसाक्षात्कुर्वंति २ स्वमायागुणाभ्यामविशेषत्वेनेनप्रेरणापर्यंतानुप्रवेशोऽभिसंहितःतेष्वगुण
प्रेरकत्वंविवृणोति यदेति एषःपरःपुरुषोभगवान्यदास्वमाययापरसंकल्परूपज्ञानेनप्रकृत्यावाआत्मनाजीवरूपजासमभिप्रायेणैकत्व

ज्योतिरात्मनिरिवाभातिसंघातान्नविविच्यते विदंत्यात्मानमात्मस्थंमथित्वाकवयोंऽनतः २ यदास्मिस्तुःपुरुषात्मनःपरो।
रजःसृजत्येषपृथक्स्वमायया सत्वंविचित्रासुरिरंसुरीश्वरःशयिष्यमाणस्तमईरयत्यसौ। कालंवरंतस्सृजतीशआश्रय
यंप्रधानपुंभ्यांनरदेवसत्यकृत् ३

नआत्मनामित्यर्थः पुरःशरीराणिविसृक्षुःस्रष्टुमिच्छुस्तदारजःसृजतिप्रेरयतीत्यर्थः तम
इरयत्येनेनेकार्यात् पश्चात्स्थानेतरंचविचित्रासुपर्युरिरंसुःरिरंसुरित्यर्थःसत्वंसृजति यदाचेश्वरःशयिष्यमाणउपसंजिहीर्षुस्तदासोप
रमपुरुषस्तमईरयति अथतत्कालानुगुणाभजादितिस्वनितंवाप्रेरकत्वंविवृणोति कालमिति हेनरदेवईशःपरमात्मावरंतत्प्रवर्तमानंभा
ग्रपंस्वमात्मतयाशरीरभूतंकालंसृजतीतिनिमेषकाष्ठाद्यवस्थंकरोति एवंकालस्रष्टाप्रधानपुरुषाभ्यांविदनिकृष्टाभ्यांसत्यकृत्सत्तिर
त्तिःसमीक्षाविशेषःतदुभयंकरोतीतितथा सत्यशब्देन:चिदचिद्भ्यांप्रयोगःतदनुप्रविश्यसच्चत्यच्चाभवदित्यादौप्रसिद्धःतयासत्यशब्दे
स्तत्परत्वश्रुतिः अथयदेवाप्यस्यसत् अथयदेवाःप्राणाश्चतत्संतदेकयावाचासमभिव्याह्रियतेसदितिदेवाःद्वाविंशतितानीन्द्रियाणितेभ्यः
परस्तत्संस्पृष्टेचेतनःसेदवाग्विकृष्टं तत्तदुभयंसत्यमित्येकयावाचाएकशब्देनसमभिव्याह्रियतेतदेतदिहतेत्यर्थः १. एवमीश्वरस्यत
तत्कर्मपरिपाकानुगुणकालेप्रेरकत्वमुक्तंतत्रास्वेनतस्यैवशापर्वकमितिच ईश्वराधीनःकालोदेवादीनांतत्तत्कर्मपरिपाकानुगुण

ति॰ ४

स॰ भा॰ टी॰ ४

यत्निबंधश्चेत अयंदृष्टानांनिंदितानांचलोकानांदृष्टोऽहंनिंदितोऽहमित्यभिमानःयन्निबंधःयद्धेतुकःदेहहेतुकइत्यर्थः देहात्माभिमानस्यदेहहेतुकत्वाद्देहा त्माभिमानहेतुकोऽदृष्टोऽहमित्याभिमानोऽदेहहेतुकएवत्यभिप्रायेणायन्निबंधोऽभिमानोऽयमित्युक्तं एवंतद्यथाद्यमानेषुतस्यदेहस्यवधोदेवप्राणिनांदेहा त्माभिमानिनांवधःदेहगतस्यैववधेनात्मगतःदेहात्माभिमानात्तुहतोऽहमित्यभिमानइत्यर्थः एवंसंसारिणांनिंदनादिसंबंदेहात्माभिमानहेतमित्युक्तं अथो क्तार्थविषयं ईश्वरेऽप्यपीति तथेति यथासंसारिणोदेहात्माभिमानस्तन्मूलकेनिंदितोऽहमित्याद्यभिमानश्चयस्यैवस्यनास्तितस्यात्म्यभिमानप्रयुक्ताप रेखुहिंसाकेनहेतुना कस्यतेइत्यन्वयः अभिमानाभावेहेतुरखिलात्मनः इति सकलजगदात्मत्वादभिमानोनास्तीत्यर्थः नन्वात्मत्वेपितस्यजीवव दभिमानःस्यादेवतत्राह कैवल्यादिति निरस्तनिखिलदोषत्वादित्यर्थः अनंतेनहिप्रयत्नेनइतिश्रुतेःसुरासुरजीवानामनादिपुण्यपापात्मककर्ममू लकोहिदेहात्माभिमानः तस्यतुपरमपुरुषस्यसर्वांतरात्मनोनिरस्तनिखिलकर्मबंधत्वाद्देहाभावत्वादभिमानाभावइतिभावः निंदितोऽहमित्याद्यभिमानइ

रंकेमापि५

4

यन्निबंधोऽभिमानोऽयंतद्धात्प्राणिनांवधः तथानयस्यकैवल्यादभिमानोऽखिला
त्मनः परस्यदमकर्त्तुर्हिहिंसाकेनास्यकल्पते २४ श्रीहनुमतेनमः श्रीरस्तु

दि॰ दि॰

वनास्तिकिंपुनः तत्प्रयुक्तंपरस्मैनिंदकेभ्योहिंसादिकरणंनास्तीत्याह सैहेति अस्यनिंदनादिनाप्रयुक्ताभिमानरहितस्यहिंसानिंदकाद्याकेन कस्यतेहिंसाहेतोरभिमानस्याभावाद्धेतंतरस्यादर्शनात्संभवेनास्त्येवेत्यर्थः ननुकथमुच्यतेऽभिमानस्तत्प्रयुक्ताहिंसाचतस्यनास्तीतियतोऽस्मदादि मक्षमेवनिंदकंचैतयंहतवानिसाशंकांनिराकुर्वन्विशिनष्टि परस्यनिंदकादेर्दमकर्तुःशिक्षाकर्तुःपरस्यहितार्थमेवदंडंकुर्वतइत्यर्थः॥ शिक्षापरस्मैहिताचरणंचैवयस्यहीनामासुरीयोतिंपरिहार्यनिरतिशयपुरुषार्थस्वरूपस्वप्राप्यणेनेदानीमेवास्मदादिभिरपरोक्षंदृष्टइतिभा वः एवंदेहात्माभिमानाभावात्परमपुरुषस्यसंसारिणाइवस्तुतिनिंदाद्यभिमानित्वराहित्यमुक्तं एवंचनिरभिमानित्वाच्चैवयस्यसुक्तिंद दोइतिकश्चित्परिहारः २४ श्रीहनुमतोविजयतेतराम् श्रीरामोविजयतेतराम् श्रीमतेरामानुजायनमः श्रीसरस्वत्यैनमःश्री

राम ४

संप्रति तत्कालपर्यंतं गोविंदे श्रीकृष्णे अमर्षी क्रोधनोऽनेनायं नितरां पापात्मा तथा दंतवक्रोपि दुरात्मा १७ अनयोः परब्रह्मभूतं निर्विकारं श्रीकृष्णं सततं कुपितयोः शिशुपालदं-
तवक्रयोर्जिह्वायां श्वित्रः श्वेतकुष्ठरोगो वापि न जातः नाप्येतावंधं तमो नरकमपि विविशतुः १८ किंतु सर्वलोकानां पश्यतां सतां दुरवगाह्यधामनि दुरवगाह्यं ज्योतिर्मयस्व-
रूपे भगवति अंजसा अनायासेन तत्प्राप्तिसाधनानुष्ठानमंतरेण सायुज्यं कथं लयमीयतुः प्रापतुः भगवत्सायुज्यं कथं प्राप्तवंतावित्यर्थः १९ इतीत्थं वायुना दीपशिखेव मम बुद्धिर्भ्राम्य-
ति हे भगवन् एतन्महदद्भुततमं एतादृशं कारणं च ब्रूहीति २० इत्थमापृष्टो नारदः प्राह स मुनिः राज्ञो युधिष्ठिरस्य तत्प्रश्नरूपं वचः श्रुत्वा भगवान्नारदस्तुष्टः समीचीन-
प्रश्नेन हृष्टः सदस्सभायाः शृण्वंत्याः सत्याः तं युधिष्ठिरमाभाष्य संबोध्य श्रवणाभिमुखं कृत्वा प्रश्नपरिहाररूपां कथां प्राह २१ तामेवाह द्वाभ्यां आद्यैः अस्य प्र-
श्नस्य मुख्यमुत्तरं वक्तुं तावत् संसारिणो देहात्माभिमानप्रयुक्तस्तुतिनिंदाद्यभिमानित्वेन नास्ति इति चैद्यस्य मुक्तिः कथं भवितेति कोऽयं विस्मय इत्याह निं-

संप्रत्यमर्षी गोविंदे दंतवक्रश्च दुर्मतिः १७ शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययं श्वित्रो न जातो जिह्वायां नांधं विविशतुस्तमः १८ कथं तस्मिन्
भगवति दुरवग्राह्यधामनि पश्यतां सर्वलोकानां लयमीयतुरंजसा १९ एतद्भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना ब्रूह्येतदद्भुततमं भगवंस्तत्र
कारणं २० श्रीशुक उ० राज्ञस्तद्वच आकर्ण्य नारदो भगवानृषिः तुष्टः प्राह तमाभाष्य शृण्वंत्यास्तत्सदः कथाः २१ नारद उ० निंदनस्तवस-
त्कारन्यक्कारार्थं कलेवरं प्रधानपरयो राजन्नविवेकेन कल्पितं २२ हिंसा तदभिमानेन दंडपारुष्ययोर्यथा वैषम्यमिह भूतानां
ममाहमिति पार्थिव २३

दनेति हे राजन् निंदनं दोषकथनं स्तवो गुणकथनं सत्कारश्चंदनलेपादिः न्यक्कारः पांसुक्षेपादिः एषामर्थो विषयः कलेवरं प्र-
धानशब्दो देहवाच्यः प्रधानवचनः परशब्दो देहात्परजीववचनः तयोरविवेकेन परस्परविलक्षणत्वविषयकज्ञानाभावेन देहात्माभिमानेनेति यावत् तेनावि-
वेकेन हेतुना कल्पिते कलेवरस्य निंदनादिविषयत्वमविवेककृतं न तु स्वतः जडत्वात् न हि काष्ठं चंदनलेपादिरूपसत्कारादिकं मन्यते इति तावन्निरंहिम।
त्यर्थः २२ एवं स्थिते हे पार्थिव पृथ्वीपते संसारिभूतानां देहात्माभिमानिनां मनुष्यादीनां ममाहमिति च वैषम्यं ममेयं निंदा निंदितोऽहमित्यभिमानरूपं वैषम्यं तदभिमानेन।
ममेयं निंदाभिमानेन दंडपारुष्ययोर्निमित्तयोर्हिंसा च स्यात् दंडस्ताडनं पारुष्यं निंदनं परेण दंडपारुष्याभ्यां कृतो मे ताः तत्प्रयुक्तो ममेयं निंदा निंदितोऽहं ममायं
दंडः दंडितोऽहमित्येवं रूपो नानाविधो भवति तत्प्रयुक्तं परेषु निंदादिकारिषु हिंसाचरणं च यथा लोकानां दृश्यते तेन तथा वैष्णवमंत्रेणान्वयः २३ देहविषयमपि दंडपा-
रुष्यादिकं परकृतं देहात्माभिमानेनात्मगतं मत्वा तदभिमानेन परेषु हिंसाद्युत्पन्ने न पर्योर्हिंसाकारिषु दंडपारुष्यादीकं देहगतमेव न त्वात्मगतं देहा-
त्मनोरविवेकेन त्वात्मगतं मन्येत तथा हिंस्यमानेष्वपि हिंसा च देहगतैव न त्वात्मगता देहात्माभिमानात्तु हिंसितोऽहमित्यभिमान इति तत्सर्वं तदेव स्पष्टमाह श्री

स॰ भा॰ टी॰ वी॰ ५

5

यथावैरानुबंधयोगः अपानेन भयपेगोपिभक्तियोगाद्भूयानिति वदन्वैरानुबंधभययोगयोर्भगवद्विषयकचिंतासंतानात्मयोस्तन्मयत्वा
त्तौ दृष्टांतमाह कीटइति पेशस्कृता भ्रमरेण कुड्यायां निरुद्धः कीटो यथा तमेव पेशस्कृतं संरंभभययोगेन वैरानुबंधभययोगाभ्यामनुस्मरंस्तत्स्वरू
पतां पेशस्कृत्तासाम्यं विंदते तथा संरंभभययोगिनो भगवत्स्वरूपतां विंदते इत्यर्थः तस्यैव स्वरूपं यस्य तस्य भावः तां तत्स्वरूपतामित्यर्थः तेनैवकोंड
त्यर्थः नहि पेशस्कृतारुद्धः कीटस्तेनैकीभवति उभयोरप्युपलभ्यमानत्वादतः साम्यमेवं दृष्टांतांशः इति २७ उक्तार्थं दार्ष्टांतिकेऽप्यतिदिशति ए
वमिति भगवति पूर्णषड्गुणे मायामनुजे स्वसंकल्पोपात्तमनुजाकृतौ साक्षादीश्वरे श्रीकृष्णे विषये वैरेणानुचिंतया वैरपूर्वकानुध्यानेन
नष्टपाप्मानः निरस्तवैरादिदोषा अनेके तमापुः प्रापुः पूतपाप्मानः इत्यस्यायमभिप्रायः यद्यपि यमेवैवमनुध्यानेन नलभ्यस्तस्यैवालाविर्द्धत्व
तेतनं स्वांडइति श्रुत्युक्तरीत्या निरतिशयप्रीतिविषयात्वेऽविच्छिन्नस्मृतिसंततिरूपया भगवद्भक्त्यैव तत्प्राप्तिहेतुत्वं तथा चोक्तं भगवता पुरुषः
स परः पार्थ भक्त्या लभ्यस्त्वनन्यया भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप तेषां सततयुक्तानां भ

कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन् संरंभभययोगेन विंदते तत्स्वरूपतां २७
एवं कृष्णे भगवति मायामनुज ईश्वरे वैरेण पूतपाप्मानस्तमापुरनुचिंतया श्री २८

जतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयांति ते इति श्रुतिश्च तमेवं विद्वानमृत इह भवति नान्यः पंथा विद्यतेऽयनायेत्यादिना भक्ति
रूपप्रीतिपूर्वकमविच्छिन्नमनुध्यानं स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधाय फलश्रुतिभक्तिलक्षणात् संरंभभययोगयोस्तु प्रीतिरूपत्वाभावात्प्रत्युत
तद्विपरीतरूपत्वाच्च न भगवत्प्राप्तिहेतुत्वं तथाप्यत्र संरंभकृतभावनाप्रकर्षेण स्वहेतुभूतसंरंभभययोरपि विस्मरणाद्भावनायाश्च निरतिश
यानंदावहस्वभावस्य विषयत्वेन प्रीतिरूपायत्वात्तस्याश्चापि भगवत्प्राप्तिसाधनत्वमिति एवं च भावनाप्रकर्षेण स्वहेतुभूतवैरादिविस्म
रणात् भावो वैरादीनां तेषां भावलिंगादि प्रयुक्तभयवद्विषयकभावनाप्रकर्षभावेन तन्मूलकानिंदादिदोषाविस्मृतिर्भगवत्प्राप्त्यभावः प्रत्युत
तल्लिंगादिदोषेण निरयप्राप्तिश्चेति विनैव घर्यो वैषम्यमुक्तं भवति अत एवमस्तुतिर्निंदयोः पुण्यापुण्यप्रतिपादकशास्त्रविरोधोपि भाव
नाप्रकर्षेणाविस्मृतवैरादिदोषभवस्तुरूमविषयत्वात्पुण्यप्रतिपादकशास्त्राणां २८ श्रीहनुमता विजयतेतराम् श्रीराम

राम ५

नैवं भगवन्निंदासुकस्य विद्वेषिपापं न स्यात्र च निंदाप्रयुक्ताभिमानरहितं निंद्यातितरोपापित्वप्रसंग इति वाच्यं ताः । सापि चैद्यस्य परमपुरुषप्राप्तिदर्शनात्।
न निरभिमानिनो निंदायाऽसुरूपफलास्त्वयाताद्दशे निरतिशयमुक्तिप्रतिबंधपापसत्तित्वस्य मुक्त्यसंभवात् किंचैवं भगवत्प्रोक्तविदुरुपरपभिमानसात्।
अत्र सर्वशास्त्रार्थविरोधप्रसंगः किं च सामान्यपरे देहेऽपुग्रहिंदेतोऽभ्यसूयकाः तानहं द्विषतः क्रूरान्संसारेषु नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनि
ष्विति भगवद्वचनविरोधप्रसंगात् भगवतः स्तुतिनिंदाभिमानित्वाभावकथनाच्च नैवं यथा वैषम्यं च न सिद्धांतिः तेनैव यथा वैषम्यप्रसंगस्य किं मुक्तत्वेऽपेक्षाबाधकस्य
स्तस्य सत्त्वमाह तस्मादिति निंदाभिमानसंसारित्वस्य तदेवप्रसंगनिराकरणार्थं संसारित्वेनतानां इवेष्टस्तुतिनिंदाद्यभिमानित्वं भगवतोऽनास्तीति द्वेषस्य पापमात्रमुक्तं
निंदात्व स्वसत्कारेत्यादिभिः श्लोकैरिति वक्ष्यमाणस्वसाक्षात्संसारहेतोरेव दितव्यः तस्मादित्यादेरेवं विधमवाप्तवाश्च वैरानुबंधनिर्वैरभयस्नेहकामानामन्यतमेनकेन
चिदुपायेन भगवति मनो युंजीतेत्यर्थः यथा भक्त्या च वैरमनन्यभावेनापि स्वतत्त्वेऽपि तस्य ध्यात् वैरानुबंधो वैरविच्छेदः निर्वैरेणेति न वैरभावो विवक्षितः अपितु भक्तिर्विवक्षि

तस्माद्वैरानुबंधेन निर्वैरेण भयेन वा स्नेहात्कामेन वा युञ्ज्यात्कथंचिन्नेक्षते पृथक् २५
यथा वैरानुबंधेन मर्त्यस्तन्मयतामियात् न तथा भक्तियोगेन इति मे निश्चिता मतिः श्लो॰ २६

ता उक्तस्यैवेत्यादिगणितहेतुप्रपंचस्वस्तित्वेनोक्तत्वात् स्नेहः सौहार्दं वात्सल्यादिरूपेतत्संबंधः न सविच्छिन्नवैरेणापि भगवति मनो युंजीत तेनैव स्पर्शमात्रेणापि भगवत्प्राप्तिः वैरस्य तत्कामानामन्यत
मेनापि भगवत्प्रयुक्तमनसोऽनासक्तिः प्रयुक्तनिरयप्राप्तिरिति वैषम्यमिति भावः मनो योजनस्य कारणमाह कथंचिदिति तेन पृथगिति यथा भगवतोऽन्यद्वस्तु किंचिदपी
केनापि प्रकारेण नेक्षते न विषयीकरोति मनस्तथा युंजीत विज्ञातीयप्रत्ययांतराव्यवहितविज्ञानचित्तेनैव तथा तत्रैवेत्यर्थः २५ ननु तर्हि प्रीतिपूर्वका
नुध्यानात्मकभक्तियोगादपि वैरानुबंधानुध्यानस्य वैशिष्ट्यं प्रतीतमयानिश्चितमित्याह यथेति मर्त्यः संसारी जीवः भगवति यथा वैरानुबंधेन तन्मयत्वं
मयतां इयात् प्राप्नुयात् न तथा भक्तियोगेनाप्नुयादिति मे मया बुद्धिर्निश्चिता मे मे बुद्धिरिति अयमित्यर्थः तन्मयत्वं तत्तद्विचिंतन प्रवृत्तत्वमित्यर्थः विका
राचवनार्थी संभवात्प्राचुर्यमेवानन्यपरत्वर्थः पर्वसु सर्वे चिंते नामतः सरोत्तरं चिंतनस्य प्राचुर्यं तत्त्वप्रयत्नोत्तराव्यवहितस्वरूपे यथा तन्मयतां त
दभिप्रायं प्राप्नुयादित्यर्थः मुक्तानां प्राचुर्येण भगवद्धर्मसाम्यश्रवणात् २६ श्रीहनुमते विजयते तराम् श्रीरामायनमः॥

यतेत्वतताभयःसंबद्धोकुरुनंदनः एवंभ्यासेनतेनैवाहृयतेसर्वशोपिसः इत्येतेनभगवते वारव्वस्यापिभक्तियोगस्यपुनःकालांतरेफलसाधनंस्यात्कथं
स्याद् नत्वेवंसेरंभभयादीनांसुहृदारघ्नानांपुनर्जन्मांतरेभगवत्प्राप्तिसाधनत्वप्रमापकंकिंविद्वचनंविद्यतेप्रस्तुतेयोविष्णुमित्यादिनिंदावचना
न्येवसंति यदिभगवन्निंदादिकारिणामपिसर्वेषांद्वेषादिविस्मारकभावनात्मकर्माःस्यात्तर्हिसाद्वेतेषांमुक्तिरितिनकोपिविरोधः ३१ एवंसं
मैयोगादीनामपिभगवत्प्राप्तिसाधनत्वेनैवयद्दंतवक्त्रयोर्मुक्तौविस्मयःकार्यइत्यभिधायनकेवलंतयोर्भगवद्विषयकभावनात्मकर्मैतादृश
यकसंबंधस्यहेतुरपितदुर्लभसिद्धंभगवदानुकूल्यंचेतिवक्तुंइतिहासंप्र[illegible]स्तु[illegible]प्रस्तावसरप्रदानायतयोस्ताबाहुस्यपार्षदत्वंविप्रशापाद्भ्रंशाच
हे मातृष्वस्रेयइति मातुःस्वसाभगिनीतस्याअपत्यंपुमान्हेपांडववयुधिष्ठिरयाभवतोमातृष्वस्रेयः चैद्योदंतवक्त्रश्चद्वौइमौविष्णोःपार्षदौ
प्रवरौद्वारस्थितौविप्रशापाद्धेतोःपदात्स्थानाच्युतौभ्रष्टौ एवंचतयोःपार्षदत्वेद्वेषातिशयात्प्राकृतनात्यंतभगवदानुकूल्याच्चशापांतेभावना

मातृष्वस्रेयोवश्चैद्योदंतवक्त्रश्चपांडव पार्षदप्रवरौविष्णोर्विप्रशापात्पदच्युतौ ३२ युधिष्ठिरउवाच
कीदृशःकस्यवाशापोहरिदासाभिमर्शिनः अश्रद्धेयइवाभातिहरेरेकांतिनांभवः ३३ श्रीरामश्री

प्रकर्षसिद्ध्यामुक्तिरितिभावः अत्रांतर्वर्तिन्युपेंद्रादिविष्णुलोकेकस्मिंश्चित्तदुपर्येणवादरायणस्यभवाद्वितिन्यायेनोपेंद्राद्युपासनयातद्वारपदा
धिकारंगतौकौचिज्जीवौस्थितौपश्चाद्विप्रशापात्पदच्युतौइतिनारदस्याशयः ३२ एममाशयमजानन्नेवंप्रश्नावसरेदत्तएवेतियुधिष्ठिरः कीदृशइतिद्वाभ्यां
कीदृशःशापइतिशापप्रकारप्रश्नः कस्यैविशेषणंहरिदासाभिमर्शिनइति हरिदासौविष्णुपार्षदावभिमृशतिपराभवतीतिहरिदासाभिमर्शीतस्य॥
अनेनतस्यातोवित्यंसूचितंहरेरेकांतिनांनिकटवर्तिनांभवः जन्माश्रद्धेयइवाभातिप्रतीयते अयंभावः यत्र दुःखंयानेपंथानंमापद्यनत्व
पुनरावर्ततेइतिश्रुतेःमुक्तानामेवपुनरावृत्तिर्नविद्यतेकिंपुन नित्यसिद्धानांभगवत्पार्षदानांभगवत्स्थानाद्भ्रंशाभावइत्जन्माभाव
श्चेति अतद्धंभगवत्पार्षदयोस्तस्य [illegible] दपेक्षयोरुच्यमानमिहजन्मनादर्तव्यं नजन्मप्रतिपादकंवाक्यंजरूवः केवलपांडुका
ण्यभिसारादिवाक्यवदसंगतार्थमिति ३३ तयोर्जन्मासंभवमेवविवृएवन्नाहेति देहेंद्रियासुहीनानामिति श्रीहनुमतोविजयतेतराम्॥

एवमुक्तार्थंदार्ढ्यीतिकेतिदर्शयितुंकेचित्स्वपक्षमीयाह कामादिति यथाभक्तियोगेनेश्वरेमनआवेश्यभगवतोगतिंजग्मुः तथाकामादिभिरपितस्मि
न्मनः आवेश्यतदघंमनसआवेशनमित्तिकामादिरूपमघंहित्वाऽपितत्भावनाप्रकर्षेणकामादिकंविस्मृत्येत्यर्थः बहवःतद्गतिंप्राप्ताः २९ए
तदेवोदाहरणविशेषेणदर्शयति गोप्यइति भगवतिकामाद्गोप्यः तद्गतिंगताइत्यनुषंगः भयात्कंसस्तद्गतिंगतइतिविभक्तिविपरिणामः य
द्वेषाच्चैद्यादयःसर्वेऽपितिनियतकामादिभिरुपायैस्तद्गतिंगताइतियोगपद्येनान्वयः संबंधाद्वृष्णयःस्नेहादद्यूयंइतिवक्ष्यपायद्वयंचेदसंबंधकृत
स्नेहादित्यर्थः अन्यथापंचप्रकारांतर्भावायोगात् भक्त्यावयंनारदादयः तत्रैतेष्वस्मत्संनिकृष्टविषयःप्रेमाभक्तिरुक्ताविषयेतिभेदः ३० एव
मुक्तार्थेनप्रसिद्धवेनचैद्यस्यावैषम्यमाह कतमइति पंचानांकामुकद्वेषिविप्रस्नेहिभक्तानांमध्येवेनस्तीर्श्वरंपरमपुरुषंप्रतिकोपिनभवति
कामुकाद्यन्यतमोनभवतस्तस्मिन्दिष्यानिरय :प्राप्तिरितिभावः तस्मादुक्तानांपंचानांमध्येकेनाप्यन्यतमेनोपायेनभगवतिश्रीकृष्णेमनोनिवेशये

कामाद्द्वेषाद्भयात्स्नेहाद्यथाभक्त्येश्वरेमनः आवेश्यतदघंहित्वाबहवस्तद्गतिंगताः २९ गोप्यःकामाद्भयात्कं
सोद्वेषाच्चैद्यादयोनृपाः संबंधाद्वृष्णयःस्नेहाद्यूयंभक्त्यावयंविभो ३० कतमोपिनवेनस्यात्पंचानांपुरुषं
प्रति तस्मात्केनाप्युपायेनमनःकृष्णेनिवेशयेत् ३१ श्रीहनुमन्तोविजयतेतराम् श्रीरस्तु॥

हेतु८ विवक्षितःमनोनिवेशनेनपंकामादिकमपिविस्मृत्यतत्प्राप्नोतिदीतभावः अतएवविष्णुपुराणे अपगतदोषानुबंधोभगवंतमवायेति ननुसंरंभ
पि२ भययोगादीनामपिभक्तियोगवद्भगवत्प्राप्तिसाधनत्वेयथारद्धविच्छिन्नभगवद्भक्तियोगः पुनर्जन्मांतरेपूर्वाभ्यासेनकौंतेयत्यादिभगवदुक्तेःशिशुपाल
वभ्यासेनोपसंहृतसंरूणभगवद्भक्तियोगभगवंतंप्राप्नोत्येवमारब्धविच्छिन्नसंरंभभयादियोगोपिजन्मांतरेपूर्वाभ्यासेनपरिपूर्णतयोभगवंतंप्रा
प्नुयान्नैवंयुक्तमन्यथाविशुद्धधियांसर्वेषामपिमुक्तिप्रसंगः एवंचयःपुत्रोपितरंद्वेष्टिविषादन्यतरेसंयोविमुक्तत्वेद्वेष्टितंविषादन्यतरेतसंसं॥ ११
मादिविशुद्धवकनिंदावचनानामनवकाशप्रसंगःउच्यते संरंभादीनांतस्मिन्नेवजन्मनिस्वविस्मारकभावनाप्रकर्षावहानांमुक्तिहेतुत्वंनतु
विच्छिन्नानांजन्मांतरसंबंधिनामपिप्रत्युतैषेवभक्तियोगस्यतुविच्छिन्नस्यापिपुनर्जन्मांतरेभावनाप्रकर्षेद्वारामुक्तिसाधनत्वमिति न
चात्मानाभावःधर्मियाद्दकमानस्यसत्वात् पार्थनैवेहनामुत्रविनाशस्तस्यविद्यतेद्दयारभ्यतत्रतंबुद्धिसंयोगंलभतेपौर्वदेहिकं श्रीसरस्वत्यैनमः

विरोधित्व२

स० भा० टी० ७

तत्रो हिरण्यकशिपुर्नृसिंहरूपिणा भगवता हतः हिरण्याक्षस्तु धरोद्धारे भूम्युद्धारनिमित्तं सूकरं वाराहं वपुर्बिभ्रता भगवता हतः ४० हिरण्यकशिपुर्हन्तुं तं प्रह्ला
दस्य मरणाय तच्च तां तं संग्रहेणाह हिरण्यकशिपुरिति स केशवस्य भगवतः निरतिशयप्रियं प्रह्लादं पुत्रं जिघांसुर्हन्तुमिच्छुः पुत्रमरणनिमित्तं नानाविधा यातनाश्च
करोत् ४१ पातना कुर्वाणोपि हिरण्यकशिपुः तं पुत्रं हन्तुमुद्यमैः सर्वोपायैरपि नाशक्नोत् तत्र हेतुं वदंस्तं विशिनष्टि भगवत्तेजसा स्पृष्टं व्याप्तं तत्र हेतुः प्रशांत
मशनापापिपासादिरहितं प्रशान्तं चैव भगवत्तेजःस्पर्श इति भावः यद्वा तस्य प्रशांतत्वे हेतुः समदर्शिनं सुखदुःखादिषु द्वंद्वेषु समदृष्टिं यतः समः सर्ववहिः प्रशांत
इति भावः यद्वा तस्य समदर्शित्वे सर्वभूतानामात्मा ईश्वरस्तद्भूतं तत्प्रकारकतया तदात्मतां प्राप्तं शास्त्रदृष्ट्या तूपदेशो वामदेववदिति सूत्ररीत्या यथा वामदे
२२ वस्यैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चाहं कक्षीवानृषिरस्मि विप्र इति सर्वभूतं तं मत्तरोलानं स्वशरीरैकाधीसात्म्यस्य सर्वप्रकारतयाऽवस्थित इति
प्रकारभेदेपि प्रकार्यैक्यात्तदभिप्रायेण वामदेवो मन्वादिभिः सहात्मनोऽभेदमनुसंहितवानेवं प्रह्लादोप्यहं हरिः सर्वमिदं जनार्दन इति प्रकार्यैक्याद्विशिष्टस्वै

हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः ४० हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियं जिघां-
सुरकरोन्नाना यातना मृत्युहेतवे ४१ तं सर्वभूतात्मभूतं प्रशान्तं समदर्शिनं भगवत्तेजसा स्पृष्टं नाशक्नोद्धन्तुमुद्यमैः ४२ ततस्तौ राक्ष-
सौ जातौ केकश्यां विश्रवःसुतौ रावणः कुंभकर्णश्च सर्वलोकोपतापनौ ४३ तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये रामवीर्यं श्रो-
ष्यसि त्वं मार्कंडेयमुखात्प्रभो ४४ तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ४५ श्रीश्री

केशत्वात्तस्मिन्स्वनिष्ठत्वाभावमालक्ष्याहमेव सर्वभूतान्तरात्मा भगवानित्यनुसंहितवानित्याशयः तस्य विशेषणं सर्वभूतात्मभूतमित्युक्तं ४२ ततस्तौ
द्वेव हिरण्यकशिपुहिरण्याक्षौ द्वितीयजन्मनि केकश्यां भार्यायां विश्रवसः सुतौ जातौ तत्र ज्येष्ठो रावणोऽनुजस्तु कुंभकर्णः तौ उभौ सर्वलोकानुपतापयत इति
तथा ४३ तत्रापि जन्मनि भगवान् राघवो रामो भूत्वा शापमुक्तये तयोः शापात्तारणाय न्यहनत् देनेनाहतकारित्वं भगवतः स्मृतं कोसौ राघवः कीदृशं तद्वी
र्यं कथं वा हतवानित्यत्राह रामवीर्यमिति वीर्यग्रहणं तज्जन्मादीनामप्युपलक्षणं तदवतारतद्वीर्यादिकं सर्वं हे प्रभो मार्कंडेयमुखाच्छ्रोष्यसे तानात्त
न्मया विनम्यत इति भावः ४४ तौ रावणकुंभकर्णावेवाद्य तृतीयजन्मनि तव मातृष्वस्रात्मजौ शिशुपालदंतवक्रौ जातावधुना शापेन निर्मुक्तौ
कृष्णचक्रेण हृतं पापफलकं शरीरं ययोस्तौ ४५ श्रीहनुमते विजयेततराम् श्रीमते रामानुजाय विजयेततराम् श्रीहरिरस्तु श्रीराम

राम ७

कर्मोषतदेहेन्द्रियप्राणरहितानां वैकुण्ठपुरवासिनां नित्यसिद्धानामनेन न्यूर्वमप्यसंभावितप्राकृतदेहेन्द्रियप्राणसंबन्धानभिमुक्तं एवंविधानां देहसंबन्धः प्राकृतदे
हसंबन्धस्तद्बन्धविरोधाद्भोगादिसंबन्धश्च तयोः समाहारः तदेतद्घटमानमप्यसमाख्यातुं कथयितुमर्हसि ३४ एवमापृष्टो भगवान्नारदः प्रश्नसौलभ्यमिति
हासं वक्तुमुपक्रमते एकदेत्यादिना ब्रह्मणश्चतुर्मुखस्य पुत्राः सनन्दनादयः आदिशब्देन सनकुमारसनत्सुजाता विवक्षिताः एते भुवनत्रयं चरन्तः कदावि
यदृच्छया विष्णोर्लोकं जग्मुः अपि विष्णुलोकशब्देन ब्रह्माण्डान्तर्गतविष्णुलोकविषयः न तु मुक्तप्राप्यपरमविषयः वैकुण्ठः कोसितोयेन लोकालोकनमस्कृत।
इति वक्ष्यमाणत्वात् मुक्तप्राप्यविरजादिमार्गेणैव गम्यपरमव्योम्नि योगिनामपि सनकादीनां गमनासंभवान्नित्यसिद्धानामिहात्यल्पसंभवाच्च ३५ सनन्दनादीन्
शिशुत्वात्पञ्चषड्ढायनावस्थायां तेऽर्भकास्तद्वाभास्तद्वदवस्थितास्तान् अर्भावस्थाभिप्रेतं विवृणोति पूर्वेषां रुद्रादीनामपि पूर्वजातान् दिग्वाससः दि

देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनां देहसंबन्धसंबद्धमेतदाख्यातुमर्हसि ३४ नारद उ॰ एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया।
सनन्दनादयो जग्मुश्चरन्तो भुवनत्रयं ३५ पञ्चषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः दिग्वाससः शिशून्मत्वा द्वाःस्थौ
तान्प्रत्यषेधतां ३६ अशपन्कुपिता एवं युवां वासं न चार्हथः रजस्तमोभ्यां रहितं पादमूलं मधुद्विषः पापिष्ठामासुरीं योनिं बालि
शौ यातमाश्वतः ३७ एवं शप्तौ स्वभवनात्पतन्तौ तौ कृपालुभिः प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय कल्पतां ३८ जज्ञाते तौ दितेः
पुत्रौ दैत्यदानववन्दितौ हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः ३९ श्रीहनुमतो विजयतेतराम् श्रीरामः।

गम्बरानेवंभूतानां तान् सनन्दनादीन् शिशून् शिशुत्वेन लक्ष्य विष्णोर्द्वाःस्थौ द्वारपौ प्रत्यषेधतां न्यवारयतां ३६ ताभ्यां प्रतिषिद्धास्ते कुपिताः सन्तः एवं वक्ष्यमाण
रीत्या शपन् शापप्रकारमेवाह युवामित्यादिना रागद्वेषादिरहितं भगवतः पादमूलं वासं कर्तुं युवां नार्हथः अप्राकृतं भगवत्पदारविन्दमूलमाश्रित्यावस्थातुं प्रा
कृतरागद्वेषादियुक्तौ युवां नार्हथः। किन्तु बालिशौ मूर्खौ युवाम् अतो भगवत्स्थानादाशु शीघ्रं पापिष्ठां रागद्वेषादिबहुलाम् आसुरीं योनिम् आसुरजन्मलक्षणं यातं प्राप्नुतं ३७
एवमित्थं शप्तौ तौ पार्षदौ स्वस्थानात् कृपालुभिः तैः सनकादिभिः प्रोक्तौ हे द्वारपौ पुनरिति पुनर्युवयोस्त्रिभिर्जन्मभिः लोकाय पुनरेतल्लोकप्राप्त्यै कल्पतां प्राप
णशीलोऽस्तु इत्याशीः तावता कालेन शापः समाप्यतामित्यर्थः ३८ तावेव पार्षदौ वैकुण्ठे द्वाःस्थौ इह लोके दितेः पुत्रौ जज्ञाते जातौ बभूवतुः तत्र हिरण्यकशि
पुः ज्येष्ठः ततो हिरण्याक्षः तस्यानुजः ३९ श्रीगुरुचरणकमलेभ्यो नमः श्रीहनुमतो विजयतेतराम् श्रीमते रामानुजाय नमः श्री

स० भा० टी० ७

किंतत्राह सपत्नैरिति समेनदेवासुरवर्गयोः समेनाप्युपधावनैरनुवर्त्तनैः पार्ष्णिग्राहेण देवानां सहायभूतेन सर्थः हरिणाप्रेयाऽप्यकर्त्तायः सपत्नैः प्रयोजककर्तृभिः क्षुद्रैरल्पबलैर्देवैः प्रियः सुहृच्च मे भ्राता हिरण्याक्षः घातितः ६ तस्य हरेः कथंभूतस्य घृणेः सूर्यवत्तेजोमयविग्रहस्यापि मायावनौकसः मायापातवराहरूपस्यात एव त्यक्तः स्वभावो येन तस्यैव तामसरूपयोगादितिभावः भजंतं समनुवर्त्तमानं भजमानस्यानुवर्त्तमानस्य बालस्येवास्थिरस्य तविंतस्य ७ एवंभूतस्य हरेः ममशूलेन भिन्ना ग्रीवा यस्य तस्य भूरिणा रुधिरेण रुधिरप्रियं मम भ्रातरं गतव्यथोऽहं यावत्तर्पयिष्ये तावद्यूयं भुवं यातेत्यन्वयः ८ ननु देवैस्तद्वधः कारितो न तस्ते किं न हन्यंते तत्राह तस्मिन्निति अस्माकमहिते शत्रौ कूटे देवानामाश्रये तस्मिन्विष्णौ नष्टे सति यथा वनस्पतौ छिन्नमूले तस्य पत्रस्तस्मिन्सति शाखाः शुष्यंति तद्वद्विष्णुरेव प्राणा जीवनहेतुर्येषां ते दिवौकसो देवाः स्वयमेव नंक्ष्यंति तस्मात्तत्र नाशायनप्रयत्नः कार्य इतिभावः ९ यावत्तर्पयिष्ये तावत्।

गा१

सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितः सुहृत् पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ६ तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः। भजंतं भजमानस्य बालस्येवास्थिरात्मनः ७ मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै रुधिरप्रियं तर्पयिष्ये भ्रातरं मे गतव्यथः ८ तस्मिन्कूटेऽहिते नष्टे कृत्तमूले वनस्पतौ विटपा इव शुष्यंति विष्णुप्राणा दिवौकसः ९ तावद्यात भुवं यूयं ब्रह्मक्षत्रसमेधिताम् सूदयध्वं तपोयज्ञस्वाध्यायव्रतदानिनः १० विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान् देवर्षिपितृभूतानां धर्मस्य च परायणम् ११ श्रीरामश्री

पद्यात

ततत्र

वयं यूयं ब्रह्मक्षत्रकुलाभ्यां समेधितां वर्द्धितां इत्यर्थः भुवं प्रति यौ गत्वा किं कर्त्तव्यं तत्राह सूदयध्वमिति तपआदीनां द्वंद्वे ततो मत्वर्थीय इति तपआदिभिर्युक्तान् सूदयध्वं घातयध्वं १० ननु तैः किमपराद्धं तत्राह विष्णुरिति द्विजानां क्रियाणां मूलोऽयज्ञः स एव धर्मः तन्मयस्तदाकृतिः पुमान् विष्णुर्द्विजक्रियामूल इति भिन्नपदं वा द्विजानां क्रियाः सात्त्विकमूलं यस्य सः यज्ञो यज्ञरूपधर्ममयः इत्यर्थः पुमान् आत्मा तस्मात् शरीरक इत्यर्थः तथा देवर्षिपितृभूतानां धर्मः देवासुरेशपक्षो धर्मस्तस्य च परायणं परमाश्रयः निर्वाहः देवासुरेशपक्षो यो धर्मस्तदाश्रय इत्यर्थः द्विजेषु तत्तत्कर्त्तृकयज्ञादिधर्मेषु विनाशितेषु शरीरविनाशेन विष्णुरपि विनाशितो भवति तद्विनाशाच्चाश्रयविनाशाद्धर्मो विनष्टे सति यज्ञ धर्मोपयतन स्पुरोडाशादिहविर्भागादिरूपजीविकाया अभावाद्देवादयोऽपि स्वयमेव विनष्टा भवंतीतिभावः ११ श्रीगुरुचरणकमलेभ्यो नमः श्रीहनुमतो विजयतेतराम् श्रीरामाय नमः।

राम

वैरानुबंधेनतीव्रमुत्कृष्टंयद्ध्यानंभगवद्विषयकंतेना॰च्युतस्यभगवतःसात्मतामात्मनोभावंप्रकारःसाम्यतासमानासातांसाधर्म्यमित्यर्थः नीतौप्राप्तौ
नर्विष्णुपार्षदौभूत्वाहरेःपार्श्वंजग्मतुः ४६ यदुक्तंहिरण्यकशिपुःपुत्रंप्रल्हादंकेशवप्रियंजिघांसुरित्यादिनाप्रल्हादस्यकेशवप्रियत्वाद्धिरण्यकशिपोःप्रल्हाद
मारणोद्योगपर्यंतोद्वेषइत्युक्तंतावत्सविस्तरेणबुभुत्सुःपृच्छतियुधिष्ठिरः विद्वेषइति दयितेनितरांप्रीतिविषयेतत्रापिमहात्मनिसद्गुणाश्रयेहिरण्यकशिपोर्विद्वेषः
कथंकेनहेतुनासीत्तदुच्यतां यच्चयेनकारणेनप्रल्हादस्याच्युतात्मनाच्युतेभगवत्यात्मामतिर्यस्यतस्यभावःस्तांतांचहेभगवन्मेमह्यंब्रूहि ४७ इतिसप्त
मेप्रथमः १ एवंतयोःकेशवात्मत्वविद्वेषविस्तरंबुभुत्सुनापृष्टोभगवान्नारदःआह भ्रातरीति एवंदेवपक्षपातिनावराहमूर्तिनाभगवताभ्रातरिहिरण्या

वैरानुबंधतीव्रेणध्यानेनाच्युतसात्मतां नीतौपुनर्हरेःपार्श्वंजग्मतुर्विष्णुपार्षदौ ४६ युधिष्ठिरउ॰ विद्वेषोदयितेपुत्रेकथमासी
न्महात्मनि ब्रूहिमेभगवन्येनप्रल्हादस्याच्युतात्मता ४७ इतिश्रीसप्तमस्कंधेप्रल्हादचरित्रेप्रथमोध्यायः १ नारदउ॰ भ्रातर्ये
वंविनिहतेहरिणाक्रोडमूर्तिना हिरण्यकशिपूराजन्पर्यतप्यद्रुषाशुचा १ आहचेदंरुषाघूर्णःसंदष्टदशनच्छदः कोपो
ज्वलद्भ्यांचक्षुर्भ्यांनिरीक्षन्धूम्रमंबरं २ करालदंष्ट्रोग्रदृष्ट्यादुष्प्रेक्ष्यभ्रुकुटीमुखः शूलमुद्यम्यसदसिदानवानि
दमब्रवीत् ३ हिरण्यकशिपुरुवाच भोभोदानवदैतेयाद्विमूर्द्धन्त्र्यक्षशंबरं शतबाहोहयग्रीवनमुचेपाकइल्व
ल ४ विप्रचित्तेममवचःपुलोमन्शकुनादयः शृणुतानंतरंसर्वेक्रियतामाशुमाचिरं ५ श्रीरामश्रीराम

ध्वंविनिहतेसतिहेराजन्रोषेणशुचाशोकेनचार्पितोव्याप्तःपर्यतप्यत्परितापंचकार १ इदंवक्ष्यमाणमाह चं कथंभूतआह तत्राह रुषाघूर्णश्चलन्सं
दष्टदशनच्छदमधरोष्ठोयेनकोपेनउद्दीप्तशीपेनज्वलद्भ्यांचक्षुर्भ्यांधूम्रमंबरमाकाशंकोपाग्निधूमेनैवधूम्रमंबरंनिरीक्षमाणः २ करालदंष्ट्राभिर्भयंकरदं
ष्ट्राभिर्युक्तयाउग्रयादृष्ट्यादुःप्रेक्ष्यंदुर्निरीक्ष्यंभ्रुकुटीयुक्तंमुखंयस्यसः सदसिसभायांशूलमुद्यम्यउद्धृत्य अनेनस्वसामर्थ्यंसूचितंदानवान्प्रतिइदमुवाच ३
तदेवाह भोभोइति सामान्येनतावत्संबोधनंभोभोदानवदैतेयाश्चेति विशेषतःसंबोधनंद्विमूर्द्धन्नित्यादिना ४ हेतेसर्वेयूयंप्रथमंममव
चःशृणुततःश्रवणानंतरमेवमदुक्तमाशुयुष्माभिःक्रियतांचिरंविलंबंमाकुरुतेत्यर्थः ५ श्रीहनुमतेविजयेतेतराम् श्रीरस्तु।

स० भा० टी० वी० ९

तदेवाह अंबांबेत्यादिना यावदध्यायसमाप्ति अंबांबेति द्वित्वं संबोधने हे वध्व इति भ्रातृभार्याः पुत्रा इति तत्सुताणां वीरं हिरण्याक्षं प्रति शोचितुं नार्हथ । कुतः यतः रिपोरभिमुखे शूराणां वधः श्लाघ्यः प्रशस्तः ईप्सितः प्रशस्तत्वेनाभिमत इत्यर्थः २० भवतु नाम तस्य वधः श्लाघ्यस्तथाप्यस्माकं तावद्बंधु गतिस्वेच्छत्राह भूतानामिति इह संसारे भूतानां संवासः सहा[illegible]वस्थानं प्रपायामिव प्रपायामिव संस्थानमिति प्रपायां पान्थानां पिपासितानां जलादिपानेन वि श्रांत्यर्थं धार्मिकैः निर्मितायां शालायां यथा पान्थानां सहावस्थानमस्थिरं तद्वदिह भूतानामपीत्यर्थः अस्थिरत्वे हेतुं वदन् भर्तारं विशिनष्टि स्वकर्मभि हेतुभिर्दैवेन तत्तज्जीवकर्मानुगुणे प्रवृत्तेनेश्वरेणेत्यर्थः एकत्र नीतानां संयोजितानां पुनरन्यत्रोन्नीतानां वियोजितानां २१ ननु जीवतामेव संयोगवियोगौ प्रियाप्रिय हेतू स्तः कथं पुनरजीवतो मृतवद्दग्धस्य तत्र तत्र संयोगवियोगौ इत्यत्राह नित्य इति देहस्यास्थिरत्वेप्यात्मनः स्थिरत्वात् तत्तत्कर्मायत्तशरीरस्योपादानात् तैस्तैः संयोगवियोगावुपपन्नाविति भावः तदेतदुपपादयति आत्मा नित्यः तत्र हेतुरव्ययः विनाशावस्थारहितः तत्कुतः शुद्धः अप्राकृतिपरिमाणोऽप्यस्वरूपः

गविपे

हिरण्यकशिपुरु० अंबांब हे वध्वः पुत्रा वीरं मार्हथ शोचितुं रिपोरभिमुखे श्लाघ्यः शूराणां वध ई
प्सितः २० भूतानामिह संवासः प्रपायामिव सुव्रते दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः
२१ नित्य आत्माऽव्ययः शुद्धः सर्वगः सर्ववित्परः धत्तेऽसावात्मनो लिंगं मायया विसृजन्गु
णान् २२ श्रीरामजी

प्रकृतिपरिणामो हि प्रकृतिगतः तत्कुतः परः देहादिविलक्षणः तत्कुतः सर्ववित् देहेंद्रियप्राणादीनां वित्तत्त्वेन विलक्षण इति भावः कथमेकदेशस्थः सर्ववित्तत्राह सर्वगः स्वधर्मभूतज्ञानद्वारा कृत्स्नदेहादिव्यापीति भावः स्वत एवं भूतोऽप्यसावात्मा मायया स्वसंबंधिविचित्रपुण्यपापात्मककर्मणा गुणान् सत्त्वादीन् विसृजन् कर्मानुरूपं क्षोभयन्नित्यर्थः आत्मनः स्वस्य कर्मफलभोगार्थ इति शेषः लिंगं शरीरं धत्ते बिभर्ति गुणक्षोभस्य कर्मानुगुणत्वात् कर्मणः स्वात्मनः कर्तृत्वात् गुणविसर्गेऽपि कर्तृत्वमुक्तं गुणान्विसृजन्निति उक्तविधोऽप्यनादिपुण्यपापात्मककर्मफलभोग्याय तदनुगुणपरिणामसत्त्वादिगुणपरिणामात्मकं देहं लभत इत्यर्थः तथा च तस्य तत्र तत्र कर्मायत्तदेहसंलाभात्तत्सम्पुक्तावियोगस्यैव संयोगवियोगौ संभवत इति भावः २२ श्रीहनुमते विजयेततराम् श्रीमते हयग्रीवाय नमः श्रीगणेशाय नमः श्रीः ।

राम ९

बै२

तस्माद्यत्रयत्रद्विजोब्राह्मणादयोवर्ततेतंतंजनपदंदेशंयातयूयंतत्संदीपयतदहतवृश्चतछिनीत १२ इतीत्थंभर्तुर्हिरण्यकशिपोर्निदेशमाज्ञामादरयुक्ता
शिरसादायस्वीकृत्यकदनप्रियाःकदनंमर्दनंद्रोहस्तद्युक्तंबालस्यैवप्रियंयेषांतेदानवादैत्याःप्रजानांकदनंचक्रुः १३ कदनप्रियत्वमेवप्रपंचयति पु
रेति तत्रपुरंहट्टादिमद्ग्रामस्तद्रहितः व्रजोगवांवासः उद्यानंकृत्रिमंवनंक्षेत्रंव्रीह्यादिआरारामोऽकृत्रिमंवनमाश्रममृषिस्थानमाकरोरत्नानांवासःखे
टःकर्षकग्रामःखर्वटःगिरिगताश्रयःग्रामः घोषःआभीराणांवासःपट्टणंराजधानीएतानिकेचिद्दहुरग्निप्रक्षेपेणदग्धवंतः १४ केचित्खनित्रैः।
खननसाधनैःसेत्वादीन्बिभिदुः तत्रसेतवोजलबंधनार्थनिर्मितास्तडागाद्यः केचिच्चपरशुःपाणौयेषांतेआजीव्यानुपजीव्यान्फलिनश्चूतादि

यत्रयत्रद्विजागावोवेदावर्णाश्रमाःक्रियाः तंतंजनपदंयातसंदीपयतवृश्चत १२ नारद उ॰ इतितेभर्तृनिर्देशमादायशिर
सादृताः तथाप्रजानांकदनंविदधुःकदनप्रियाः १३ पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् खेटखर्वटघोषांश्च
ददहुःपत्तनानिच १४ केचित्खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् आजीव्यांश्चिच्छिदुर्वृक्षान्केचित्परशुपाणयः।
प्रादहञ्छरणान्येकेप्रजानांज्वलितोल्मुकैः १५ एवंविप्रकृतेलोकेदैत्येंद्रानुचरैर्मुहुः दिवंदेवाःपरित्यज्यभुविचेरुर
लक्षिताः १६ हिरण्यकशिपुर्भ्रातुःसंपरेतस्यदुःखितः कृत्वाकटोदकादीनिभ्रातृपुत्रानसांत्वयत् १७ शकुनिंशं
बरंधृष्टंभूतसंतापनंवृकं कालनाभंमहानाभंहरिश्मश्रुमथोत्कचं १८ तन्मातरंरुषाभानुंदितिंचजननींगिरा
श्लक्ष्णयादेशकालज्ञइदमाहजनेश्वरं १९ श्रीगुरुचरणकमलेभ्योनमः श्रीहनुमतोविजयतेतराम् श्रीरस्तु।

सांश्चिच्छिदुः अन्येचशरणान्गृहान्प्रादहन्अदग्धवंतः केचिज्ज्वलितोल्मुकैःअंगारकाष्ठैःप्रजाःजनान्अजज्वलुः १५ एवंदैत्येंद्रस्यहिरण्यकशिपो
रनुचरैर्मुहुर्लोकेविप्रकृतेउपद्रुतेसतिसर्वेदेवाःस्वर्गंपरित्यज्यासुरैरलक्षितास्तत्रतत्रभुविप्रच्छन्नाविचेरुर्जग्मुः १६ ततोदुःखितोहिरण्यकशिपुः
संपरेतस्यमृतस्यभ्रातुर्हिरण्याक्षस्यकटोदकादीनिप्रेतोद्देशेनकटेनहस्तेनदीयंसतिलंजलंकटोदकंतत्प्रमृतीनिप्रेतोद्देशेनकर्त्तव्यानिकृत्वा
भ्रातुर्हिरण्याक्षस्यपुत्रानसांत्वयत् १७ भ्रातुःपुत्रानुद्दिशति शकुनिमिति १८ तथादेशकालाभिज्ञोऽसुरेश्वरोहिरण्यकशिपुस्तेषांशकु।
न्यादीनांमातरंरुषाभानुंस्वमातरंदितिंचश्लक्ष्णयास्निग्धयानिपुणयावागिरेदंवक्ष्यमाणमाह १९ श्रीमतेरामानुजायनमः श्रीरामश्रीः॥

स· भा· टी· वी· ११

कोसौ रक्षिता तत्राह यइति यईश्वरः स्वकीयैवनन्तकर्मभिरिदंजगत्सृजति नहिंसाव्यसनादेवकिंजन्ममरणादिभिरित्याह अव्ययेचपक्षयादिविकाररहितःकर्माधन प्राकृतदेहरहित इत्यर्थः यश्चस्वेन सृष्टंजगद्रक्षति यश्चस्वेन रक्षितंपुनरवलुंपते संहरति तर्हि एवंविध ईश्वरः कर्मवश्य इवस्वयंकिमर्थंकरोतीति तत्राह हेअबलाः तस्यैवंजगदुत्पत्त्यादिकंतु रीतिःक्रीडेवास्त्यांतरामनयावस्थितमाचराचरात्मकमिदंजगत्क्रीडनंक्रीडापरिकरंजगद्व्यापारस्तस्यक्रीडारूप इतिभावः अतएवनिग्रहानुग्रहयोःप्रभुःसमर्थः ३८ प्रभुत्वमेवान्वयव्यतिरेकाभ्यांदर्शयति यथेति यथापथिमुक्तंन्यस्तमपिदैवेनेश्वरेणरक्षितमगृहीतंसत्तिष्ठतिपुनर्लब्धं भवतीत्यर्थः गृहेस्थितमपितेनदिष्टेनविहतंसन्नश्यति एवमरक्षोपिनाथः रक्षकान्तररहितोपि तेनदिष्टेनरक्षितःजीवति तस्मिन्कृतेयत्नेनजीवति गृहेसुगोप्यमपहतस्तेनैवोपेक्षितःनजीवतिकिंतुविनश्यत्येव ४० किंतर्हियमीश्वरेपिविषमःतत्राह भूतानीति सर्वाणिभूतानिदेवमनुष्यादीनितैस्तैर्निजयोनिकर्मभिःस्वस्वजातिप्राप्तिनिमित्तकर्मभिःकालेनिजयोनिकर्मपरिपाककालेभवंतिपुनस्तत्कर्मक्षयेनभवंति देवमनुष्यादिभूतानांभावाभावौतत्तत्कर्मानुगुणप्रवृत्ते

यइच्छयेशःसृजतीदमव्ययो यएषरक्षत्यवलुंपतेचयः तस्याबलाःक्रीडनमाहुरीशितुश्चराचरंनिग्रहसंग्रहेप्रभुः ३९ पथिच्युतं तिष्ठतिदिष्टरक्षितंगृहेस्थितंतद्विहतंविनश्यति जीवत्यनाथोपितदीक्षितोवनेगृहेपिगुप्तोस्यहतोनजीवति ४० भूतानितैस्तै निजयोनिकर्मभिर्भवंतिसर्वेनभवंतिसर्वशः नतत्रहात्माप्रकृतावपिस्थितस्तस्यागुणैरन्यतमोनिबध्यते ४१ श्रीरामश्रीराम

श्वरापेक्षाइतिनतस्यवैषम्यमितिभावः ननुमाभूदीश्वरस्यवैषम्यंतस्यापित्वंतरात्मतयावस्थितःस्वानर्थरूपंसंसारंस्वयमेवापाद्यकिमयमज्ञ इत्याह नेति तत्रप्रकृतौदेवादिशरीरेजीवांतरात्मतयास्थितोप्यात्मापरमात्मानबध्यतेनसंसरतीत्यर्थः हेतिविस्मयेदेहेस्थितस्याप्येकस्यनबंधः अन्यतस्यतुबंधःइति विस्मयः इतरस्यबंधनमेवाह तस्याःप्रकृतेर्गुणैर्देवोहंस्थूलोहंइत्यादिरूपमतीतिविषयैर्देहगतैर्देवत्वादिभिर्देहात्मभ्रमादिभिरित्यर्थः अन्यतमोदेहेंद्रियादीनामन्यतमोजीवःनिबध्यतेनिबद्धोभवतिसंसरतीत्यर्थः यद्वागुणैःशब्दादिभिर्विषयैर्हेतुभिस्तत्संगेनहेतुनानिबध्यतइत्यर्थः तत्संगएवहितस्य संसारकारणमितिभावः तथाचश्रुतिः तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीति ४१ एवंसर्वभूतानामुत्पत्तिलयादेस्तत्कर्मानुगुणप्रवृत्तेश्वराधीनत्वान्नशोकःकार्यइत्यभिप्रायेदानींदेहस्यविनाशिस्वभावत्वादात्मनस्तुतद्विपरीतरूपत्वादुभावपिनशोकविषयौइतिवक्तुंतावदेहात्मनोःपरस्परवैलक्षण्यमाहद्वाभ्यां श्रीहनुमतोविजयतेतराम् श्रीजानकीविजयतेतराम् श्रीमद्रामानुजोविजयतेतराम् श्री

राम ११

10

विलापमेवाह द्वाभ्यां अहो इति नोस्माकं प्रभो हे भर्तः अकरुणेन निःकृपेण विधात्रा ब्रह्मणा दृग्गोचरांशो भवान्नीतः गमितः दृशामगोचरामवस्थां प्रणीत इतिवा
न्वयः येन विधात्रा पुरा उशीनराणां तद्देशोद्भवानां जनानां वृत्तिदः जीवनप्रदः कृतो भवानधुना तेनैव विधात्रा शुचां शोकानां विवर्द्धनः कृतोसि ३३ हे महीपते हृ सुर
स्त्रैमिन कृतज्ञेन च त्वया विना तेन वसं विधिना वयं कथं स्थाम कथं जीविष्यामः अर्थः अतस्त्वं यत्र यास्यसि तत्रैव वीर तव पादयोः शुश्रूषतीनां सेवां कर्तुमिच्छतीना
मस्माकमनुयाने सहगमने दिशादेहि ३४ एवं मृतं पतिं परिगृह्य विलपंतीनां निर्हारं दहार्थमपनयनमनिच्छतीनामर्कः सूर्योऽस्तं अस्ताचलं प्रति संन्यवर्त्तत
संनिरुद्धो बभूव ३५ ये तस्य मृतस्यैव बंधवः तेषां परिदेवितं रोदनमाश्रुत्य स्वयमेव श्रुत्वा भगवान्यमः स्वयमेव बालको भूत्वा तत्राक्रंदनस्थाने समुपागतः

स्त्रिय ऊचुः अहो विधात्राऽकरुणेन नः प्रभो भवान्प्रणीतो दृगगोचरां दशां उशीनराणामसि वृत्तिदः पुरा कृतोऽधुना येन शु
चां विवर्द्धनः ३३ त्वया कृतज्ञेन वयं महीपते कथं विना स्याम सुहृत्तमेन ते तत्रानुयानं तव वीर पादयोः शुश्रूषतीनां
दिश यत्र यास्यसि ३४ हिरण्यकशिपुरुवाच एवं विलपतीनां वै परिगृह्य मृतं पतिं अनिच्छतीनां निर्हारमर्कोऽस्तं संन्य
वर्त्तत ३५ तत्र ह प्रेतबंधूनामाश्रुत्य परिदेवितं आह तान् बालको भूत्वा यमः स्वयमुपागतः ३६ यम उ० अहो अमी
षां वयसाधिकानां विपश्यतां लोकविधिं विमोहः यत्रागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचंत्यपार्थं ३७ अहो वयं ध
न्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिंतयामः अभक्ष्यमाणा अबला वृकादिभिस्स रक्षिता रक्षति यो हि गर्भे ३८ श्री॥

आगतः
तानाह इत्याश्चर्यं ३६ तदेवाह अहो इत्यादिना अहो इत्याश्चर्ये किं तद्वयसा मतः अधिकानामपि लोकविधिं जन्ममरणादि लोकपरिपाटीं पश्यता
ममीषां प्रेतबंधूनां विशिष्टो मोह इयं तन्विमोहमेवाह यत्र भुवि संभव उत्पत्तिस्तत्रैव गतं पुनस्तत्रैव लीनं मनुष्यं प्रति स्वयं सधर्माणस्तेन तुल्य
जन्ममरणभाजोपि अपार्थं वृथा शोचंति ३७ न्यूनवयस्का अपि वयं स्वाहो अहो धन्या श्रेष्ठाः कुतः यतः पितृभ्यां मातापितृभ्यां त्यक्ता अपि न विचिंतया
मः चिंतां न कुर्मः अबला दुर्बला अपि बाला अपीति वा वृकादिभिरभक्ष्यमाणा वयं तत्र हेतुः यो हि गर्भे रक्षति जन्मनः पश्चादपि स एव हि अस्मा
रक्षिता रक्षिष्यति ३८ श्रीरामायनमः श्रीसरस्वत्यैनमः श्रीवक्रतुंडायनमः श्रीगणेशायनमः श्रीहनुमंतो विजयतेतराम्॥

स॰
भा॰ टी॰
२३

किंवा जातपक्षैर्यैर्गतान्मात्राहीनान्बालकान्कथमहं विभर्मि पुष्णामि किंच मे मम प्रजाः नीडे मातरं प्रतीक्षंते ५४ एवं प्रियाया वियोगेनातुरं दुःखिनमतएव विश्लेषणरुदंतमश्रुकंठं तं कुलिंगं सरव एव शाकुनी रंधीतिशाकुनिकः लुब्धकः आरात्समीपे निलीनस्तिरोहितः सन्कर्माकृष्टेन प्रेरितः शरेण ताडितवान् ५५। एवमितिहासं प्रस्तुत्य प्रकृते योजयति त्वेनोपसंहरति एवं यथा कुलिंगस्तथा त्वमप्यालापार्थमसुमपश्यंतः अनालोचयंतस्तस्य वा दुःखयः विवेकशून्या वर्षशतैरपि शोचंतस्तं न पतिं न प्राप्स्यथ ५६ एवं प्रेतबंधुषु मसंवादरूपमितिहासं प्रस्तुत्योपसंहरति दैत्येन्द्राभ्यां बालशीत एवं स्वयं वा से प्रवदति सदिति सर्वं ज्ञातं यस्तु पत्नाश्रयस्य पिंडाः विस्मितं च ते ता ये यातः यथास्थितमपुरुषार्थत्वेन प्रतीतं किंतु पुरुषार्थत्वेन विपरीतरूपेण प्रतीतं सर्वं देहादिकमनित्यमस्थिरमपुरुषार्थरूपं मे निश्चितं बुद्धि तवेत्यर्थः ५७ यमस्त्वेतदुक्तमुपाख्याय कथयित्वा तत्रैवान्तर्दधे ततो ज्ञातयः सुयज्ञस्य यत्कर्तव्यं सांपरायिकं मनोहितं तेन कर्तव्यं कर्म तत्र चक्रुः ५८ एवमितिहासमुपसं

कथं त्वजातपक्षांस्तान्मातृहीनान्बिभर्म्यहं मंदभाग्याः प्रतीक्षंते नीडे मे मातरं प्रजाः ५४ एवम् एवं कुलिंगं विलपंतमाराच्छ्रियावियोगातुरमश्रुकंठं सएव तं शाकुनिकः शरेण विव्याध कालप्रहितो निलीनः ५५ एवं यूयमपश्यंत आत्मापायमबुद्धयः नैनं प्राप्स्यथ शोचंतः पतिं वर्षशतैरपि ५६ हिरण्यकशिपुरु० बालएवं प्रवदति सर्वे विस्मितचेतसः ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितं ५७ यमएतदुपाख्याय तत्रैवान्तरधीयत ज्ञातयोपि सुयज्ञस्य चक्रुर्यत्सांपरायिकं ५८ ततः शोचत मा यूयं परं चात्मानमेव च क आत्मा कः परो वात्र स्वीयः पारक्य एव वा स्वपराभिनिवेशेन विनाज्ञानेन देहिनां ५९ नारद उ० इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्तमधारयत् ६१
निर्वीमद्भा० सप्तमस्कंधे द्वितीयोध्यायः २ श्रीराम

हत्यतत्कथितार्थमुपदिश्योपसंहरति ततइति यतो देहात्मनोरेवंविधः स्वभावोऽतः हिरण्याक्षादिरूपं परमन्यमात्मानं स्वं प्रतिवा रूपं मा शोचत तादृशं मां विहाय गतस्तं विहायाहं कथं जीवामीत्येवं मा शोचेत्यर्थः स्वः परइत्यभिनिवेशोऽभिमानो यस्मात्तेनाज्ञानेन नानायज्ञानमूलकेन कर्मणा विना देहिनां कः परः को वात्मा कश्च स्वीयः पारक्यो वा स्वीयपरकीयविभागः सर्वोप्यनाद्यविद्यामूलककर्मार्पितदेहसंबंधप्रयुक्तदेहात्माभिमानप्रयुक्त औपाधिकः आत्मनां तु केनापि प्रकारेण स्वाभाविकः शोकहेतुर्न विद्यते तो मा शोचतेत्यभिप्रायः ५९ उपरीतनदैत्यवृत्तांतं वक्तुं तावत्तत्कथामुपसंहरन् दितेरविक्षिप्तचित्तप्रकारमाह नारद इतीत्यं दैत्यपतेः हिरण्यकशिपोर्वाक्यमाकर्ण्य सस्नुषा पुत्रभार्यादिसहिता दितिः क्षणमात्रेण पुत्रशोकं त्यक्त्वा तत्त्वे देहात्मयाथात्म्ये चित्तमधारयत्तत्त्वचिंतनपराभूदित्यर्थः ६० इति सप्तमस्कंधे द्वितीयोध्यायः २ श्रीहनुमते विजयतेतराम् श्रीरामश्रीः॥

राम
३

५२

सर्वदेहात्मनोरुभयोरपि शोकाविषयत्वमुक्तं सहेतुकमुपसंहरति अथेति अथेदं अव्यक्तानित्यमात्मानमनित्यं देहं प्रत्युपपन्नदिदृक्षः देहात्मपक्षयोर्विदितत्वान्शोचं
तिकुतइतिस्याद्देहस्वपक्षःयस्मात्स्वभावः वस्तुनःस्वाभाविकोधर्मःशोचद्भिरप्यन्यथाकर्तुंनशक्यतेनह्यात्मनःस्वाभाविकंनित्यत्वमपनीयानित्यत्वंकेनचि
पा२ च्छोकागुणपेनापादयितुंशक्यं नवादेहस्यानित्यत्वमनुयनित्यत्वंनहिदेवेशोकापनेयनशोकमापादयितुंशक्यमितिभावः ४८ यदुक्तंस्वधर्मस्यधर्मस्त्रिपिशोचंतीतितत्रदृ
ष्टांततयेतिहाससंप्रस्तौति लुब्धकइति कश्चिल्लुब्धकोव्याधःपक्षिणामंतकःमृत्युरिवरूपमस्तुत्वेननिर्मितः अतएवसतत्रवनेजालेवितत्यपक्षिणांप्रलोभनं
वेचनंविरचयेत्सतवार ४९ एवंलुब्धकेप्रलोभयतिसतितत्रसमीपेकुलिंगयोःपक्षिणोर्मिथुनंद्वंद्वंसंचरल्लुब्धकेनादृश्यत तयोःस्त्रीपुंसयोःकुलिंगीस्त्रीसस्त्रावंचनोपाय
नलुब्धकेनप्रलोभिताबभूव ५० सामहिषीकुलिंगीभार्याकालवशात्सतीसिचस्तस्यजाले आसक्ताआसक्ताबभूव। तांसिक्तंसामासंजितांमहिषीभार्यांकुलिंगीवी

अथनित्यमनित्यंवानेहशोचंतितत्त्ववित्। नान्यथाशक्यतेकर्तुंस्वभावःशोचतामिति ४८ लुब्धकोपिवनेकश्चिद्यमःपक्षिणां
निर्मितोऽंतकः वितत्यजालेविदधेतत्रतत्रप्रलोभनं ४९ कुलिंगमिथुनंतत्रविचरत्समदृश्यत तयोःकुलिंगीसहसालुब्ध
केनप्रलोभिता ५० सासक्तासिचस्तस्यामहिषीकालयंत्रिता कुलिंगस्तांतथापन्नांनिरीक्ष्यभृशदुःखितः स्नेहाद्वकस्पःकृ
पणःकरुणंपर्यदेवयत् ५१ कुलिंगउवाच अहोऽत्यकरुणोदेवःस्त्रियाकरुणयाविभुः कृपणंमामनुशोचंत्यादीनयाकिंकरि
ष्यति ५२ कामंमयत्नमादेवःकिमर्धेनात्मनोहिमे दीनेनजीवताद्दुःखमनेनविधुरायुषा ५३ श्रीहनुमतेनमःश्री

सकुलिंगःपुमान्स्नेहाद्दतीवदुःखितःकस्याविमोचनेऽसमर्थःसन्केवलं स्वयमप्यातुरःदीनःकृपणंदीनंयथास्यात्तथापर्यदेवयत्परितत्रपलापंचक्रे ५१ तदेवाह अ
होइतित्रिभिः अहोदैवोविधाताऽकरुणःनिर्घृणः अकरुणत्वमेवाविष्करोति स्त्रियाअकरुणयेतिच्छेदः अकरुणयापासवेतनुकंपयाऽस्त्रियाममभार्ययानितरांकृप
णंमांप्रत्यनुशोचंत्यादीनयाकलिंगाविभुर्देवःकिंकरिष्यतिनकिमपितस्यप्रयोजनंकिंतुमत्प्रकारेणनमांवियोजयन्नियंतीत्यवनितिभावः ५२ यदिमामप्य
करुणोदेवःतत्तोमामपिकामंप्रयत्नेनपततु आत्मनोर्द्धेनममकिंप्रयोजनं एककिंचिन्मयर्द्धंभार्यारूपंनष्टमवशिष्टेनार्द्धेननकिमपिप्रयोजनमस्ती
त्यर्थः अर्द्धविशिनष्टि दीनेनकृपणेनदुःखंयथाभवतितथाजीवताप्राणान्धारयतातविधुरायुषाविधुरंभार्यारहितमायुर्यस्यतेनभा
र्याग्रत्पजीवितमयुक्तेनेत्यर्थः अनेनेति निःस्पृहत्वमुक्तंकार्यापयोगित्वाभावादितिभावः ५३ श्रीहनुमतेविजयतेतराम् श्रीरामश्री

स॰ भा॰ टी॰
वी
९४

तस्येति दुश्चरमन्यैः कर्तुमशक्यं तपश्चरतः कुर्वतस्तस्य देवस्याधिकिल संकल्पः यद्यपि सर्वज्ञस्य तत्त्वं विदितं किंचित् किमपि नास्ति तथाप्यस्मान्निवेदितं भूयतां तथेति शेषः ८ कोसौ संकल्पस्तत्राह स्थेति सर्वधिष्ण्येभ्यः इन्द्रादिस्थानेभ्यः परमे स्थाने तिष्ठतीति परमेष्ठी ब्रह्मा तथा योगेन समाधिः निष्पातेन चरम्त्वरात्मकं मिदं सर्वं जगत्स्थाय निजासनं सर्वोत्कृष्टं सत्यलोकमध्यास्ते ९ तदेवासनमहमात्मनो ममवर्धमानेन तथा योगसमाधिना साधयिष्ये इति ननु ब्रह्मणो दीर्घायुषा तपस्तत्वान्न स्थापितम् तस्मात्कथं साधयेत्तत्राह कालात्मनोत्त्वनिमेषादिति यद्यप्यायुरस्तं तथापि कालस्यात्मनश्चनिमेषात्किं भिजैर्म्मभिः साधयिष्य इत्यभिसंधिरित्यर्थः १० अभिसंधिं करमाह अन्यथेति तथा बलेनाहमिदं जगत्पृथक् अधरोत्तरमप्यधावर्त्य देवासुरादिमयं यथा च कौष्ठ्यं कल्पान्ते कल्पावधिभिरलसवन्माकालेन निर्वृतैर्विनाशैर्वैमवादिभिः वैकुण्ठादिभिः किं प्रयोजनं किमपि इत्यर्थः अनेन सर्वार्थानि विपरीताश्च बुद्धिः सापार्थतामसी सुकरीस्यात्तस्य निर्बन्धमभिसंधिरूपं तच्छ्रुत्वा मत्तर्थमेव परमं तपः आश्रितस्ततोहं त्रिभुवनेश्वरात्र कर्तुं युयुक्ष

तस्याधिकील संकल्पश्चरतो दुश्चरं तपः श्रूयतां किं न विदितं तवाधापि निवेदितं ८ स्थाचराचरमिदं तथा योगसमाधिना अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासने ९ तदहं वर्द्धमानेन तथा योगसमाधिना कालात्मनोत्त्वनिमेषात्साधयिष्येत्यात्मनः १० अन्यथेदं विधास्येहमयथापूर्वमोजसा किमन्यैः कालनिर्धूतैः कल्पान्ते वैष्णवादिभिः ११ इति तच्छ्रुत्वा निर्बन्धं तपः परममास्थितः विधत्स्वानंतरं युक्तं स्वयं त्रिभुवनेश्वर १२ तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च १३ इति विज्ञापितो देवैर्भगवानाब्जसंभवः परीतो भृगुदक्षाद्यैर्ययौ देवेश्वराश्रमं १४ न ददर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः पिपीलिकाभिराकीर्णं मेदस्त्वङ्मांसशोणितं १५ तपंतं तपसा लोकान्यथा अपिहितं रविं विलक्ष्य विस्मितः प्राह प्रहसन्हंसवाहनः १६

एवं तरसा स्वयमेव विधत्स्व कुरु १२ हे जगत्पते तवैव पारमेष्ठ्यं सर्वोत्कृष्टमासनं स्थानं द्विजानां गवां च भवाय धर्मं तस्यासनस्य तवान्यद्विजानां गवां च न भवति कमस्तीति भावः भवञ्चलभलाभः क्षेमः लब्धपालनं श्रेयः धर्मो भूतिः पुरुषार्थः भूतिरैश्वर्यं विजयः उत्कर्षः १३ इतीत्थं देवैर्विज्ञापितो भगवानाब्जभूः परमात्मनोजातो ब्रह्माभृग्वादिभिः परिवृतो दैत्येश्वरस्याश्रमं प्रतिययौ १४ वल्मीकादिभिः प्रतिच्छन्नं तं दैत्यं प्रथमं न ददर्श नत्वाऽवपश्यत् कथंचिद्दृष्टस्य विलसितः प्रहसन् तं प्राहेति द्वयोरन्वयः कथंभूतं वल्मीकस्य पिपीलिकादिभिराचीर्णं मांसं समंतात्भक्षितं मेदस्त्वक्च मांसं च शोणितं च यस्य १५ तपसा तपोग्निना लोकान् तपंतं कमिव विलक्षणात् अपिहितं छन्नं रविं यथा घनैः स्यादिव १६ श्रीहनुमते विजयते तराम् श्रीहयग्रीवाय नमः श्रीगणेशाय नमः श्रीरामश्रीः।

१२

त॰२
राम
२४

सर्वलोकपरितापनरूपं दैत्यादीनां शोकं परिहृत्य व नो रक्ष सोऽपि तेन प्रार्थितः तं भगवान् नरसिंहः हिरण्यकशिपुरित्यादिना हे राजन् युधिष्ठिर हिरण्यकशिपुरात्मानं व्यधित्सत विधातुमैच्छत् कथंभूतम् अजेयं इतरैर्जेतुमशक्यं अजरामरणरहितम् अप्रतिद्वन्द्वं प्रतिपक्षरहितं एकः स्वयमेव राजा इत्येकराजः तं स्वं भूः तमात्मानं धापयितुमैच्छदित्यर्थः येन साधनेन स्वयमुक्तविधोऽभवेत् तादृशं साधनं कर्तुमैच्छदिति यावत् १ तत्साधनानुष्ठानप्रकारमेव प्रपंचयति स इति सः मन्दरगिरेः द्रोण्यां परमदारुणं तपस्तेपे तप्तवान् कथंभूतः सन् ऊर्ध्वौ बाहू यस्य नभसि दृष्टिर्यस्य पादाङ्गुष्ठेनाश्रिता अवनिर्भूमिर्येन २ स च तपः कुर्वन् स्वस्य जटानां दीधितिभिः कान्तिभिः अंशुभिः रश्मिभिः सांवर्तिकः प्रलयकालिकः सूर्य इव रेजे रराज तस्मिन् दैत्ये तपः कुर्वति सति देवाः स्वर्गे देवैरलङ्कृताः सन्तो भवितव्यतया स्थानानि भेजिरे प्रापुः प्रतिपक्षस्यासुरस्य तपःस्थितत्वादुपद्रवाभावादिति भावः ३ तस्य दैत्यस्य मूर्ध्नः सकाशात् समुद्भूतः निष्क्रान्तः तपोमयस्तपस्सम्भूतः

नारद उ॰ हिरण्यकशिपू राजन्नजेयमजरामरं आत्मानमप्रतिद्वन्द्वमेकराजं व्यधित्सत १ स तेपे मन्दरद्रोण्यां तपः परमदारुणं ऊर्ध्वबाहुर्नभोदृष्टिः पादाङ्गुष्ठाश्रितावनिः २ जटादीधितिभी रेजे संवर्तार्क इवांशुभिः तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे ३ तस्य मूर्ध्नः समुद्भूतः सधूमोऽग्निस्तपोमयः तिर्यगूर्ध्वमधो लोकानतपद्विष्वगीरितः ४ चुक्षुभुर्नद्युदन्वन्तः सद्वीपाद्रिश्चचाल भूः निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश ५ तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः धात्रे विज्ञापयामासुर्देवदेव जगत्पते दैत्येन्द्रतपसा तप्ता दिवि स्थातुं न शक्नुमः ६ तस्य चोपशमं भूमन् विधेहि यदि मन्यसे ॥ लोका न यावन्नङ्क्ष्यन्ति बलिहारास्तवाभिभो ७ श्रीमद्रामानुजो विजयतेतराम् श्रीगणेशाय नमः श्रीराम

ततः स आगतेति सप्तदशेति मयस्तपःकार्यभूत इत्यर्थः धूमेन सहितोऽग्निः प्रवृद्धः तिर्यगूर्ध्वमधश्च सर्वान् लोकानतपत् ततापि ४ नद्यः उदन्वन्तः समुद्राश्च चुक्षुभुः द्वीपैरद्रिभिश्च सहिता भूमिश्चचाल ग्रहैः सहिताः ताराः नक्षत्राणि निपेतुः दश दिशो जज्वलुश्च ५ तेन तपसा तप्ता दिवं स्वर्गं त्यक्त्वा ब्रह्मलोकं ययुः धात्रे ब्रह्मणे विज्ञापयामासुश्च विज्ञप्तिमेवाह हे देवदेव देवानामधिपतेः हे जगत्पते दैत्येन्द्रस्य तपसा तप्ताः सन्तो वयं दिवि स्वर्गलोके स्थातुं न शक्नुमः ६ हे भूमन् यदि त्वं लोकानां क्षेमं मन्यसे तर्हि हे अभिभो हे सर्वाभिभवक्षम तव बलिहाराः हविर्भागप्रदाः प्रजाकारिणो वा सर्वे लोका यावन्न नङ्क्ष्यन्ति नाशं न यास्यन्ति तावदेव ततः पूर्वमेव तस्य दैत्येन्द्रस्य तपस उपशमं निवर्तनं स्वेनोपायेन विधेहि कुरु ७ दैत्यस्य मनोऽभिसंधिं ब्रह्मणस्तस्मिन् दैत्ये प्रसादयितुं विज्ञापयन्त आहुः श्रीहनुमतो विजयतेतराम् श्रीसरस्वत्यै नमः श्रीरामश्री

स॰ भा॰ टी॰ वी॰ १५

सर्वविधउत्थापीयवरेहंसवाहनमवस्थितमधिष्ठितं देवं ब्रह्माणं निरीक्ष्य सहसा तस्य ब्रह्मणो दर्शनेन महानुत्सवः संतोषो यस्य तादृशः शिरसा भूमौ नना
म २४ ततउत्थाय प्रांजलिर्बद्धांजलिः प्रह्वः नम्रः हर्षाश्रुभिर्विभुं ब्रह्माणं ईक्षमाणः हर्षेण पुलकोद्गमो यस्य तादृशः गद्गदया गिरा अगृ
णात्स्तौषीत् २५ तदेवाह नवभिः कल्पांत इति तामसत्वाद्ब्रह्माणमेव सर्वकारणं सर्वेश्वरं च मत्वा स्तौति यद्वा परमेश्वरधर्मारोपेण स्तौति क
ल्पांते दैनंदिनकल्पांतकालेन निमित्तेन स्पष्टेनांधेन तमसा सृष्टं इदं जगत् सुमर्थः स्वयंज्योतिः स्वप्रकाशः अनपः स्वरोचिषा अभिव्यनक् अभिव्यक्तमकरोत्
तेन महद्युत्तरेणान्वयः २६ यश्चत्रिवृतासत्वादित्रिरूपया त्रिवृता आत्मना रजसा सृजति सत्वेन अवति लुंपति हरति च तस्मै रजआदित्रिगुणत्रयस्वधा
म्ने आद्याय पराय सर्वलोकस्थाय महते त्रिगुणाय तुभ्यं नमः २७ यतएवमतः आद्याय बीजाय कारणकारणाय विज्ञानमात्रया शास्त्रविवेकात्मना

त्रि२

स निरीक्ष्यां वरेदेवं हंसवाहमवस्थितं। ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः २४ उत्थाय प्रांजलिः प्रह्वः ईक्षमाणो दृ
शा विभुं हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयागृणात् २५ देवउवाच कल्पांतकालसृष्टेन योंधेन तमसावृतं अभि
व्यनग्जगदिदं स्वयंज्योतिः स्वरोचिषा २६ आत्मना त्रिवृता चेदं सृजत्यवति लुंपति रजःसत्वतमोधाम्ने पराय महते नमः २७।
नम आद्याय बीजाय ज्ञानविज्ञानमूर्तये प्राणेंद्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे २८ त्वमीशिषे जगतस्तस्थुषश्च प्रा
णेन मुख्येन पतिः प्रजानां। चित्तस्य चित्तैर्मनइंद्रियाणां पतिर्महान्भूतगुणाशयेशः २९ श्रीगणेशायनमः श्री

नगम्यमूर्तये प्राणेंद्रियमनोबुद्धिविकारैः व्यक्तिमभिव्यक्तिं कार्यत्वं प्राप्तवते तुभ्यं नमः २८ एवं कार्यकारणरूपेणा
वस्थितत्वमुक्त्वा अंतर्यामित्वमाह त्वमिति जगतो जंगमस्य तस्थुषः स्थावरस्य च त्वमेव ईशिषे अंतर्यामितया नियमनधारकत्वमाह मुख्ये
णेन मुख्येन प्राणेनोपलक्षितस्त्वमेव मुख्यप्राणनिर्वाहकस्त्वमेव सर्वः अतएव प्रजानां पतिः यतएवमतः पर्यंतसकलेंद्रियधारकमु
ख्यप्राणनिर्वाहकस्त्वमेव चित्तस्य चित्तैर्बुद्धेर्मनसः इंद्रियाणां च पतिः निर्वाहकः न केवलं प्रत्यादिर्भूतत्वादिधारकः किंतु महान्
भूतानां गुणानां शब्दादिगुणग्राहकाणां इंद्रियाणां मात्रा यस्मान्तः करणस्य चैतेषां आशयः प्रवृत्तिप्रत्ययपतिः तेषु प्रविश्य मात्रास्तेन न धारक ईश
पं २९ श्रीसरस्वत्यैनमः श्रीगणेशायनमः श्रीहनुमंतो विजयतेतराम् श्रीमते रामानुजायनमः श्रीराम श्रीराम श्री

राम १५

13

उक्तिमेवाह उत्तिष्ठेति हे काश्यप उत्तिष्ठोत्तिष्ठ ते तव भद्रं कुशलं भो भविष्यतीति यावत् भविष्यतीत्यत्र त्वं तपसा सिद्धः फलपर्यंतं तपः संपन्नः अत

एव वरदस्त्वं भो अहं अनुप्राप्तः अतस्त्वमीप्सितः इष्टो वरो व्रियतां याच्यतां १७ एतत्ते तव हृत्सारं धैर्यमहद्भुतमद्राक्षं दृष्टवानस्मि हि यस्माद्दंशैर्भक्षितो देहो यस्य तस्य प्राणा अस्थिषु शेरते अस्थीनि भक्षयितुं न शक्नुवंतीत्यर्थः १८ पूर्वे ऋषयो भृग्वादयोपि नैवंविधं तपश्चक्रुः अपरे अर्वाचीनाश्च न करिष्यंति किं पुनर्वक्तव्यं को वै पुमान् दिव्यमानेन शतं समा वर्षाणि निरंबुः त्यक्तोदकं यथा तथा प्राणान् धारयेन्न कोपीत्यर्थः १९ हे दितिनंदन मनस्विभिरपि दुष्करेण तेनानेन व्यवसायेन तपोनिष्ठेन भवता जितोहं तपोनिष्ठेन भवतानुसृतः अजितः २० यतोहं जितस्ततस्ते तुभ्यं हे असुरश्रेष्ठ सर्वा आशिषः ददामि इष्टार्थान् ददामि मर्त्यस्य मरण

ब्रह्मोवाच उत्तिष्ठोत्तिष्ठ भद्रं ते तपःसिद्धोसि काश्यप वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः १७ अद्राक्षमहमेतत्ते हृत्सारं महदद्भुतं दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते १८ नैवं पूर्वर्षयश्चक्रुर्न करिष्यंति चापरे निरंबुर्धारयेत्प्राणान्को वै दिव्यसमाः शतं १९ व्यवसायेन तेनेन दुष्करेण मनस्विभिः तपोनिष्ठेन भवता जितोहं दितिनंदन २० ततस्त आशिषः सर्वा ददाम्यसुरपुंगव मर्त्यस्य ते ह्यमर्त्यस्य दर्शनं नाफलं मम २१ नारद उ० इत्युक्त्वादिभवो देवो भक्षितांगं पिपीलिकैः कमंडलुजलेनौक्षद्दिव्येनामोघराधसा २२ ततः कीचकवल्मीकात्सहओजोबलान्वितः सर्वावयवसंपन्नो वज्रसंहननो युवा उत्थितस्तप्तहेमाभो विभावसुरिवैधसः २३ श्री

धर्मवतस्ते तवामर्त्यस्य तद्धि तस्य मम दर्शनमफलं साधनं न भवति किंतु सफलमेवेत्यर्थः २१ इतीत्थमुक्त्वा आदिदेवो ब्रह्मा अमोघराधसा अमोघप्रभावेन दिव्येन कमंडलुजलेन पिपीलिकैर्भक्षितमंगं यस्य तं दैत्यमौक्षत् अभिषिक्तवान् २२ ततः प्रोक्षणादनंतरं कीचकाख्यवल्मीकादेधसः काष्ठनिचयाद्विभावसुरग्निरिव [illegible] निर्गत इत्यर्थः कथंभूतः सहसा प्राणबलेन ओजसा इंद्रियबलेन देहबलेन चान्वितः तथा सर्वैरवयवैः पाणिपादादिभिः संपूर्णो युक्तः वज्रवत्संहननमंगदार्ढ्यं यस्य सः युवा यौवनयुक्तः तप्तस्य हेम्न इवाभा यस्य सः तप्तसुवर्णतुल्यकांतिरित्यर्थः २३ श्रीहनुमद्बोविजयतेतराम् श्रीमद्रामजो विजयतेतराम् श्रीश्रीः

यदुक्तं कर्मस्वतच्छरीरं तत्तस्य सर्वांतरात्मत्वं च तदुपसंहरन्नमस्करोति द्वाभ्यां। व्यक्तमिति हे विभो स्थूलं चिदचिदात्मकं इदं जगत् व्यक्तं शरीरं स्थूलं शरीरं इत्यर्थः तर्हि किं सूक्ष्मं शरीरं तत्राह अव्यक्तः प्राकृतैरिंद्रियैरगम्यः आत्मा सर्वांतरात्मा जगत्कारणं पुरुषः एवं विधस्त्वं येन शरीरेण चतुर्मुखशरीरेण पारमेष्ठ्ये धाम्नि स्थितः इंद्रियादीनां गुणान् विषयान् शब्दादीन् भुंक्षे स्मृतिरेव। येन शरीरेण जीवानां इंद्रियादीन् तत्तद्व्यापारान् लीलारसं भुंक्षे अनुभवसि तत् सूक्ष्मं शरीरं इत्यर्थः ३३ अनंतेति विविधपरिच्छेदरहितमतींद्रियं यत् स्वरूपं तदनंताव्यक्तरूपं तेन अनंताव्यक्तरूपेण इदमखिलं ततं व्याप्तं तस्मै विदचिच्छक्तिभ्यां कार्यतया प्राप्यशक्तिस्वविशेषणभूताभ्यां चेतनाचेतनाभ्यां युक्ताय तच्छरीरकायेत्यर्थः भगवते षड्गुणपूर्णाय नमः ३४ स्वे परमात्मत्वाभिमानेन तच्छरीरैर्वा ... प्रार्थयते यदीति हे वरद

व्यक्तं विभो स्थूलमिदं शरीरं येनेंद्रियप्राणमनोगुणांस्त्वं भुंक्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा पुरुषः पुराणः ३३ अनंताव्यक्तरूपेण येनेदमखिलं ततं चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः ३४ यदि दास्यस्यभिमतान्वरांन्मे वरदोत्तम भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो ३५ नांतर्बहिर्दिवा नक्तमन्यस्मादपि चायुधैः न भूमौ नांबरे मृत्युर्न नरैर्न मृगैरपि ३६ व्यसुभिर्वासुमद्भिर्वा सुरासुरमहोरगैः अप्रतिद्वंद्वतां युद्धे एकपत्यं च देहिनां ३७ सर्वेषां लोकपालानां महिमानं यथात्मनः तपोयोगप्रभावाणां यन्न रिष्यति कर्हिचित् ३८ इति श्रीभागवते सप्तमस्कंधे तृतीयोऽध्यायः ३।

ममाभिमतान् वरान् दास्यसि तर्हि त्वत्सृष्टेभ्यो भूतेभ्यः सकाशात् मम मृत्युर्मरणं मा भूदेवं मनुष्यादिभ्य इत्यर्थः। विष्णोरपि चतुर्मुखसृष्टत्वाभिमानेन त्वद्विसृष्टेभ्य इत्युक्तं ३५ तथांतर्गृहादीनामंतः बहिर्वा दिवा वा अहनि नक्तं रात्रौ वा अन्यस्मात् त्वत्सृष्टव्यतिरिक्तात् आयुधैरपि भूमौ पृथिव्यामंबरे आकाशे नरैर्मृगैश्च व्यसुभिरप्राणैः असुमद्भिः प्राणवद्भिः असुरैः सुरैर्महोरगैर्महासर्पैश्च मम मृत्युर्मा भूदयमेको वरः वरांतरं च प्रार्थयति अप्रतिद्वंद्वतामिति युद्धे अप्रतिद्वंद्वतां समानप्रतिपक्षतामद्वितीयतां देहिनां प्रजानामैकपत्यं एकाधिपतित्वमयं तृतीयो वरः ३७ तथात्मनो मम सर्वेषां लोकपालानामिंद्रादीनां महिमानमयं चतुर्थः किं च तपसा योगेन च प्रभावो येषां तेषां योगिनां यन्न रिष्यति न नश्यति अणिमाद्यैश्वर्यं तदपि देहीति शेषः पंचमोऽयं वरः ३८ इति श्रीसप्तमस्कंधे तृतीयोऽध्यायः ३ एवं दैत्येन वृतान्वरान्दैत्येंद्रेणाह भगवान्नारदः एवमिति श्रीरामायनमः॥

14

राम २६

अंतरालत्वमेव प्रपंचयति सप्ततंतुः सप्तविधानं तंतन्वंतं विस्तार्यंत इति तंतवः वैदिकाः क्रियाः पशुसोमेष्टिहोमेष्टिविधिभेदेन सप्तविधा
स्ताः यद्वा सप्तभिस्तंतुः तंतत्रैतत्तथा तानि अध्वर्युहोतृब्रह्मोद्गातृप्रतिप्रस्थातॄणां यजमानैः सप्तभिर्वितन्यते इति वा सप्ततंतुस्तान् सप्तसंस्थान् वितनोषि
तरालत्वया प्रवर्तयसि कपात्रयाणां स्त्रेण कथंभूतया चतुर्होतृकविषयाचतुर्होत्रादिसंज्ञकमंत्रविद्यायुक्तया एतेन याज्ञिकैः त्वमंतरालतयोक्तं
उपासनात्मकज्ञानप्रवर्तकत्वमाह आत्मवतां प्रशस्तमनस्कानां योगिनां त्वमेक एवात्मा अंतरालतया योगप्रवर्तक इति भावः त्वमेव सत्यादि
वाक्यप्रतिपाद्यस्वरूपइत्याह अनादिः कालतः परिच्छेदरहितः अनंतपारः अतीतत्वात् परिच्छेदः पारो वस्तुतः परिच्छेदः तदुभयं यस्य नास्ति सोऽनंतपा
रः अनेनानंतशब्दार्थोक्तः कविः सर्वज्ञः अनेन ज्ञानशब्दार्थ उक्तः अंतरालांतर्यामी गतविकाराः स्यात् एतेन नियंता समेव नेन सत्यशब्दार्थ उक्तः ३१ अथ
कालांतरालतया तन्नियंतृत्वमाह त्वमेवेति अनिमिषः कालः कालशरीरकस्तलियंता तस्य लवाद्यैः कालावयवैस्त्वमेव जनानामायुजीवने क्षिणो

त्वं सप्ततंतून् वितनोषि तन्वा त्रय्या चतुर्होत्रकविद्यया च त्वमेक आत्मात्मवतामनादिरनंतपा
रः कविरंतरात्मा ३१ त्वमेव कालोऽनिमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि कूटस्थ आ
त्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य च जीव आत्मा ३२ त्वत्तः परं नापरमप्यनेजदेजच्च किंचि
द्व्यतिरिक्तमस्ति विद्याः कलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत्त्रिपृष्ठः ३३ श्रीरामायनमः श्री

टि०४९

विक्षयसि त्वमेव कूटस्थः निर्विकार आत्मा परमात्मा परमेष्ठी निरतिशयस्थाने वर्तमानः अजः कर्मफलजन्मादिरहितः महान् जगत्कर्तृत्वादिगुणसमन्विता
भिसंहितः कूटस्थजीवलोकस्य जीवः जीवयिता आत्मा त्वमेव कोऽपि वाचकः प्राणादि इति श्रुत्यर्थोत्राभिसंहितः ३२ किंबहुना य
त्किंचिदत्र चरमनेतृ स्थावरं च त्वत्तः परमुत्कृष्टमपरं तुल्यं च नास्ति तथा व्यतिरिक्तमत्वदात्मकं च नास्ति त्वत्तोपकृष्टं त्वदात्मकं च स
र्वं चराचरं जगदित्यर्थः सर्वं तत्पस्य तदात्मकत्वमुक्तं एतेनाथ तस्यात्मकत्वमाह विद्याः वेदाः कलाः उपवेदादयः सर्वे शब्दात्मकाः ते तव
तनवः शरीरभूताः हिरण्यगर्भोसि हिरण्यात्मकं ब्रह्मांडं गर्भे यस्य तथाभूतोसि हिरण्यगर्भः समष्टि तासप्तत्रयात्मकत्वं प्रतिपाद्य
स्वरूपोसीत्यर्थः स्वस्वरूपेण गुणैश्च बृहत् त्रयाणां लोकानां पृष्ठः बहिर्भूतः परमव्योमनिलय इत्यर्थः ३३ श्रीगणेशायनमः श्रीः।

यत्र च देव्यो देवानां स्त्रियः नित्यं सुंदर्यः स्त्रियः कुजद्भिर्नूपुरैस्तत्र तत्र शब्दयंत्यः शब्दं कुर्वंत्यः रत्नस्थलीषु सुंदरं स्वीयं मुखं पश्यंति ११ तस्मिन्नेवं भूते महेंद्र
सभवनेऽधिवसन्नपारबलः महामनाः अव्याहतसंकल्पः अतः स्वेन निर्जितः लोको येन स्वयमेकः स्वराट् जितमधिकं चंडं दुरत्ययं शासनं यस्यातः प्रतापितैः
सुरादिभिर्विंद्यावंद्यौ पादौ यस्य तादृशो रेमे १२ अंगे हे युधिष्ठिर उरुगंधिना अत्युग्रगंधेन मधुना सुरया मत्तं मदः सर्वा विवृत्ते विघूर्णिते ताम्रेऽक्षिणी यस्य तं पायो गस्य बल
स्य रुद्रवलस्योजसः इंद्रियबलस्य च परमाश्रयं ब्रह्मादिभिस्त्रिभिर्विना ब्रह्मविष्णुशिवैर्विनाऽन्ये सर्वे उपायनं पूजाद्रव्यं तद्युक्तपाणिभिरुपायनहस्ता उपासितवंतः १३ उपास
नाप्रकारमेवाह त्रिभिः जगुरिति ओजसा स्वकेन महेंद्रस्यासनमास्थितमधिष्ठितं तं विश्वावसुतुंबरुनारदादयश्च जगुः गानं चक्रुः चारणान् जगुरित्यर्थः गंध

कुजद्भिर्नूपुरैर्देव्यः शब्दयंत्य इतस्ततः रत्नस्थलीषु पश्यंति सुदतीः सुंदरं मुखं ११ तस्मिन्महेंद्रभवने महाबलो महामना
निर्जितलोक एकराट् रेमेऽभिवंद्यांघ्रियुगः सुरादिभिः प्रतापितैरूर्जितचंडशासनः १२ तमंग मत्तं मधुनोरुगंधिना वि
वृत्तताम्राक्षमशेषधिष्ण्यपाः उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदं १३ जगुर्महेंद्रासनमोजसा ।
स्थितं विश्वावसुस्तुंबुरुरस्मदादयः गंधर्वसिद्धा ऋषयोऽस्तुवन्मुहुर्विद्याधराश्चाप्सरसश्च पांडव १४ स एव वर्णाश्रमि
भिः क्रतुभिर्भूरिदक्षिणैः इज्यमानो हविर्भागानग्रहीत्स्वेन तेजसा १५ अकृष्टपच्या तस्यासीत्सप्तद्वीपवती मही तथाका
मदुघा द्यौस्तु नानाश्चर्यपदं नभः १६ रत्नाकराश्च रत्नौघांस्तस्य सृष्टाश्च ऊर्मिभिः क्षारसीधुघृतक्षौद्रदधि ।
क्षीरामृतोदकाः १७ श्रीरामराम श्रीरामराम श्रीरामराम श्रीरामराम श्रीरामराम श्रीराम श्रीराम

र्वाः सिद्धा ऋषयश्च विद्याधराश्चाप्सरसश्च मुहुर्मुहुरस्तुवन् हे पांडव १४ स एवासुरः वर्णाश्रमनिष्ठैर्ब्राह्मणादिभिः कर्तृभिर्भूरिदक्षिणायुक्तैः क्रतुभिः
इज्यमानो ब्राह्मणैराधीयमानाः स्वबलेन हविर्भागानग्रहीत् १५ तस्यासुरस्य संबंधिनी या सप्तद्वीपयुक्ता पृथिवी अकृष्टपच्या कर्षणेन विनाफलिन्यभू
त् तथा द्यौः स्वर्गाभिमानिनी देवता यथाकामं यथेष्टं दोग्धी याचितान् पूरयतीति तथाऽभूत् तथा नभः अंतरिक्षाभिमानी देवता नानाश्चर्यमयं वि
विधविचित्रवस्तुप्रदमभूत् १६ रत्नाकराः समुद्राः तस्य लोभेन गंगादिनद्यश्च ऊर्मिभिस्तरंगैः रत्नसमूहान् ऊहुः प्रापयामासुः रत्नाकरानेवाह ।
क्षारेति सीधुसुरा लोहमिक्षुरसः अमृतं स्वादुं क्षारादिमया उदकानि येषां ते क्रमोऽत्र न विवक्षितः १७ श्रीहनुमते नमः जयतितराम् श्रीराम

राम
१०

नि

15

म॰ ती॰

एवं वृत्तोऽप्यर्थितः शतधृतिर्ब्रह्मा हिरण्यकशिपोस्तपसा तोषितः तस्य सुदुर्लभान्वरान्प्रादात् १ एवेदमाह ब्रह्मेत्याह हे तात मम मे एताः यान्वरान्वृणीषे। ते इमे वराः पुंसां यद्यपि दुर्लभाः तथापि दुर्लभानपि तान्वरान्हे अंग हे हिरण्यकशिपो तुभ्यं वितरामि वर्त्तमानसामीप्ये लट् दत्तवानस्मीत्यर्थः २ एवमुक्त्वाऽमोघः सफलोऽनुग्रहो यस्य स विभुर्भगवान्ब्रह्मा असुरवर्येण पूजितः प्रजेश्वरैर्भृगुदक्षाद्यैः स्तूयमानः स्वस्थानं जगाम ३ एवं लब्धा वरा येन स। दैत्यो हिरण्यवत् प्रकाशवत् उज्ज्वलं देहं बिभ्राणो भ्रातुर्हिरण्याक्षस्य वधं भगवत्कृतं स्मरन्भगवद्द्वेषसहितं भगवति द्वेषमकरोत् ४ तदेव प्रपंचयति सुपांकुलमाह स इत्यादिना स महासुरो हिरण्यकशिपुः त्रीन्लोकान्सर्वा दिशश्च विजित्य तथा देवादीन्सर्वसत्त्वपतीन्सर्वभूताध्यक्षान्विश्वजित् जित्वा वशमानीय

पा॰

नारद उ॰ एवं वृत्तः शतधृतिर्हिरण्यकशिपोरथ। प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् १ ब्रह्मोवाच तातेमे दुर्लभाः पुंसां यान्वृणीषे वरान्मम। तथापि वितराम्यंग वरान्यद्यपि दुर्लभान् २ नारद उ॰ ततो जगाम भगवानमोघानुग्रहो विभुः। पूजितोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः ३ एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः। भगवत्यकरोद्द्वेषं भ्रातुर्वधमनुस्मरन् ४ स विजित्य दिशः सर्वा लोकांश्च त्रीन्महासुरः। देवासुरमनुष्येन्द्रान्गन्धर्वगरुडोरगान् ५ सिद्धचारणविद्याध्रानृषीन्पितृपतीन्मनून्। यक्षरक्षःपिशाचेशान्प्रेतभूतपतीनथ ६ सर्वसत्त्वपतीन्जित्वा वशमानीय विश्वजित्। जहार लोकपालानां स्थानानि सह तेजसा ७ देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपम्। महेन्द्रभवनं साक्षान्निर्मितं विश्वकर्मणा। त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ८ यत्र विद्रुमसोपाना महामारकता भुवः। यत्र स्फाटिककुड्यानि वैदूर्यस्तम्भपंक्तयः ९ यत्र चित्रवितानानि पद्मरागासनानि च। पयःफेननिभाः शय्या मुक्तादामपरिच्छदाः १० श्रीरामं

विश्वजित्सन् लोकपालानां तेजसा सह स्थानानि जहार अपहृतवान् ५ ६ ७ देवोद्यानैर्नन्दनादिभिस्तेषां श्रिया सर्वसम्पदा जुष्टं युक्तं त्रिविष्टपं स्वर्गमध्यास्ते स्माधिष्ठितवान् अधिशीङ्स्थासां कर्मेति कर्मत्वं विश्वकर्मणा निर्मितं त्रैलोक्यलक्ष्म्या आयतनमाश्रयं भोग्यभूतोपकरणादिसर्वसमृद्धिमन्महेन्द्रस्य भवनं साक्षात्स्वयमध्युवास ८ महेन्द्रभवनं विशिनष्टि यत्र भवने विद्रुममयाः सोपानाः भुवः स्थलानि वेदिकादीनि महामारकताः इन्द्रनीलमयाः यत्र भवने स्फटिकमयानि कुड्यानि भित्तयः यत्र वैदूर्यमणिमयस्तम्भपंक्तयः संति ९ यत्र च वितानानि चित्रकल्पितानि शिल्पिपद्मरागरत्नमयान्यासनानि च पयःफेननिभाः दुग्धफेनवन्मृदुलाः शुभाश्च शय्याः मुक्तादामानि परिच्छदाः परिकरा यासां ताः १० श्रीगुरुचरणकमलेभ्यो नमः श्री भगवद्रामानुजो विजयतेतराम् श्रीः।

स॰
भा॰ टी॰
बी॰
९८

इतीत्थं देवाः संयतात्मानः स एव भगवान् रक्षिष्यतीति विस्रंभयुक्तमनसः समाहितधियः यद्वा संयतात्मान इति वा इंद्रियजय उक्तः समाहितधिय इत्यनेन
तेनेंद्रियजयः वायुभोजना इत्यनेन प्राणजयः विनिद्रा इत्यनेन कायजयः सर्वविधा हृषीकेशं उपतस्थुः तुष्टुवुः वक्ष्यमाणमंत्रं जेपुर्वा २३ भगवते तस्मै पु
णीय पुरुषाय सर्वांतर्यामिने महात्मने अनुकंपायुक्तोऽत्मा मनो यस्य तस्मै विभुरूपस्य भावो ज्ञानमानंदः सुखं वत्तपोः संदेहः पूरः तद्रूपाय यतो यस्मात् आश्रयणाद्रक्षिता
नाम भयं तस्मै नमः २४ तेषां देवानामेवमुपतिष्ठतां वाणी आह आविरभूत् इति श्रुते सर्वः कथंभूता रूपा देववक्त्राकाशे घनिस्वना मेघघोषतुल्याः ककुभो दिशः
संनादयंती प्रतिध्वनयंती साधूनामभयंकरी २५ वाणीमेवाह मेति हे विबुधश्रेष्ठाः यूयं मा भैष्ट भयं कुरुत वो युष्माकं सर्वेषां भद्रं सुखमेव भविष्यति यस्मात् मम
दर्शनं कदाचिदपि भूतानां श्रेयसे उपपत्तये प्राप्तये भवति २६ दैतेयाधमस्य तस्य हिरण्यकशिपोर्दौरात्म्यं तन्मया ज्ञातं विदितमेव तस्य दैत्यस्य शांतिं वधं करिष्यामि

इति ते संयतात्मानः समाहितधियोऽमलाः उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः २३ ओं नमो भगवते तुभ्यं पुरुषाय महात्मने विभुरूपानुभ
वानंदसंदोहाय यतोऽभयं २४ तेषामाविरभूद्वाणी अरूपा मेघनिस्वना संनादयंती ककुभः साधूनामभयंकरी २५ हरिरु॰ माभैष्ट विबु
धश्रेष्ठाः सर्वेषां भद्रमस्तु वः मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये २६ ज्ञातं मे तस्य दौरात्म्यं दैतेयापशदस्य यत् तस्य शांतिं करिष्या
मि कालं तावत्प्रतीक्षत २७ यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु धर्मे मयि च विद्वेषः स वा आशु विनश्यति २८ निर्वैराय प्रशांताय
स्वसुताय महात्मने प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितं २९ नारद उ॰ इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः न्यवर्तंत गतोद्वेगा मे
निरे चासुरं हतं ३० श्री

तद्योचितकालः तावत् प्रतीक्षतां किंचित्कालविलंबं सहध्वं इत्यर्थः २७ कोऽसौ तद्योचितः कालः तत्राह यदेति यस्मिन्का
ले देवादिषु तस्य नितरां द्वेषः तदा स आशु विनश्यति २८ ननु देवादिषु विद्वेषेऽपि न तस्य नाशः अस्य वरेणोर्जितत्वादित्यत्राह निर्वैरायेति यदा प्रह्लादाय द्रुह्येत् तदा
वरोर्जितमपि हनिष्ये कथंभूताय आत्मैवात्मा यस्य स महात्मा मतिर्यस्य तस्मै निर्वैराय सर्वभूतसुहृदे प्रशांताय रागादिरहिताय स्वस्यात्मजाय निरतिशयप्रियाय य
दा द्रोहं करिष्यति तदा तं हनिष्यामि महत्त्वविषयापराधस्य ममातिसरामसह्यत्वादिति भावः २९ इतीत्थं लोकगुरुणा भगवता उक्ताः दिवौकसो
देवा भगवंतं प्रणम्य गतोद्वेगाः गतो द्वेगो भयं येषां ते तादृशाः संतो न्यवर्तंत भगवद्वपुषि स्थिते इति शेषः असुरं हिरण्यकशिपुं हतं प्राप्तं च मेनिरे मनं
त ३० श्री हनुमते विजयते तराम् श्रीराम श्रीराम श्रीराम श्रीरामः श्रीराम श्रीमते रामानुजाय नमः श्रीरामाय नमः श्री

राम
९८

16

शैलः पर्वतः ज्ञात्मिन्नाये भेकवचनं ऊर्मिभिः कंदैः सुमान्धारकमभूत्तान् सर्वर्तुकुसुमैस्तानि सर्वैश्च तद्गुणाः फलपुष्पाद्यपि वा नानाक्रीडन्
क्रीडास्थानोपयुक्तान् सर्वर्तुषु शश्वत् सफलपुष्पादिवर्णधारि इत्यर्थः तेषां स्वस्य मति लोकपालानां [illegible] तदाधिपत्यं कालायां इत्यर्थः ए
कोऽद्रुमः वसन्तादि कालनियमेन प्रत्यग्गुणान् फलपुष्पादीन् धारयत्याधिपत्यैः नियतकाले सर्वान् गुणान् धारे इत्यर्थः यद्वा अयमसुरस्य कस्य वसर्वेषां
लोकपालानां प्रत्यग्गुणाः प्रतिनियतान् गुणान् धारः सर्वेषामाधिपत्यमेकस्य वचकार इत्यर्थः १८ इत्थं निर्जिताः ककुभो दिशो येन स ए तस्य कस्य वरा
जास ... तापमजितेद्रियः १९ इत्यमैश्वर्येण मत्तस्यात एव तस्यातस
न ... वर्तिनः वैदिक ... नानुवर्तिनः उत्पथप्रतिपन्नस्येत्यर्थः ब्रह्मणो ... प्रयुक्तः महान् कालः चतुर्युगात्मकः का
लः व्यतीपायातिक्रान्तोऽभूत् ब्रह्मशापमुपेयुषः तेन तज्जन्मावसानकालः प्राप्त इति सूच्यते २० तदेवमुक्तं तद्विभिः संतापमाह तस्य देवमस्या

शैलेऽजनीभिराक्रीडं सर्वर्तुगुणशालिनम् दधारो लोकपालानामेकस्वच्छगुणान् १८ सहस्रं निर्जितककुबेकराड्
नयाम्निपाल यथा यज्ञो ... नानारूपं हनितेऽद्रिपः १९ सदैवैश्वर्यमत्तस्य तस्य च्छास्त्रवर्तिनः कालो महानत्यती
याय ब्रह्मशापमुपेयुषः २० तस्योग्रदण्डसंविग्नाः सर्वे लोकाः सपालकाः अन्यत्रालब्धशरणाः शरणं प्रपुरच्युतं २१ तस्मै
नमोऽस्तु काष्ठाय यत्रात्मा हरिरीश्वरः प्रविष्टा न निवर्तन्ते शान्ताः संन्यासिनोऽमलाः २२

तस्योग्रशासनेन संविग्नाभीताः सपालकाः
सर्वे लोकाः अन्यत्रालब्धं शरणं निवासस्थानं यैस्ते अच्युतं भगवन्तं शरणं प्रपुः प्राप्ताः अन्यत्रालब्धशरणा इत्यस्यायमर्थः इति वार्थः
सर्वदेवतपः पीडितास्ते प्रथमं नाय ब्रह्माणं शरणं प्रपन्नाः ... ब्रह्मापि कर्तुमशक्य
इत्यालोच्यानन्यशरणा भगवन्तमेव शरणं प्रपुरित्यर्थः २१ शरणवरणप्रकारमेवाह तस्मै इति तस्मै काष्ठाय दिशेनमः काष्ठां विशिनष्टि यत्र
यस्यां काष्ठायां ईश्वरः सर्वनियन्ता हरिराश्रितार्तिहरो भगवानास्ते शान्ताः रागादिरहिताः अत एव अमलाः करणाः संन्यासिनो न्यासविधानिष्ठाः य
त्र यां च काष्ठां गत्वा प्राप्य न निवर्तन्ते न पुनः संसरन्ति तस्मै नमः इति यस्यां दिशि ... भगवानास्ते तद्दिगभिमुखो नमोऽस्त्विति ... स्वसा।
यः सर्वं कं भगवन्तं शरणं प्रपुः का ... इति दिक् शरणवरणे नदेवानामपि भगवद्दर्शनं दुर्लभमिति सूचितं २२ क्षीहत्वमेतनमः स्त्री

स.
भा. टी.
९९

हेन्नपयुधिष्ठिरसाधुगाथासदसिसभायांरिपवःशत्रवोपियंप्रल्हादंप्रतिमानंसाधनेलदृष्टांतंकुर्वंतिकिंमुभवादृशाःअन्येप्रतिमानंनकुर्वंतीति ३७।
नृपाकेवलमसंख्येयैर्गुणैस्तस्यमहात्म्यंसूच्यतेनसाकल्येनतद्गुणावर्णयितुंशक्याइतिभावः अलमितिपाठेऽधिकंतस्यमहात्म्यंसूच्यतेमयादिङ्मात्रेगुणप्रदर्शिते
नमहात्म्यंसूच्यतेनत्वेतावतास्यमहात्म्यमित्युच्यतइत्यर्थः अपारमहात्म्येहेतुंवदन्विशिनष्टि वासुदेवेइति यस्यप्रल्हादस्यवासुदेवेभगवतिनैसर्गिकीस्वाभावि
कीरतिरितिसिद्धेत्यर्थः [illegible] वामेवंमहात्म्यमितिभावः ३८ नैसर्गिकिलिंगानिवदन्विशिनष्टिन्यस्तेत्यादिषड्भिः बालस्यबाल्या
स्वभावतीयर्थः तन्मनस्तया भगवद्गतहृदयेनन्यस्तक्रीडनकस्त्यक्तबालक्रीडनकःकृष्णग्रहेणगृहीतआत्मामनोयस्यग्रहगृहीतवद्वर्तमानइत्य
र्थः अतएवजगदीदृशंनवेदयावद्वस्तुविषयकचिंतारहितइत्यर्थः ३९ एतदेवप्रपंचयति आसीनइति आसनाद्यवस्थास्वपिस्थितोप्येतान्यासनादीनानुसंध

निर्द

यंसाधुगाथासदसिरिपवोपिसुरानृप प्रतिमानंप्रकुर्वंतिकिमुतान्येभवादृशाः ३७ गुणैरलमसंख्येयैर्माहात्म्यंतस्यसूच्यते वासुदेवे
भगवतियस्यनैसर्गिकीरतिः ३८ न्यस्तक्रीडनकोबालोजडवत्तन्मनस्तया कृष्णग्रहगृहीतात्मानवेदजगदीदृशं ३९ आसीनः
संविशन्नश्नन्शयानःप्रपिबन्ब्रुवन् नानुसंधत्तएतानिगोविंदपरिरंभितः ४० क्वचिद्रुदतिवैकुंठचिंताशबलचेतनः क्वचिद्धसति
तच्चिंताह्लादउद्गायतिक्वचित् ४१ नदतिक्वचिदुत्कंठोविलज्जोनृत्यतिक्वचित् क्वचित्तद्भावनायुक्तस्तन्मयोनुचकारह ४२ क्वचि
दुत्पुलकस्तूष्णीमास्तेसंस्पर्शनिर्वृतः अस्पंदप्रणयानंदसलिलामीलितेक्षणः ४३ श्री

17

सेनानुसंहितवान् तत्रहेतुर्यतोगोविंदेनभ
गवतापरिरंभितःसंश्लिष्टःगोविंदानुसंधानतत्परत्वेनविस्मृतदेहधर्मइत्यर्थः ४० क्वचिद्गोविंदानुसंधानविच्छेददशायांरुदतीत्याहक्वचिदितिवैकुं
ठ गोविंदचिंतयाशबलामिश्राश्रुभिनाचेतनाबुद्धिर्यस्यतादृशः क्वचिद्धसति तच्चिंतयाआह्लादोयस्यतादृशउच्चैर्गायतिगोविंदगुणानितिशेषः
४१ क्वचित्तच्चिंतासारस्यनदतिध्वनतिक्वचिदुत्कंठःकंठोपरिव्याप्तहर्षःविगतलज्जोनृत्यतिउत्कंठोमुक्तकंठःसन्ध्वनतीतिवा क्वचित्तद्भाव
नयाभगवच्चेष्टाभावनयायुक्तस्तन्मयःतदात्मकःस्वात्मानंतदप्यकस्मिन्मत्वेनप्रत्यन्नपितदपितदनुसंधानेनविस्मृत्यतद्रूपतापन्नमिमानेनात
चकारानुकरोतिभगवतश्चेष्टितमित्यर्थः ४२ क्वचित्संस्पर्शेनाविच्छिन्नानुध्यानेननिर्वृतःसुखितःस्थिरःप्रणयःस्नेहःतेनयोआ
नंदस्तेनयत्सलिलंतेनामीलितेईक्षणेयस्यउत्पुलकःउद्दतरोमातूष्णीमास्ते ४३ श्रीहनुमतेविजयतेतराम् श्रीहरिरस्तुःश्रीः।

राम
९९

तस्य पर्वस्वेव विग्रहाद्यपमृत्युः उचितकाले निष्पन्नमित्येवं विधभगवदंशकेलनिश्चयस्य दैत्यपतेर्हिरण्यकशिपोः परमाद्भुताश्चत्वारः प्रह्लादानुह्लादसं-
ह्लादह्लादाख्याः पुत्रा आसन् तेषां मध्ये प्रह्लादो गुणैः श्रेष्ठोऽभवत् महात्मा बहुगुणैस्तं विशिनष्टि महतां भागवतानामुपासकः भागवत-
भक्तिपर्यन्तभगवद्भक्तिरिति इयमेव भगवद्भक्तेः पराकाष्ठेति भावः ३१ ब्रह्मण्य इति ब्राह्मणकुलेषु साधुरनुकूलो ब्रह्मण्यः यद्वा ब्रह्मणि परस्मिन्निरतः साधुः
शीलेन सुस्वभावसम्पन्नः अलौकिकेन गुणेन सत्यसंधः सत्यप्रतिज्ञः जितानीन्द्रियाणि येन सर्वाणि येन सर्वभूतानामात्मना तुल्यमात्मवदेव सर्वसाधारणः प्रिय-
तमः सुहृत्तमः च प्रियसुहृत्तमः आत्मनोऽप्रियतमः स्वहिते च तद्रूपमपि सर्वभूतविषयकप्रीतिमुक्तं तद्धितेऽपीत्यर्थः ३२ दासवत्सन्नतार्याङ्घ्रि-
रार्याणां सन्तां अङ्घ्रौ येन पितृवत् दीनेषु वत्सलः भ्रातृवत् सदृशेषु स्निग्धः स्नेहयुक्तः गुरुषु ईश्वरस्येव भावना यस्य सः ३३ विद्यादिभिर्हेतुभि-
र्यो मानो गर्वोऽभिमानस्ताभ्यां विवर्जितः तत्राद्यो विद्यादिसम्पत्तिजन्मादिजातः संप्रदायः प्रकारार्थो विद्यादिस्तद्गुणान्यदभिमानादिनिमित्तेन विवसिते ३४ व्यसनेषु

तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः ३१ ब्रह्मण्यः शीलसंपन्नः सत्यसंधो जितेन्द्रियः आत्मवत्स-
र्वभूतानामेकः प्रियसुहृत्तमः ३२ दासवत्सन्नतार्याङ्घ्रिः पितृवद्दीनवत्सलः भ्रातृवत्सदृशे स्निग्धो गुरुष्वीश्वरभावनः विद्यार्थरूपजन्मा-
ढ्यो मानस्तम्भविवर्जितः ३३ नोद्विग्नचित्तो व्यसनेषु निःस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् दान्तेन्द्रियप्राणशरीरधीः सदा प्रशान्तकामो
रहितासुरोऽसुरः ३४ यस्मिन्महद्गुणा राजन् गृह्यन्ते कविभिर्मुहुः न तेऽधुनापि धीयन्ते यथा भगवतीश्वरे ३६ दुःखहेतुषु नोद्विग्नं नजितं चित्तं य-

स्य दृष्टेष्वैहिकेषु श्रुतेष्वामुष्मिकेषु स्वर्गस्वाराज्यादिषु गुणेषु विषयेषु वस्तुदृग्नित्यबुद्धिर्मुक्तो दत्तेनैव स्पृहादिरहितः सदा दान्ताः नियमेन वशीकृता इन्द्रिया-
दयो यस्य प्रशान्ताः कामा यस्य निःस्पृहत्वेनैव संनिहितेषु विषयेषु इच्छा यस्य प्रशान्तकामत्वेनैव संनिहिते विषये न पौनरुक्त्यं स्वयमसुरोऽपि मा-
सर्वासुरभावरहितः ३५ हे राजन् यस्मिन्प्रह्लादे गुणा उत्तमा वक्ष्यमाणाः महत्कविभिर्मुहुर्मुहुर्गृह्यन्ते अधुनापि न तिरोभवन्ति यस्मात् तस्य सर्वं महदिति क्रिया-
विशेषणमन्यथा समानाधिकरणसमासे आन्महदित्यात्वापत्तिः महतः प्रह्लादस्य गुणा इत्यर्थे यस्मिन्नित्यनेन पौनरुक्त्यापत्तिः महतां गुणा इति वा
ते गुणाश्च यथापि न अपिधीयन्ते न तिरोहिता भवन्ति निस्सन्ता भवन्तीति यावत् यथा भगवतीश्वरे गुणाः पुनः पुनः कविभिर्गृह्यन्ते नापिधीयन्ते तद्वत् ॥
३६ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीरामश्रीः ॥

८९

भा०ष०
४९

तद्वृत्रस्य महदद्भुतं च कर्म निरीक्ष्य सर्वे सुरादयः अपूजयन्महो एतस्य पराक्रम इति बहु मन्यंत तथा पुरुहूतस्येंद्रस्य संकटं निरीक्ष्य भृशं हाहेति वि
चुक्रुशुर्भृशमिति संकटविशेषणं वा ५ तत इंद्रः स्वहस्तात् च्युतं अरिसन्निधौ च्युतं वज्रायुधमत एव लज्जितो वज्रं पुनर्न जगृहे न गृहीतवा
न् तमगृहीतवज्रं इंद्रं वृत्र आह अभाषे हर इत्यादिना अमुख्यपराजय इत्यनेन हे हरे इंद्र पुनर्गृहीतवज्रस्त्वं स्वशत्रुं मां जहि अयं विषादकालः
शोककालो न भवति किंतु कुत्रचिदेव कस्मिंश्चिद्देशे काले एव जयो भवतीत्यर्थः तत्र हेतुं वदन् विशिनष्टि परात्मनामिति परः परमपुरु
षः आत्मा अंतः प्रविश्य तत्तत्कर्मानुसारेण नियंता येषां कर्मवश्यत्वात्परमपुरुषनियाम्यत्वाच्च तत्तद्देशकालकर्मानुरूपसुखदुःखादि
फलानुभवाय जयायजयावीश्वरकारितावितिन तत्र लज्जा शोको कर्तव्यो इति भावः सर्वस्य नियंतुः कर्मवश्यस्य परमपुरुषस्य तु सर्व
त्र सर्वदा जय एव भवतीत्याह नेति एकं परमपुरुषं विना अन्येषां पुंसां सर्वदा सर्वत्र जय एव न भवति परमपुरुषस्य तु भवतीत्यन्वयः त

18

वृत्रस्य कर्मातिमहाद्भुतं तत्सुरासुराश्चारणसिद्धसंघाः अपूजयंस्तत्पुरुहूतसंकटं निरीक्ष्य हाहेति विचुक्रुशुर्भृशं ॥ ५ ॥
इंद्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरिसंनिधौ पुनः तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ६ ॥ ॥
युयुत्सतां कुत्रचिदाततायिनां जयः सदैकत्र न वै परात्मनां विनैकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं सनातनं ७

त्र हेतुं वदन् तं विनष्टि जगदुत्पत्तिस्थितिलयानामीश्वरं कर्तारं तदुपयुक्तो गुण उच्यते सर्वज्ञमिति अनेन कर्मसंकुचितज्ञानजीवव्यावृत्तिः
अनेनाकर्मवश्यत्वमप्युक्तं भवति तत्तज्जीवकर्मानुसारेण उत्पत्त्यादिकर्तृत्वात्स्वोत्पत्त्यादिकर्तृत्वविरहादकर्मवश्यत्वाच्च तस्य देशका
लनिमित्तकर्मापेक्षकत्वं न रथयुक्तं जयापजयौ न स्तः किंतु स सर्वदा सर्वत्र जय एवेति भावः यदि जगदुत्पत्त्यादिकर्ता परमपुरुषस्तर्हि किमु
पादानकारणं जगतस्तत्राह आद्यमिति आदौ भवमाद्यं कारणत्वेनावस्थितं उपादानकारणमपि स एवेति भावः लोके यदा घटाद्युपाद
नकारणस्य मृत्तिकादेरपि कारणांतरदर्शनात्कारणस्यापि कारणांतरसंभावनेन आशंकां निराकुर्वन् विशिनष्टि सनातनमिति नित्यमित्यर्थः
तंत्वादिर्हि कार्यमसत्यं सत्तु नित्यः कारणांतररहित इत्यर्थः ६ ॥ ७ ॥ ॥ ॥ नित्यम् ॥ ॥

राम
४९

अत एवमामनुगृहाणेस्यादृ ममेति उत्तमश्लोकस्य तव जनेषु दासेषु एवं मम सख्यं भूयात् तन्मायया आत्मादिष्वासक्तचित्तस्य स्वकर्मभिः संसार
चक्रे भ्रमतो मम पुनः तेष्वात्मादिष्वासक्तिर्न भूयादेवमनुगृहाणेति भावः तत्रात्मा देहः २७ षष्ठे एकादशः एवमभिलषितभगवदेकदास्या
निरयोपमाभिमानविषयैश्वर्यकैवल्यानि हसितस्वकेलेवरो वृत्रो युयुधे इत्याह मुनिः एवमिति हेत्य स्वकलेवरं हातुमिच्छुः रणे एवाजौ युद्धे
विजयान्मृत्युमेव वरं श्रेष्ठं मन्यमानः शूलं गृहीत्वा सुरेन्द्रं मघवन्तं प्रत्यभ्यपतत् अभिमुखमगात् यथा महापुरुषं भगवन्तं प्रति मधुप्रलयोद
के कैटभोऽसुरस्तद्वत् १ ततोऽसुरेन्द्रो वीरो वृत्रः प्रलयकालवह्निवत्कठोरा दुःसहा जिह्वा शिखा यस्य तच्छूलमाविध्य भ्रामयित्वा क्रोधेन मे

ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः त्वन्माययाऽऽत्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् २७ इति श्री
मद्भागवते महापुराणे षष्ठस्कंधे वृत्रवाक्यवर्णनं नामैकादशोऽध्यायः॥११॥ ॥ ॥श्रीशुक उवाच॥ एवं जिहासुर्नृप देहमाजौ
मृत्युं वरं विजयान्मन्यमानः शूलं प्रगृह्याभ्यपतत्सुरेन्द्रं यथा महापुरुषं कैटभोऽप्सु १ ततो युगान्ताग्निकठोरजिह्वमाविध्य
शूलं तरसासुरेन्द्रः क्षिप्त्वा महेन्द्राय विनद्य वीरो हतोऽसि पापेति रुषा जगाद २ ख आपतत्तद्विचलद्ग्रहोल्कवन्निरीक्ष्य दुःप्रेक्ष्य
मजातविक्लवः वज्रेण वज्री शतपर्वणाछिनद्भुजं च तस्योरगराजभोगं ३ छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीत
वज्रं हनौ नताडेंद्रमथामरेभं वज्रं च हस्तान्न्यपतन्मघोनः ४ ॥

हेन्द्राय क्षिप्त्वा विनद्य सिंहनादं कृत्वा हे पाप हतोऽसीति जगाद २ ततो वज्री इन्द्रः खे आकाशे आपतत् आगच्छत् विचलन् परिभ्रमन् ग्रहो
ल्कवत् दुःप्रेक्ष्यं दुर्निरीक्ष्यं च यच्छूलं यद्वा ग्रहोल्का इवेति द्वन्द्वाद्वृत्तिः प्रत्ययं ग्रहः सूर्यः उल्का अंगाराः तैः शूलं तथा तस्य वृत्रस्य उरगराज
भोगं वासुकिदेहाकारं भुजं चाजातविक्लवः अनुद्विग्नधीः सन् शतपर्वाणि यस्य तेन वज्रेणाच्छिनत् अद्भुतं यथा भवति तथेति
क्रियाविशेषणं शूलविशेषणं वा ३ ततो वृत्रः छिन्नः एकः बाहुर्यस्य सः संरब्ध एव संरब्धः नितरां क्रुद्धः गृहीतवज्रमिन्द्रमासाद्य समीप
मागत्य परिघेण आयुधविशेषेण हनौ ताड अथामरेभं ऐरावतं च तताड तस्य मघोनः इन्द्रस्य हस्तात् वज्रमायुधं न्यपतत् द्विगलितमभूत्

एवंकार्यत्वमुक्तमथानीशत्वमाह अविद्वानिति इमं परमपुरुषायत्तोन्मात्मादिमंतं तत्परतंत्रमत एवानीश्वरमात्मानमविद्वानजानन्नीश्वरं मन्यते जन इति शेषः पुरुषः प्रकृतिर्व्यक्तमिति ग्रहिरस्यादौ परमपुरुषस्य प्रयोजककर्तृत्वं प्रकृत्यादीनां तत्कार्याणां प्रयोज्यकर्तृत्वं चोक्तं तदेव प्रपंचयति भूतैरिति स्पर्द्धेन स्वयमात्मना प्रयोजककर्त्रा स्वेनेत्यर्थः भूतैः पृथिव्यादिभिः स्वानुगृहीतैः भूतग्रहणं प्रकृत्यादीनामुपलक्षणं प्रकृत्यादिभिः स्वानुप्रवेशादिशक्तिभिः तानि देवमनुष्यादिव्यष्टिभूतानि सृजति तथा तैरेव भूतैर्भूतानि ग्रसते च व्यष्टिसृष्टेर्द्वारकथनेन व्यष्टिसृष्टेर्द्वारकत्वेन सूचितं अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोदिति श्रुत्यर्थोत्रानुसंधेयः २२ अस्त्वेवं तथापि यः राजितो हं पुनरात्मनो न जयं संभावयामीत्यत्राह आयुरिति हि यस्मादीश्वरायत्ता स्वस्वकर्मानुगुणदेवमनुष्यादिसृष्टिस्तस्मादायुरादयोपि तदायत्ता नियतदेशकालपरिणामकर्मानुगुणाः पुरुषस्य या आशिषस्ताः सर्वास्तत्काले उचितकाले तत्तत्कर्मफलानुभवदशायामित्यर्थः भवंत्येव तत्र दृष्टांतः यथाऽनिच्छोर्मरणादारिद्र्यादिकमनिच्छतोपि पुंसस्तद्विपर्यया ऐश्वर्यादिविपर्ययाः मरणदारिद्र्यापकीर्त्तिप्रभृतयो भवंति तथायुरादयोपीत्यर्थः॥

पु८

अविद्वानिममात्मानं मन्यतेऽनीशमीश्वरं भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयं २२ आयुः श्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्य याः भवंत्येव हि तत्काले यथाऽनिच्छोर्विपर्ययाः २३ तस्मादकीर्तियशसोर्जयापजययोरपि समः स्यात्सुखदुःखाभ्यां मृत्युजीवितयोस्तथा २४ सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः तत्साक्षिणमात्मानं यो वेद न स बध्यते २५ ॥श्री॥श्री॥श्री॥

तत्रायुर्जीवनं श्रीः संपदैश्वर्यं प्रभुत्वं यद्वैश्वर्यसंपत् श्रीस्तेजः भगवत्सहायस्य तेऽधुनाप्यायुरादयो भवेयुरेवेति भावः २३ यत एवं सर्वमीश्वरायत्तं कर्मानुगुणं चातएव न विक्रियेत विवेकीत्याह तस्मादिति यस्मात्सर्वमायुरादिकं ईश्वरायत्तं कर्मानुगुणं विपर्ययवच्च भवति तस्माद्विवेकी कीर्त्यकीर्त्योर्जयपराजययोस्तथा मरणजीवनयोश्च निमित्तयोर्थे सुखदुःखे ताभ्यां कीर्त्यादिनिमित्तसुखादिना विकारं न प्राप्नुयादित्यर्थः २४ (
२४ किंच भगवदुक्तरीत्या मदुक्तरीत्या च मुक्तैः वनिरत्तित्राय पुरुषार्थत्वादनभिसंहितफलसंगकर्तृत्वस्य युद्धादिकर्मणः आयुराद्यानुषंगिकफलप्रापणद्वारा तत्साधनत्वाच्चोक्तविधं युद्धकर्म कुर्वन्नेहावसाने मुक्तोपि भवतीत्याह सत्वमिति सत्वादयो गुणाः नात्मनः जीवस्य किंतु प्रकृतेरेव गुणा इति निर्विवादं तत्र सत्वादिगुणपरिणामरूपे देहे स्थितमात्मानं यः पुमान्साक्षिणं द्रष्टारं मन्यते कर्तृत्वं देहगतं मत्वा आत्मानमकर्तारं मन्यत इत्यर्थः स तु न बध्यते किं तु संसारबंधान्मुच्यत इति भावः २५ ॥ ॥ ॥ ॥

नर्यं कर्मवश्यत्वेन यस्मात्तं अमुक्तं न देवो दाहरण मुखेन प्रपंचयति लोका इति सपालाः पालकैर्ब्रह्मादिभिः सहिताः सर्वे लोकाः विवशाः परमपुरुष वशंगताः यस्य परमपुरुषस्य वशे वश इच्छायां कान्तौ चेति धातुपाठादिच्छायां निमित्तभूतायां श्वसंति स्वतंत्रतां इच्छानिमीनजीवना इत्यर्थः त वकालः कालरूप ईश्वरः ईहजयाजयादिषु कारणं हेतुभूतः ८ न केवलं जयापजययोरेव हेतुरपि तोजआदीनामपि निर्वाहक इत्याह तेऽ जःप्रवृत्तिसामर्थ्यं सहो वेगः बलं धारणसामर्थ्यं प्राणो जीवनममृतं मोक्षः मृत्युः संसारः उंजआदीनृत्तितं परमात्मानं हेतुमज्ञा या विज्ञाय आर्षत्वा त्प्रयोगस्यामंसूर्व इतिन प्रतिषेधः अत्तो ल्मप् परमात्मानमेव मोजआदीनां कारणमज्ञात्वा पर जनः केवलमात्मानं स्वात्मानमेव कारणं मन्य तेऽज्ञोजडोऽज्ञः जन इत्यर्थः जडइति पाठे त्वज्ञे स्वात्मानेएव कारणं मन्यते यं जन इत्यर्थः ९ एवं परमात्मनः जयापजय [illegible] भावे हेतुं यासर्वस्यव तद्य

लोकाः सपाला यस्येमे श्वसंति विवशा वशे द्विजा इव शिचा बद्धाः स काल इह कारणं ८ ओजः सहो बलं प्राणममृतं मृत्युमेव च त मज्ञाय जनो हेतुमात्मानं मन्यते जडः ९ यथा दारुमयी नारी यथा यंत्रमयो मृगः एवं भूतानि मघवन्नीशतंत्राणि विद्धि भो १० पुरुषः प्रकृतिर्व्यक्तमात्मभूतेंद्रियाशयाः शक्नुवंत्यस्य सर्गादौ न विना यदनुग्रहात् ११ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥ श्री

विद्धीति पाठांतरं

शीलं कारणत्वं चोक्तमथ जीवस्य तद्विपर्ययमाह यथेति सार्द्धद्वयेन हे मघवन्न भो इंद्र विभो परमात्मन् इत्यादं संबोधनं दारुमयी दारु तो विकारभूता नारी यंत्रमयः यंत्रबलादागतः यंत्रेण गृहीतो मृग इत्यर्थः यथा पुरुषतंत्रः आधमप्राणि दृष्टांता भिप्रायके द्वितीयं पाठे तिगणत्वात् एवं जीवस्य पारतंत्र्यमुक्तं १० पुरुषः जीवः प्रकृतिः प्रधानं चित्तसमष्टिसंस्थ हमचेतनं व्यक्तं महत्तत्त्वमात्माऽहंकारः भूतान्याकाशादीनि इंद्रियाणि ज्ञानकर्मेन्द्रियात्मकानि दशेंद्रियाण्याशयाः अन्तःकरणं एते यस्य भगवतोऽनुग्रहाद्विना तदनुप्रवेशा दिग्रहणं दृष्टांतार्थं यथा प्रकृत्यादयोऽस्य सर्गादौ न शक्नुवंति तथा पुरुषश्चतुर्मुखादिर्जीवोऽपि तदनुग्रहं विना सर्गादौ न शक्नोतीति तत्का र्यत्वादित्यर्थः ११

नुप्राणि दृष्टं तानि प्रायके इति वेदितव्यं एवं तथा सर्वाणि भूतानीश्वरतंत्राणीश्वरतंत्राणि वेत्यर्थः वद्धित्व्ययमिक्कार्थके चादे

विद्धीति पाठांतरं

स्वानुग्रह मे तरेणास्य विश्वस्य सर्गादौ उत्पत्तिस्थितिलयेषु न शक्नुवंति न प्रभवंति एषो परमपुरुष कार्यत्वादिति भावः प्रकृत्या

भा०ष०
५२

किंचेदं महदाश्चर्यं खलु किं तत् यद्रजः प्रकृतेः राजसस्वभावस्य तव सर्वात्मनिष्ठा गुणपूर्णे वासुदेवे निश्चयमतिर्व्यवस्थितेति यत् २१ अत एव न
त्वैश्वर्यकैवल्यादिषु मतिरित्याह यस्येति निःश्रेयसेश्वरे मोक्षाधिपतौ अमाश्रितानां संसृतिं वधहारिणी भगवति यस्य पुंसो [illegible] भक्तिस्तस्या
मृताम्भोधौ ब्रह्मानन्दसमुद्रे विक्रीडतः विहरतः पुंसः क्षुद्रैः स्वल्पैः खातकोदकैर्गर्तोदकतुल्यैरैश्वर्यकैवल्यादिसुखैः किं तानि न त्वचुष्ठानीति भा
वः २२ एवं परस्परं ब्रुवाणौ इन्द्रवृत्रौ युयुधातुरित्याह मुनिः श्रीशुक धर्मजिज्ञासया भगवद्धर्मविचारेण तत्पूर्वकमित्यर्थः एवं भाषमाणौ युधां
योधं एणं पतीमुख्यौ अपारवीर्यौ इन्द्रवृत्रौ हे नृप युयुधाते युद्धं कृतवन्तौ २३ तदेवाह आविध्येति अरिंदम वृत्रः कार्ष्णायसं कृष्णलोहमयं
घोरं परिघं वामहस्तेन आविध्य भ्रामयित्वा इन्द्राय प्राहिणोत् प्रचिक्षेप हे मारिष श्रेष्ठ राजन् २४ स इन्द्रस्तु तदेव वृत्रस्य परिघं करभोपमं

खल्विदं महदाश्चर्यं यद्रजःप्रकृतेस्तव वासुदेवे भगवति सत्त्वात्मनि दृढा मतिः २१ यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे वि
क्रीडतोऽमृताम्भोधौ किं क्षुद्रैः खातकोदकैः २२ श्रीशुक उवाच ॥ इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप युयुधाते महावीर्याविन्द्र
वृत्रौ युधाम्पती २३ आविध्य परिघं वृत्रः कार्ष्णायसमरिन्दम इन्द्राय प्राहिणोद्घोरं वामहस्तेन मारिष २४ स तु वृत्रस्य परिघं क
रं च करभोपमं चिच्छेद युगपद्देवो वज्रेण शतपर्वणा २५ दोर्भ्यामुत्कृत्तमूलाभ्यां बभौ रक्तस्रवोऽसुरः छिन्नपक्षो यथा गोत्रः
खाद्भ्रष्टो वज्रिणा हतः २६ कृत्वाधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुं नभोगंभीरवक्त्रेण लेलिहोल्बणजिह्वया २७ दंष्ट्राभिः काल
कल्पाभिर्ग्रसन्निव जगत्त्रयं अतिमात्रमहाकाय आक्षिपंस्तरसा गिरीन् २८ गिरिराट् पादचारीव पद्भ्यां निर्जरयन्महीं ज
ग्रास स समासाद्य वज्रिणं सहवाहनं महाप्राणो महावीर्यो महासर्प इव द्विपं २९ ॥ गजशुण्डतुल्यं करं वामहस्तं च युगपद्देवः शत

२०

त२

पर्वणा वज्रेण चिच्छेद छिन्नवान् २५ उत्कृत्तं छिन्नं मूलं ययोस्ताभ्यां बाहुभ्यां रक्तं स्रवतीति रक्तस्रवो वृत्रः बभौ रराज यथा गिरिर्वज्रिणा
इन्द्रेण छिन्नौ पक्षौ यस्य तादृशः खात् आकाशात् भ्रष्टो गलितो हतः स शोभितो बभौ २६ स दैत्यो वृत्रः अधरां हनुं भूमौ उत्तरां हनुं दिवि कृत्वा नि
धाय घनगम्भीरेण वक्त्रेण लेलिहः सर्पः पुनः पुनरतिशयेन वा लेढि लेलिहः उग्र जंतास्य चाघ्नच्च तद्वद्रूवया क्रूरया जिह्वया सवाहनं ऐरा
वतसहितं इन्द्रं आसाद्य तं प्राप्य जग्रास निगीर्णवान् कथंभूतः सन् पादचारी पर्वतराज इव पद्भ्यां महीं निर्जरयं चूर्णयन् अङ्घ्रिभ्यां गिरीनाक्षिपन् महीं
निर्जरयं चेतिवाम्वयः महाप्राणो अतिबलः [illegible] २७ २८ २९

राम
५२

रा२ ५२

अस्मिन्नर्थे मामेव दृष्टान्तभूतं पश्येत्याह पश्येति हे शक्र मृधे युद्धे वृक्णं छिन्नमायुधं त्रिशूलं भुजश्च यस्य तं निर्जितं पराजितमपि पुनः
त्वव प्राणान्हर्तुमिच्छया यथाशक्ति घटमानं यतमानं युयुत्सुं मां पश्य २६ हे ... यदि नूनं मम जयो भवेत्तर्हि योत्स्यामी त्यत्रो कमानं इति
नि२ वदन्समरं द्यूतत्वेन रूपयति प्राणग्लह इति ग्लहते इति ग्लहः जितेन ग्रस्यमाणाः पणः प्राणा एव ग्लहो पस्मिन्निति वाहनानि हस्त्यश्वरथा
दीन्येवासनानि आसंते त्विति यंते इत तत्र आस्तंत इत्यासनानि फलकाः यस्मिन्निषवः शरा एव अक्षाः देवनाद्या यस्मिन्सोयं द्यूतसदृशः संग्रा
मः अत्र द्यूततुल्ये संग्रामे कस्य जयः कस्य पराजय इति न ज्ञायते द्यूत इव जय पराजयौ तावत् दुर्ज्ञेयौ इत्यर्थः इदं तु लोकदृष्ट्योक्तं मयान्ने

पश्य मां निर्जितं शत्रु वृक्णायुधभुजं मृधे घटमानं यथाशक्ति तव प्राणजिहीर्षया २६ प्राणग्लहोयं समर इष्वक्षो वाहनासनः
अत्र न ज्ञायतेमुष्य जयोमुष्य पराजयः २७ श्रीशुक उवाच इंद्रो वृत्रवचः श्रुत्वा गतालीकमपूजयत् गृहीतवज्रः प्रहसंस्त
माह गतविस्मयः २८ इंद्र उवाच ॥ अहो दानव सिद्धोसि यस्य ते मतिरीदृशी भक्तः सर्वात्मनात्मानं सुहृदं जगदीश्वरं २९
भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीं यद्विहायासुरं भावं महापुरुषतां गतः ३० ॥ ॥श्रीरामचंद्रायनमः॥ श्री॥ ॥

भगवत्संतं यस्य तव जय एव निश्चित इति भावः २७ एवं तत्कथनेन युद्धाय प्रोत्साहितः उपात्तवज्रः शक्रः तमाहेत्याह मुनिः इंद्र इति
गतालीकं निष्कपटं वृत्रस्य वचः श्रुत्वा पूजयद्बहुमन्यत वज्रायुधः शक्रो विगतविस्मयः ज्ञानिनामियं रीतिरित्याश्चर्यरहितः प्रहसन्सा
वधानेन स्ववचः समाकर्णनाय प्रहसंस्तं वृत्रमुवाच २८ उक्तमेवाह अहो इत्यादिना श्लोकद्वयेन हे दानव त्वं ... सिद्धो
सि कृतकृत्योसि सिद्धोसि इति कथं तत्राह यस्य ते तव ईदृशी मतिर्वर्तते किंच सिद्धत्वापादकान्याह भक्तोसि एव सात्वतवासी
त्याह भक्त इति त्वं सर्वात्मना पायो यादिभावेन जगदीश्वरमंतरात्मानमत एव सुहृदं निरतिशयं भगवंतं भक्त्याश्रितवानसि एवं सेवि — प्रियं२
तवान् २९ किंच जगन्मोहयतीति तां वैष्णवीं मायां भवानतार्षीत् कुतः यद्यस्मात् त्वं आसुरं भावं तामसत्वं विहाय महापुरुषतां स
ख्यं ... तां इति यावत् गतः प्राप्तवानसि ३०

वृत्रेण ग्रस्तं तमिंद्रमालक्ष्य दृष्ट्वा ब्रह्मादिभिर्महर्षिभिश्च सहिताः सर्वे सुराः हा हा इंद्रस्य कष्टं प्राप्तं इति निर्विण्णाश्चिंताक्रांताश्चुक्रुशुः ३०
असुरेंद्रेण वृत्रेण निगीर्णोपींद्रो न ममार उदरं गतः किं तु दरं अविशत् महापुरुषेण भगवता सन्नद्धो रक्षितः महापुरुषेण नारायणकवचा
त्मकेन संनद्धो दंशितो वा भगवन्मायाबलेन योगमायाबलोपबृंहितेनेत्यर्थः ३१ वज्रेण तस्य वृत्रस्य कुक्षिं भित्वा विभुर्बलभिदिंद्रः ।
बहिर्निर्गत्य शत्रोर्वृत्रस्य शिरः पर्वतस्य शृंगं इव उच्चकर्त चिच्छेद ३२ कियता कालेन चिच्छेदेत्यत्राह वज्रस्त्विति आशुवेगस्तीक्ष्ण
धारो वज्रो वज्रायुधं तस्य कंधरं कंठं पुनस्तमार्ष समंतात् कंधरायाः अभितः परिवर्तमानः कृंतन् छिंदन् वार्त्रहत्ये वृत्रहत्यासंबंधिनि
ज्योतिषामयने संवत्सरे योन्हां षष्ठ्युत्तरत्रिशतसंख्याकानां गणः तेन तावता कालेनेत्यर्थः न्यपातयत् शिरो भूमौ पातितवानित्यर्थः

वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः ३० निगीर्णोप्यसुरेंद्रेण न ममारोदरं गतः महा
पुरुषसन्नद्धो योगमायाबलेन च ३१ भित्वा वज्रेण तत्कुक्षिं निष्क्रम्य बलभिद्विभुः उच्चकर्त शिरः शत्रोर्गिरिः शृंगमिवौजसा ३
२ वज्रस्तु तत्कंधरमाशुवेगः कृंतन् समंतात्परिवर्तमानः न्यपातयत्तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये ३३ तदा च खे
दुंदुभयो विनेदुर्गंधर्वसिद्धाः समहर्षिसंघाः वार्त्रघ्नलिंगैस्तमभिष्टुवाना मंत्रैर्मुदा कुसुमैरभ्यवर्षन् ३४ वृत्रस्य देहान्निःक्रां
तमात्मज्योतिररिंदम पश्यतां सर्वलोकानामलोकं समपद्यत ३५ इति श्रीभागवते महापुराणे षष्ठस्कंधे वृत्रवधो नाम
द्वादशोध्यायः ॥१२॥ श्रीशुक उवाच ॥ वृत्रे हते त्रयो लोका विना शक्रेण भूरिद सपाला ह्यभवन्सद्यो विज्वरा निर्वृतेंद्रियाः १ ।

८२

ज्योतिषां सूर्यादीनामयनं दक्षिणोत्तरगतिः तदात्मके संवत्सरे इत्यर्थः वार्त्रहत्ये इत्यनेन संवत्सरसंबंधित्वं वृत्रहत्यायाः सूचितं ३३ तदाव
त्र शिरश्छेदनानंतरं खे दिवि दुंदुभयो ध्वनुः महर्षीणां संघैः सहिता गंधर्वसिद्धाश्च वार्त्रघ्नलिंगैर्वृत्रहंतुरिंद्रस्य प्रकाशकैर्मंत्रैस्तं इंद्रमभितः
स्तुवंतः मुदा हर्षेण कुसुमैरभ्यवर्षन् ३४ हे अरिंदम वृत्रस्य देहान्निर्गतमात्मज्योतिः स्वप्रकाशरूप आत्मा सर्वलोकानां पश्यतामलोकं
प्राकृतलोकविलक्षणं श्रीवैकुंठं समपद्यत स्वंलोकं इति पाठे मुक्तानां स्वतः प्राप्तं स्थानमित्यर्थः ३५ षष्ठे द्वादशः ॥ एवं वृत्रवधेन स
र्वे निर्वृतास्सर्वलोका न त्विंद्र इत्याह मुनिः वृत्र इति द्वाभ्यां हे भूरिद एवं वृत्रे हते सति शक्रं विना सर्वैः लोकपालैः सहिताः लोकाः सद्य एव
विज्वराः दुःखरहिताः सुखितेंद्रियाश्चाभवन् १

देवर्ष्यादयः स्वयंस्व स्वस्थानानि प्रतिययुः २ यदुक्तं पश्चके ण विना सर्वे लोका विज्वरा निर्वृतेंद्रियाः अभवन्निति तत्रेंद्रस्यानिर्वृतौ च कारणं पृ
च्छति राजा इंद्रस्येति हे महामुने इंद्रस्यानिर्वृतौ कारणं श्रोतुमिच्छामि वृत्रवधाद्देवानि चेत्तर्हि तेनैव देवानामप्यनिर्वृतिर्भवेदिदं तु कुतः देवानां
निर्वृतिरिंद्रस्य च दुःखमिति पृच्छति येन वृत्रवधरूपेण हेतुना देवाः सुखिनः आसन् यस्माद्देवाः सुखिनः आसन् तस्मादेव हेतोरिंद्रेणापि
सुखिना भवितव्यं कुतः कस्माद्धेतो हरेरिंद्रस्य दुःखमभूदित्यर्थः ३ एवं पृष्टे मुनिरिंद्रस्यानिर्वृतो देवानां निर्वृतौ च हेतुं वक्तुं तावद्वृत्तेस्य वधो
द्योगकालिकं देवानां वृत्तांतमाह मुनिः वृत्रेत्यादिना यावदध्यायसमाप्तिः वृत्रस्य पराक्रमेण भीताः सर्वे देवा ऋषिभिः सह वृत्रवधार्थमिंद्रं प्रा
 र्थयं प्रार्थयंत परस्मै परमार्थं एवं प्रार्थितोपीद्रोवरुद्ध धर्मो ब्रह्मवधात्पूर्वं कृताद्विश्वरूपवधात्क रिष्यमाणवृत्रवधाद्वाभीतः सन्नैच्छत्॥
४ एतदिंद्रोक्तिमुखेन विशदयति स्त्रीति विश्वरूपवधोद्भवमेनःपापं मामनुगृह्णद्भिः स्त्रीभूमिजलद्रुमैश्चतुर्भिर्विभक्तं विभज्य गृहीतमधु

देवर्षिपितृभूतानि दैत्या देवानुगाः स्वयं प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेंद्रादयस्ततः २ राजोवाच॥ इंद्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छा
मि भो मुने येनासन्सुखिनो देवा हरेर्दुःखं कुतोभवत् ३ शुक उवाच वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः तद्वधायार्थयन्निं
द्रं नैच्छद्भीतो बृहद्वधात् ४ इंद्र उवाच स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवं विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व माज्म्यहं ५ शुक उ०
ऋषयस्तदुपाकर्ण्य महेंद्रमिदमब्रुवन् याजयिष्याम भद्रं ते हयमेधेन मा स्म भैः ६ हयमेधेन पुरुषं परमात्मानमीश्वरं इष्ट्वा नारा
यणं देवं मोक्ष्यसेपि जगद्वधात् ७ ॥

नावत्रहत्यां क्व कुत्र मार्ज्मि संशोधये यं वृत्रहत्योद्भवं पापं क्षालयिष्यामीत्याह शुद्धो भवेयं न क्षालयितुं तेन हन्यामीत्यर्थः ५ एवमिंद्रेणोक्ता ऋषय
स्तं प्रत्यूचुरित्याह मुनिः तदिंद्रवचउपाकर्ण्य श्रुत्वा महेंद्रं प्रतीदं वक्ष्यमाणं वाक्यमब्रुवन् ऋषीणामुक्तिमेवाह याजयिष्याम इत्यादि
ना रवलेनिगृहेण त्वं तेन हयमेधेनाश्वमेधेन यागेन करणेन त्वया कर्त्रा वयं याजयिष्यामः भगवंतमिति शेषः त्वं मास्म भैर्भयं मा कार्षीः
ते तव भद्रमेव भविष्यति ६ नन्वश्वमेधमात्रेण मत्यापं कथं निवर्तिष्यत इति तत्र कमानं प्रत्याहुः हयमेधेनेति परमात्मानं लोक
त्रयमंतः प्रविश्य भर्तारमीश्वरं सर्वस्य प्रशासितारं स्वतेजसा दीप्यमानं परमपुरुषं नारायणं हयमेधेनेष्ट्वाराध्य कृत्स्नजगद्वधा
दपि पापान्मोक्ष्यसे किमुत वृत्रवधनिमित्तात्पापान्मोक्ष्यस इत्यर्थः ७ ॥ ॥ ॥ ॥श्री॥

पलितान्केशान्विकीर्य क्व गच्छसि तिष्ठ तिष्ठेति भाषमाणां मीनस्येव गंधो यस्य स मीनगंधिः स चासावसुगंधः प्राणवायुः तस्य गंधेन मार्गदूष
णं कुर्वती १३ ततः सहस्राक्षः इंद्रः नभः सर्वा दिशश्च गतः भ्रामयन् क्वापि विश्रांतिमलभमानः इत्यर्थः प्रागुदीचीं ऐशानीं दिशं तत्रापि पि२
भा०ष० सं२ मानसरः प्रविष्टः स इंद्रः १४ पुष्करनालतंतून्मानससरोवरस्य कमलनालतंतून् आवसत् सूक्ष्मरूपेण प्रविष्टो वासेत्यर्थः कथंभूतः न लब्धो
५३ यज्ञियभागो येन तादृशः कुतः यस्मात्स्वयमग्निदूतः अग्निरेव दूतः हविर्भागप्रापको यस्य तादृशः स्वदूतस्याग्नेर्हविर्भागप्रापकस्य
जले प्रवेशाभावादलब्धभाग इत्यर्थः अंतः पद्मनालस्यांतः अलक्षितः ब्रह्महत्यायाः इहेः ब्रह्मवधनिमित्तात्पापान्मोक्षं मोक्षोपायं
चिंतयन्सहस्रं वर्षाण्यवसदित्यन्वयः १५ यावदिंद्रः पद्मनालतंतूनावसत्तावन्नहुषो राजा विद्यातपोयोगैर्महानुभावः इंद्राधिपत्य

विकीर्य पलितान्केशांस्तिष्ठ तिष्ठेति भाषिणीं मीनगंध्यसुगंधेन कुर्वतीं मार्गदूषणं १३ नभोगतो दिशः
सर्वाः सहस्राक्षो विशांपते प्रागुदीचीं दिशं तूर्णं प्रविष्टो नृप मानसं १४ स आवसत्पुष्करनालतंतूनलब्ध
भागो यदिहाग्निदूतः वर्षाणि साहस्रमलक्षितोंतः स चिंतयन्ब्रह्मवधाद्विमोक्षं १५ तावत्त्रिनाकं नहु
षः शशास विद्यातपोयोगमहानुभावः स संपदैश्वर्यमदांधबुद्धिर्नीतस्तिरश्चां गतिमिंद्रपत्न्या १६ ॥१

९२

प्रापकं सामर्थ्यं यस्य तादृशः त्रिनाकं स्वर्गं शशास इंद्रलोकाधिपत्यं कृतवानित्यर्थः अकं दुःखं न विद्यते यस्मिन्स नाकः भोगदेशः भौमपाता
लांतरिक्षभेदेन त्रिविधाः सुखानुभवदेशाः तत्र तृतीयो नाकः स्वर्लोकः तर्हि तस्मिन्सति कथमिंद्रस्य पुनः स्वर्गप्राप्तिस्तत्राह स नहुषः
संपदैश्वर्याभ्यां भोग्यभोगोपकरणादिसमृद्धिद्वाधिपत्याभ्यां यो मदस्तेनांधा अविवेकप्रमा बुद्धिर्मतिर्यस्य तादृशः इंद्रपत्न्या शच्या हेतुभूत
या तिरश्चां गतिं सर्पयोनिं नीतः प्रापितः अत्रेदमाख्यानमवगंतव्यं स्वर्गाधिपत्यं कुर्वन्नहुषः कदाचिदिंद्राणीमुवाच इंद्रस्त्वावदहमतस्त्वं मां
भजेति तत्सया वेदितवृत्तांतो बृहस्पतिस्तामुवाच इंद्रवदृषिवाह्यशिबिकामारुह्य मद्गृहान्नागच्छसि चेत्तर्हि त्वां भजिष्यामीति ब्रूहि ततोसौ राम
ब्रह्मशापात्पतिष्यतीति ततः सा तं तथैवोवाच ततः स नहुषोऽगस्त्यादिऋषीन्बलादानीय स्वेनारूढां शिबिकां तैर्वाहयामास तदा सत्व ५३
घ्नं सर्प सर्पेति गत्संपदायस्पर्शत्तेन च सर्पो भवेति शापितो[illegible] महासर्पो जगामेति १६ ॥

नाम्नोस्य यावती शक्तिः पापनिर्दहने हरेः तावत्कर्तुं न शक्नोति पातकं पातकी नरः इत्युक्तरीत्यास्मरणमात्रमहापातकनिवर्तनशील
त्वादित्यस्य महामहिम्नः शालिनं तन्नाम्नो भगवतः साक्षादाराधनेन धर्मप्रतिपक्षं त्वष्ट्रवधमात्रनिमित्तपापेन निवर्तते किमिति स्मिप्रायेण
पुरुषं परमात्मानमभिसाधनेकनाम्नामुपादानं एतद्देवविप्रादमाहुः ब्रह्महेति द्वाभ्यां यस्य भगवतो नाम्नः कीर्तनादेव ब्रह्महत्याद
यः शुध्येरन् श्वादः श्वपाकः पुल्कसः पापजातिः ८ तं महामहिमशालिनमनन्तनामानं भगवन्तमस्माभिरनुष्ठितेनानुष्ठापितेन महा
यागेनास्मद्वाक्यमात्रविस्रंभयुक्तः स्वं ब्रह्मणः शरीरम् तच्च चराचरात्मकं जगद्धत्वापि पापेन न लिप्यसे किं खलस्य दुरात्मनो वृत्र
स्य निग्रहे एव वधप्रयुक्तेन पापेन न लिप्यसे किं न लिप्यस एवेत्यर्थः ९ एवं विप्रैः संचोदितः शक्रस्ततो वृत्रं जघान स च तद्वधनिमि
त्तेन पापेन दुःखितश्चाभूदित्याह मुनिः एवमिति एवं विप्रैर्ऋषिभिः संचोदितः प्रेरितः संबोधितः तदित्याठ सम्यग्बोधितः मरुत्वा।

ब्रह्महा पितृहा गोघ्नो मातृहाचार्यहाघवान् श्वादः पुल्कसको वापि शुध्येरन् यस्य कीर्तनात् ८ तमश्वमेधेन महामखेन श्रद्धा
न्वितोस्माभिरनुष्ठितेन हत्वापि सब्रह्मचराचरं त्वं न लिप्यसे किं खलनिग्रहेण ९ श्रुकउवाच॥ एवं संचोदितो विप्रैर्मरुत्वानहन
द्रिपुं ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिं १० तयेन्द्रः स्मासहत्तापं निर्वृतिर्नामुमाविशत् ह्रीमन्तं वाच्यतां प्राप्तं सुखयन्त्यपि
नो गुणाः ११ तां ददर्शानुधावन्तीं चाण्डालीमिव रूपिणीं जरया वेपमानाङ्गीं यक्ष्मग्रस्तामसृक्पटां १२॥ ॥श्री॥ ॥श्री॥

निंद्रो रिपुं वृत्रमहन् हतवान् तस्मिन्वृत्रे हते सति ब्रह्महत्या वृत्रस्य ब्राह्मणत्वाद्ब्रह्महत्या समुद्भूता वृषाकपिमिंद्रमाससाद व्याप्तवती न १० तयादेवादिभिः
कारितया ब्रह्महत्यया पासेन च धारणे इन्द्र एव तापमसहत् सहते नान्यस्तत्तः अमुमिन्द्रं निर्वृतिः सुखेन नाविशत् इन्द्रः सुखी नाभूत् किं तु दुःखमेव प्रा
येत्यर्थः ननु धैर्यादिगुणयुक्तस्य कुतो न निर्वृतिः [illegible] तत्राह ह्रीमन्तं लज्जावन्तं वाच्यतां निन्द्यतां प्राप्तं गुणा धैर्यादयो न सु
खयन्ति हि हि शब्देन लोकप्रसिद्धिः प्रदर्श्यते ११ एवमिन्द्रस्यानिर्वृतिकारणमभिधाय ब्रह्महत्याया तत्तापनिसाम्यप्रकारं वक्ष्यमाणं तत्तापनिमित्त
दुःखानुभवप्रकारमाह तामिति ततस्तां स इन्द्रो ददर्श कथंभूतां नाम नु स्वस्य पृष्ठतो धावन्तीं चण्डालीमिव तद्वर्णेन स्थितां रूपिणीं मूर्ति
मतीं जरया वेपमानानि शिरः पाण्याद्यङ्गानि यस्यास्तां यक्ष्मरोगग्रस्तामसृक् पटो रजो रक्तवस्त्रा १२ ॥श्रीगुरुदेवेनमः॥ श्री

भा०ष० त
५४

किंचेंद्रियं इंद्रस्य लिंगं इंद्रः प्रत्यगात्मा तस्य लिंगं ज्ञापकं तद्द्वीयात्मप्रतिपादनपुक्तत्वादस्येति भावः यद्वा इंद्रस्येदमिंद्रियं इंद्रलिंगमिति स
त्रेण तिकरणादर्थांतरे पिति त्रिपात्तमाप्नुयममाद यद्वाइंद्रियशास्त्रहत्वसंपादके उपचारि इतीते इंद्रियरहितकरमित्यर्थः यद्वा इं
द्रः परमेश्वरः इदि परमैश्वर्ये इति धातुपाठात्तेन जुष्टं धीति विषयत्वेन परिगृहीतं श्रवणादिद्वारा भगवत्प्रीत्यापादकमित्यर्थः ध
नं धनप्राप्तिसाधनं यशस्करं निखिलानामघानां मोचकं यस्मात्तथाःशेषपाप्मनां प्रक्षालनं इत्यनेन पापविनाशकत्वमुक्तं अखि
लाघमोचनमित्यनेन तु वा पाश्लेषकरत्वमुक्तं भगवत्यतोनयोनरूक्तं स्वस्त्ययनं मंगलावहं तथा पुष्करं सर्वाण्येतानि फलानि तस्या
ख्यानस्य श्रवणपठनादिना भवंतिन स्वरूपेणेत्यतो वस्तुंपं मुक्तिफलार्थिभिरेतदाख्यानपठनादिकं कार्यं इत्युक्तं पठेयुरित्यर्द्धेन यत
इत्युक्तं फलमथोगतोवुधाःसदापठेयुः पर्वणि पर्वणि प्रतिपर्व प्रपवंतित्यर्थः २३ षष्ठे त्रयोदशः ॥ अहंसमाधायमनोयथाहसं

२३

पठेपुराख्यानमिदंसदावुधाः अपवंत्यथोपर्वणिपर्वणींद्रियं धन्यंयशस्यंनिखिलाघमोचनंमहेंद्रमोदंविजयंमरुत्वतः २३॥
इति श्रीभागवते महापुराणे षष्ठस्कंधे त्रयोदशोध्यायः ॥१३॥ परीक्षितउवाच ॥ रजस्तमःस्वभावस्यब्रह्मन्वृत्रस्यपाप्मनः ।
नारायणेभगवतिकथमासीतदृढामतिः १ देवानांशुद्धसत्वानामृषीणांचामलात्मनां भक्तिर्मुकुंदचरणेनप्रायेणोपजायते
२ रजोभिःसमसंख्याताःपार्थिवैरिहजंतवः तेषांयेकेचनेहंतेश्रेयोवैमनुजादयः ३ ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

कर्षणं सत्वचरणारविंदे इत्यनेन वृत्रवाक्येन तस्य संकर्षणोपदेशावगतपरमात्माद्विद्याध्यात्मत्वमुक्तं तदेव विस्तरेण शुश्रुषुः पृच्छति रजस्त
म इत्यादिना सह स्वात्ममतो षय दिस्यं तेन हे ब्रह्मन्नरजस्तमः स्वभावो यस्मात्तएव याप्मनः पापकारिणः असुरत्वादिति भावः भगवति
नारायणे दृढा निश्चला सिद्धिपर्यंता मतिर्भक्तिः हे महामुने कथमासीत्सदुपदेशो ह्यासुरस्वभावस्य सिद्धिपर्यंता भक्तिर्दुर्लभेति भावः १ भक्ते
र्दौर्लभ्यमेव प्रपंचयति शुद्धसत्वानां केवलसत्वप्रचुराणां देवानां तादृशामलचित्तानामृषीणामेव प्रायशो मुकुंदचरणे भक्तिर्न जायते ते
षामपि दुर्लभा कथमस्य संजातेति भावः २ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्वतः इत्युक्तरी
त्या तावत्पार्थिवा रजोभिरेणुभिः सह सं. संख्याता जंतवः तेषां जंतूनां ये केचमनुष्यादयः एव शास्त्रोक्ताधिकारिणः तावन्मनुष्यादिजन्म दु
र्लभमेवेति भावः ३॥

राम
५४

ततः इंद्रः स्वर्गगतः प्राप्तः कथंभूतः ब्रह्मगिरा ब्राह्मणवाक्येन उपहूतः सन् ऋतंभरः सत्यस्य भर्त्ता श्रीमन्नारायणः तस्य ध्यानेन निवारितमघं हत्या-
रूपं यस्य तादृशः तमागच्छंतं दिग्देवतया प्रागुदग्दिक्स्थितमानसरोवरस्य पद्मस्य या विष्णुपत्न्या श्रीमहालक्ष्म्या वितं पद्मतंतुषु वसंतं इंद्रम्।
न एव हत ओजो बलं यस्य तादृशः पापो ब्रह्मवधः नाभ्यभूत् यस्मात् लक्ष्मीर्भगवद्ध्यानपरत्वादिंद्रं पापाद्ररक्षेत्यर्थः १७ अथ हत्यानिस्तार-
प्रकारमाह तमित्यादिना विधूतपाप इत्यंतेन तमागतं इंद्रमृषयोऽभ्येत्यागत्य हे भारत पुरुषाराधनरूपेण हयमेधेन यथाविधि दीक्षयां-
चक्रुः हयमेधं कर्तुं दीक्षितं कृतवंत इत्यर्थः हेति हर्षे देवा हो इंद्रस्यैवंविधावस्थेति १८ अथ ब्रह्मवादिभिर्वेदवादिभिर्ऋषिभिराहि-
तेनैर्वितते विस्तृते क्रियमाणेऽश्वमेधे इंद्रेण यजमानेन सर्वदेवतानामंतरात्मभूते सर्वस्य द्रष्टा सति हरि परमपुरुषे इज्यमाने आ-

ततो गतो ब्रह्मगिरोपहूत ऋतंभरध्याननिवारिताघः पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवितं विष्णुपत्न्या १७ तं च ब्र-
ह्मर्षयोऽभ्येत्य हयमेधेन भारत यथावद्दीक्षयांचक्रुः पुरुषाराधनेन ह १८ अथेज्यमाने पुरुषे सर्वदेवमयात्मनि अश्वमे-
धे महेंद्रेण वितते ब्रह्मवादिभिः १९ स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप नीतस्तेनैव शून्याय नीहार इव भानुना २० स
वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः इष्ट्वाधियज्ञं पुरुषं पुराणमिंद्रो महानास विधूतपापः २१ इदं महा-
ख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्त्तनं भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेंद्रमोक्षं विजयं मरुत्वतः २२ ॥

राध्यमाने सति १९ भूयानपि स त्वाष्ट्रवधः वृत्रवधनिमित्तः पापसमूहः हे परंतप तेनैवाश्वमेधेन शून्याय नीतः प्रापितः अस्ततां प्राप्त इत्यर्थः।
यथा भानुना सूर्येण नीहारः अस्ततां प्राप्यते तद्वत् २० मरीचिमिश्रैः मरीचिसहितैः तत्प्रभृतिभिरित्यर्थः वितायमानेनानुष्ठीयमानेन यथोक्तेन हय-
मेधेनाधियज्ञं यज्ञेषु प्रधानतया वर्तमानं पुराणं पुरुषं इष्ट्वाराध्य स वै इंद्रः विधूतं निरस्तं वृत्रहत्यारूपं पापं येन तादृशः महान् निःप्रतिपक्षः आ-
वाप्तराज्यसंपच्चासीत् २१ उक्तं वृत्रवधाख्यानपठनश्रवणादिफलं वदन् तद्विशिनष्टि द्वाभ्यां इदमिति महेंद्रस्य मोक्षः ब्रह्मवधनिमित्ता-
त्पापान्मोक्षप्रतिपादनमस्मिन् मरुत्वत इंद्रस्य विशेषेण जयं तत्प्रतिपादनं यस्मिन् तादृशं तदिदं महाख्यानं गुणवत्तरं तदेवाह अशेषाणां
पापानां प्रक्षालनं शोधकं निवर्तकं तत्र हेतुस्तीर्थपदस्यानुकीर्तनं यस्मिं तादृशः किंच भक्त्युच्छ्रयं भगवद्भक्तेरुच्छ्रयोऽभिवृद्धिर्यस्मात्।
तथाभूतं तत्र भक्तजनानां भगवद्भक्तजनानामनुवर्णनं यस्मिंस्तत् २२ ॥

भा०प्र०
५५

तदेवेतिहासमाह आसीदित्यादिना हे नृप इंद्रे ण्यहतो योरन्न: सपूर्वस्मिन् जन्मनि चित्रकेतुरितिप्रसिद्ध: सार्वभौम: कृत्स्नभूमेरधिपतिः शू
रसेनेषु जनपदेष्वासीत् तं विशिनष्टि यस्य चित्रकेतोरियं महीकामधुक् कामं तद्दति कामा इष्टार्थास्तान् दोग्धि प्रपूरयतीति तथासी
त् २० तस्य चित्रकेतोर्भार्यासहस्राणां दश सहस्राण्यभवन् कोटिसंख्याका भार्या अभवन्नित्यर्थ: स चनृपश्चित्रकेतु: सांतानिक: सं
तानार्थी पितासु भार्यासु संततिं प्रजां न लेभे न प्राप्तवान् यद्वा सांतानिक: स्वयं संतानार्हो पि पुत्रोत्पादनशक्तिमानपि तासु संततिं न
लेभे सर्वास्ता एव दैवयोगेनोद्वाहिता इतिभाव: २१ रूपादिभि: सर्वैर्गुणैर्युक्तै: संपन्नस्य पुंसस्यापि तस्य वंध्यानां संतानरहितानां भार्या
णां पतेरत एव चिंतापुत्रलाभप्रयुक्ताप्यभूत् तत्र रूपं लावण्यमौदार्यं सत्यात्मेदृग्मविनियोगशीलत्वं वयो यौवनं तत्र जन्मसत्कुलप्रसूतत्वं विद्या

॥ आसीद्राजा सार्वभौम: शूरसेनेषु वै नृप चित्रकेतुरिति ख्यातो यस्यासीत्कामधुग् मही २० तस्य भार्या ॥
॥ सहस्राणां सहस्राणि दशाभवन् सांतानिकश्चापि नृपो न लेभे तासु संततिं २१ रूपौदार्यवयोजन्मविद्यैश्व
र्यश्रियादिभि: संपन्नस्य गुणै: सर्वैश्चिंता वंध्यापत्तेरभूत् २२ न तस्य संपद: सर्वा महिष्यो वामलोचना: सार्वभौ
मस्य भूश्चेयमभवन् प्रीतिहेतव: २३ तस्यैकदा तु भवनमंगिरा भगवानृषि लोकाननुचरन्नेतानुपागच्छद्य
दृच्छया २४ तं पूजयित्वा विधिवत्प्रत्युत्थानार्हणादिभि: कृतातिथ्यमुपासीदत्सुखासीनं समाहित: २५ ॥

ल

शास्त्रजन्यं ज्ञानं ऐश्वर्यं सार्वभौमत्वं श्री भोग्यभोगोपकरणादि संपत्तु एते चिंतारहितप्रीतिहेतव: अथाप्यपुत्रत्वमेकं सदा चिंताहेतुरासीदि
तिभाव: २२ तदेवाह नेति तस्यापुत्रत्वप्रयुक्तचिंताक्रांतस्य सार्वभौमस्य चित्रकेतो: सर्वा: संपद: वामलोचना: लोचनग्रहणमन्येषामवयवाना
मप्युपलक्षणं महिष्यश्चेयं कृत्स्नाभूमिश्च प्रीतिहेतवो नाभवन् २३ एवं सर्वसंपत्सु प्रीतिरहितस्य केवलं पुत्रार्थमेव चिंतयतस्तस्य चित्रकेतो
र्भवनं गृहं प्रति भगवान् षड्गुणसहितो अंगिरा नाम ऋषि: सिद्ध: ज्ञानकाष्ठां प्राप्त: अत एव यदृच्छया लोकाननुचरन् कदाचिदुपागत: प्राप्त: २४
तमागतमंगिरसं पर्याविधि प्रत्युत्थाय अर्घ्यपाद्यादिभि: संपूज्यातिथ्यं कृत्वा भोजनादिभि सत्कृत्येत्यर्थ: सुखासनोपविष्टमंगिरस
मुपाविशत् तस्य समीप उपविष्टवान् कथंभूत: सन् समाहित: संयतचित्त: सन् २५ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥ ॥

राम
५५

तेषामपि केचित्रायत्रास्त्रिवर्गरूपश्रेयः प्रवणा मक्तये न पतंते तावन्मुमुक्षुत्वे वदुर्लभेतिभावः देवान्मुमुक्षूणां केषांचित्सहस्रेषु कश्चिन्मु
च्येत सिध्यति लब्धयोगो भवति ४ मुक्तानामपि सिद्धानां कोटिष्वपि हे महामुने नारायणः प्रशांतात्मा रागाद्यकलुषितचित्तः सुतरां
दुर्लभः ५ प्रश्नार्थमुपसंहरन् तस्मोत्तरदानाय मुनिं प्रेरयति वृत्रस्त्विति द्वाभ्यां नु शब्देनोक्तविपरीततमसत्वप्रधानेयोत्तरे रजस्तमःप्र लं२
चुरो वृत्रः सर्वलोकोपतापनः सर्वलोकदुःखकारी अत एव पापः इत्थमुक्तप्रकारेण कृष्णे भगवति दृढामतिर्यस्य तादृशः कथमासीत्।
संग्रामइतिपाठांतरं४ कथं वा उल्वणे दुःसहे ग्रामे संग्रामादिविषये दृढामतिर्नासीदिति यत्नं ६ अस्मिन्नर्थे नोऽस्माकं भूयान्संशयो वर्तते भो मुने संशयं
विशिनष्टि हि यस्माद्धंशायाच्छ्रोतुं उत्तरं श्रोतुं कौतूहलं चास्माकमस्ति नन्विदं भयाद्वृत्रः कुसंग्रामे गत इत्यत्राह यः वृत्रः पौरुषेण सह

प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तम मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति ४ मुक्तानामपि सिद्धानां नारायणपरायणः सुदुर्ल
भः प्रशांतात्मा कोटिष्वपि महामुने ५ वृत्रस्तु स कथं पापः सर्वलोकोपतापनः इत्थं दृढमतिः कृष्ण आसीत्संग्राम उल्वणे ६ अत्र नः संश
योऽभूयान् श्रोतुं कौतूहलं प्रभो यः पौरुषेण समरे सहस्राक्षमतोषयत् ७ सूत उवाच॥ परीक्षितोऽथ संप्रश्नं भगवान्बादरायणिः निश
म्य श्रद्दधानस्य प्रतिनंद्य वचोऽब्रवीत् ८ शुक उ०॥ शृणुष्वावहितो राजन्नितिहासमिमं यथा श्रुतं द्वैपायनमुखान्नारदाद्देवलादपि ९।

स्राक्षमिंद्रमतोषयत्तत्र संग्रामे दृढत्वमस्तीति भावः ७ एवं नृपप्रश्नोत्तरं मुनिराह इत्याह सूतः परीक्षित इति अथ राज्ञः प्रश्नानंतरं अथ न नु हेतो
न कादयः इति वार्थः परीक्षितः समीचीनं प्रश्नं समाकर्ण्य प्रतिनंद्य अहो साधु पृष्टमिति अभिनंद्य कथंभूतस्य परीक्षितः श्रद्दधानस्य उत्तरश्र
वणविषयकश्रद्धायुक्तस्य उत्तरे विश्वासयुक्तस्य वा इदं वक्ष्यमाणमब्रवीत् ८ तदेवाह मुनिः शृणुष्वेत्यादिना श्लोकत्रयेण तावद्वृत्रस्य भ
गवद्भक्तिर्न तज्जन्मना लब्धा किंतु पूर्वजन्मनैवेति वक्तुं तस्य पूर्वजन्मस्मरणं नेवदेन् तुष्टवणाय राजानमावाहयति हे राजन् इमं वक्ष्य
माणमितिहासं अवहितः चित्तो यथा वृच्छृणु कथंभूतं इतिहासं द्वैपायनमुखादस्मभिर्मुखात्सकाशान्नारदाद्देवलाच्च श्रुतं मयेति शेषः ८।२
यथा द्वैपायनादिभ्यः श्रुतं तथा कथयामीत्यर्थः अपि चेति वान्वयः श्रुतं द्वैपायनादिभ्य इति इतिहासस्य प्रामाणिकत्वसूचना केवलास्मद्बुद्धि
परिकल्पितत्वशंकामूलकोऽप्यस्मिन्ननादरो न कार्य इत्युक्तं भवति ९ ॥ ॥ ॥श्री॥ ॥श्री॥ ॥

भा०१०
५६

तदुक्तरीत्या जितेंद्रियस्य मम सर्वं वशे वर्तते इति चेत् तर्हि संतोषस्तव कुतः इत्याह आत्मनः स्वस्य तव वात्मा मनः न प्रीयते न तुष्यति तत् किं पर
तो वा स्वतो वा हेतोः कथमसंतोषो ज्ञायते मयेत्यत्राह अलब्धकाममप्राप्ताभिलषितं त्वां लक्षये अनुपश्यामि तत्कुतः यतश्चिंतया तव
मुखं शबलं विच्छायमनाल्हादमुपलक्षये २१ एवमंगिरसा पृष्टश्चित्रकेतुः स्वमनीषितं ज्ञातवानित्याह मुनिः एवमिति विदुषापि
चित्रकेतोरभिप्रेतं जानतापि मुनिना एवं विकल्पितः स्वतः परतो वा तव असंतोष इत्येवं विकल्पपूर्वकं पृष्टः सन् चित्रकेतुः प्रजाकामः पु
त्रं कामयमानः प्रश्रयेण विनयेन नम्रः मुनिमंगिरसमाह २२ तदेवाह भगवन्नित्यादिना तद्द्विधेऽहि न इत्संततेन हे भगवन् त
पोज्ञानसमाधिभिः कर्मयोगभगवद्भक्तियोगैः ध्वस्तपापानां बाह्यकं पुण्यपापात्मकं कर्म येषां तेषां ब्रह्मज्ञानां योगिनां देहिषु अंतर्बहिश्च

पि३

आत्मनः प्रीयते नात्मा परतः स्वत एव वा लक्षयेऽलब्धकामं त्वां चिंतया शबलं मुखं २१ श्रीशुक उवाच॥ एवं विकल्पितो रा
जा विदुषा मुनिनापि सः प्रश्रयावनतोऽभ्याह प्रजाकामस्ततो मुनिं २२ चित्रकेतुरुवाच भगवन्किं न विदितं तपोज्ञानसमाधि
भिः योगिनां ध्वस्तपापानां बहिरंतः शरीरिषु २३ तथापि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि चिंतितं भवतो विदुषश्चापि चोदित
स्त्वदनुज्ञया २४ लोकपालैरपि प्रार्थ्याः साम्राज्यैश्वर्यसंपदः न नंदयंत्यप्रजं मां क्षुत्तृट्काममिवापरे २५ ॥श्रीरामश्री॥

२५

विदितं किं न शरीरिणां अंतर्बाह्यगतं च भवद्भिः सर्वं विदितमेवेत्यर्थः २३ तथापि सर्वज्ञस्य तवाज्ञातत्वेऽपि हे ब्रह्मन् आत्मनि मनसि अंतःकर
णे चिंतितमर्थं पृच्छतः तव ब्रूयां कथयामि कथंभूतः विदुषश्चापि मदभिप्रेतं जानतापि भवता चोदितोऽभिप्रेतकथनाय प्रेरितः
त्वदनुज्ञया ब्रूयामिति अनुज्ञापयसि तर्हि ब्रूयां इति स्वस्य विनयादिसंपत्तिः सूचिता २४ तावत्स्वस्य पुत्रलाभप्रयुक्ता याश्चिंता तां निवृत्ति
नामनिर्वृतिहेतुत्वेन दर्शयितुमाह लोकपालैरिति लोकपालैरपि प्रार्थ्यास्तेषामपि दुर्लभा इति भावः साम्राज्यं सार्वभौमत्वं तद्रूपं य
दैश्वर्यं तत्प्रयुक्ताः संपदः भोग्यं भोगोपकरणादि समृद्धयः अप्रजमपुत्रं मां न नंदयंति न सुखयंति यथा क्षुत्तृड्भ्यां अन्नपानादिकं
कामयमानमितरे स्रक्चंदनवनितादयो न सुखयंति तद्वत् २५ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥ ॥श्री

राम
५६

नां॰२

उपासीनमुपविष्टं स्थितो प्रश्रयेण आवनतं नम्रं तं चित्रकेतुं प्रतिपूज्य आह तत्र विनयात् संपतिरिति वहुसंमान्य समाभाष्य संभाषणाभिमुखं
कृत्वा महर्षिरंगिराः इदं वक्ष्यमाणमब्रवीत् २६ तदेवाह अपि शब्दः कुशलप्रश्नद्योतकः तेतव अनामयं आरोग्यमस्ति किलेति प्रश्नः आत्मनः
स्वसंबंधिनां प्रकृतीनां स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलात्मकानां सप्तानामपि स्वस्ति ननु सर्वस्मिन्सति विशेषेण प्रकृतीनां स्वस्तिक
थं पृच्छतीत्यत्राह यथेति सप्तभिः प्रकृतिभिर्महदहंकारतन्मात्रैर्यथा पुमान् गुप्तः रक्षितो भवति प्रकृत्यायत्तः सुखी भवति तथा राजापि ७
भूयादित्यर्थः अतः प्रकृतीनामेव तावत्स्वस्ति पृच्छामीति भावः एवं राज्ञः श्रेयः प्रकृत्यधीनं इत्युक्तमथ प्रकृतीनां श्रेयो राजाधीनमित्याह
राज्ञेति हे नरदेव तथा प्रकृतयोपि राज्ञा हेतुना हि तादयः हितमिष्टमादिशब्दादनिष्टपरिहारश्च यासां ता आढ्या भवंति आहत्ताधयइति।

महर्षिस्तमुपासीनं प्रश्रयावनतं स्थितो प्रतिपूज्य महाराज समाभाष्येदमब्रवीत् २६ अंगिरा उवाच अपि तेऽनामयं स्वस्ति
प्रकृतीनां तथात्मनः यथा प्रकृतिभिर्गुप्तः पुमान् राजापि सप्तभिः २७ आत्मानं प्रकृतिष्वद्धा निधाय श्रेय आप्नुयात् राज्ञा त
था प्रकृतयो नरदेव हिताधयः २८ अपि दाराः प्रजामात्या भृत्याः श्रेण्यो थ मंत्रिणः पौरा जानपदा भूपा आत्मजा वशवर्ति
नः २९ यस्यात्मानुवशश्चेत्स्यात्सर्वे तद्वशगा इमे लोकाः सपाला यच्छंति सर्वे वलिमतंद्रिताः ३० ॥ ग्रं॥ ॥ श्री

पादे आसमंताद्धृताः आधयो यासां निरस्तमनोदुःखा भवंतीत्यर्थः २८ एवं राज्ञः प्रकृतीनां चान्योन्यं श्रेयः प्रापकत्वमुक्तं ननु पदिरा
ज्ञः श्रेयः प्रकृत्यधीनं तर्हि राज्ञः स्वातंत्र्यभंगस्तत्राह अपीति यस्य राज्ञो दाराः भार्याः प्रजाः अमात्याः कर्मसहायाः श्रेण्यः तांबूलिका
दयः मंत्रिणः मंत्रेषु सहायभूताः मित्राणि पौराः पुरवासिनः जानपदा देशांतराधिपतयो भूपाः आत्मजाश्च वशवर्तिनः वशंगताः सए
व प्रकृतिष्वात्मानं निधाय श्रेयः प्राप्नुयादित्यर्थः २९ कस्यैते वशवर्तिनः स्युस्तत्राह यस्य राज्ञ आत्मा मनो नु वशः वशीतः नतु विषय
परस्याजितेंद्रियस्येति भावः तस्यैव वशंगताः सर्वे इमे पूर्वोक्ता दारादयः पालकैः सहिताः सर्वे लोका अप्रमत्ताः तंद्रिताः जागरूकाः संतो यच्छ ५४
यस्यात्मानुवशः तस्यैवेमे सर्वे दारादयो वशं गताः यस्येमे दारादयो वशंगतास्तस्यैव सर्वे लोकाः सपाला वलिं हरंतीत्यन्वयः उपा
यनसमर्पणं द्वारा सेवंत इत्यर्थः ३० २

ततस्तेभ्यो विप्रेभ्यो हिरण्यादीन् धेनूनां षडर्बुदानि च प्रादात् तत्र संख्या ऽर्बुदं दश कोटयः शतकोटिर्वार्बुदमिति चेव प्रयुक्तानंतरमिति निर्दे
शात् तथान्येभ्योपि बंधुभृत्यादिभ्यः कामानिष्टानर्थान् पर्जन्य इव ववर्ष यत् धनकरं यशस्करं पुत्रस्यायुःकरं यथा भवति तथा ववर्षेति कि
याविशेषणान्येतानि ३५ अथ कृच्छ्रलब्धे बहुप्रयासलब्धे तनये पितू राजर्षेश्चित्रकेतोः स्नेहोन्ववर्द्धत यथा निःस्वस्य निर्द्धनस्य
पुंसः कृच्छ्राप्ते कष्टलब्धे धने स्नेहोन्ववर्द्धते तद्वत् ३६ मातुरपि कृतद्युतेस्तनये नितरां नितरां मोहसमुद्भवः स्नेहः अन्ववर्द्धत मोहाद्वा मो
हस्य समुद्भवो यस्य यस्मादिति वा तदा कृतद्युतेः सपत्नीनां प्रजाकामज्वरः पुत्राभिलाषकृतसंतापोऽभवत् ३७ तदा ऽनुदिनं पुत्रं लाल
यतश्चित्रकेतोः प्रजावति पुत्रवत्यां दारे भार्यायां कृतद्युतौ यथा ऽतिप्रीतिस्तथान्येषु दारेषु प्रीतिर्नासीत् ३८ ततस्ताः सपत्न्यः आत्म

तेभ्यो हिरण्यं रजतं वासांस्याभरणानि च ग्रामान् हयान् गजान् प्रादाद्धेनूनामर्बुदानि षट् ३४ ववर्ष कामानन्येषां पर्जन्य इव
देहिनां धन्यं यशस्यमायुष्यं कुमारस्य महामनाः ३५ कृच्छ्रलब्धेथ राजर्षेस्तनयेनुदिनं पितुः यथा निःस्वस्य कृच्छ्राप्ते ध
ने स्नेहोन्ववर्द्धत ३६ मातुस्त्वतितरां पुत्रे स्नेहो मोहसमुद्भवः कृतद्युतेः सपत्नीनां प्रजाकामज्वरोभवत् ३७ चित्रकेतोर
तिप्रीतिर्यथा दारे प्रजावति न तथान्येषु संजज्ञे बालं लालयतोन्वहं ३८ ताः पर्यतप्यन्नात्मानं गर्हयंत्योभ्यसूयया आ
नपत्येन दुःखेन राज्ञो नादरणेन च ३९ धिगप्रजां स्त्रियं पापां पत्युश्चागृहसंमतां सुप्रजाभिः सपत्नीभिर्दासीमिव
तिरस्कृतां ४० दासीनां को नु संतापः स्वामिनः परिचर्यया अभीक्ष्णं लब्धमानानां दास्या दासीव दुर्भगाः ४१ ॥

सुराज्ञो नादरेणानपत्येन अपुत्रत्वनिमित्तेन दुःखेन च पुत्रवत्यां सपत्न्यां कृतद्युतावभ्यसूयया आत्मानं निंदयंत्यः पर्यतप्यन् परितप्ता
बभूवुः ३९ गर्हापूर्वकं परितापं तासां दर्शयति धिगिति द्वाभ्यां अप्रजामपुत्रवतीमत एव पापां मां स्त्रीं स्त्रियं धिक् मा स्त्री निंद्येत्य
र्थः निंद्यत्वे हेतुत्वं दर्शयन् स्त्रियं विशिंषति पत्युश्चागृहसंमतां गृहे संमतेष्टा गृहसंमता न तथा न भवतीत्यगृहसंमता पत्युरगृहे
संमतेत्यर्थः किंच सुप्रजाभिः शोभनापत्यवतीभिः सपत्नीभिर्दासीमिव तिरस्कृतां नतुच्छीकृतां ४० किंच दास्यपेक्षयाप्यपुत्रा नारी
निंद्येत्यात्मानं गर्हयंति दासीनामिति दासीनां को नु संतापः न कोपि तत्र हेतुः परिचर्यया सेवया स्वामिनः सकाशादभीक्ष्णं पुनः
पुनः लब्धः कामः ईर्ष्या याभिस्तासां स्वामिनः परिचर्यालब्धकामानां इति वान्वयः अतो वयं दास्याः दासीव दुर्भगाः तितुच्छा ४१

ततस्माद्धे महाभाग पूर्वैरस्मत्पित्रादिभिः सह मया गतं प्राप्तं दुस्तरं तमो नरकं यथा प्रजया पुत्रेण हेतुना यथा तरेम तथा विधेहि तथा
नुगृहाणेत्यर्थः अपुत्रस्य गतिर्नास्तीति वचनात् मनुष्यस्य पूर्वैः सह गतं तम इत्युक्तं प्रजया पितृभ्य इति श्रुत्युक्तरीत्या प्रजाया अभावे पि
लक्षणानिवर्तेरप्रजस्य तमःप्राप्तिसिद्धवत्कृत्वा गतमित्युक्तं २६ एवमुक्तोंगिरास्तमनुगृह्णन् पुत्रकामेष्ट्या याजयित्वा यज्ञोच्छिष्टं हवि
भार्यायै प्रदास्यन् स्वयमार्त्विज्यकरणेनेष्टवान् २७ ततो हे भारत राज्ञश्चित्रकेतोर्भार्याणां मध्ये या ज्येष्ठा च नाम्ना कृतद्युतिरिति प्रसिद्धा
भार्या तस्यै यज्ञोच्छिष्टं यज्ञशिष्टं हविः विप्रोंगिरा अदात् दत्तवान् २८ अथांगिरा नृपतिं चित्रकेतुमाह उवाच तदेवाह हे राजन् चित्रके
तो तव पुत्रो भविता जनिष्यते कथंभूतः तुभ्यं हर्षशोकप्रदः जन्मना हर्षं मरणेन शोकं च प्रददातीति तथा इत्येवमुक्त्वा ब्रह्मणः सुतोंगिराः

ततः पाहि महाभाग पूर्वैः सह गतं तमः यथा तरेम दुस्तारं प्रजया तद्विधेहि नः २६ श्रीशुक उवाच ॥ इत्यर्थितः स भगवान्कृपालु
र्ब्रह्मणः सुतः श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्विभुः २७ ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणां च भारत नाम्ना कृतद्युतिस्तस्यै।
यज्ञोच्छिष्टमदाद्द्विजः २८ अथाह नृपतिं राजन्भवितैकस्तवात्मजः हर्षशोकप्रदस्तुभ्यमिति ब्रह्मसुतो ययौ २९ सापि तत्प्राशना
देव चित्रकेतोरधारयत् गर्भं कृतद्युतिर्देवी कृत्तिकाग्नेरिवात्मजं ३० तस्या अनुदिनं गर्भः शुक्लपक्ष इवोडुपः ववृधे
शूरसेनेशतेजसा शनकैर्नृप ३१ अथ काल उपावृत्ते कुमारः समजायत ॥ जनयन्शूरसेनानां शृण्वतां परमां मुदं ३२ ॥
हृष्टो राजा कुमारस्य स्नातः शुचिरलंकृतः वाचयित्वाशिषो विप्रैः कारयामास मंगलं ३३ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥

पयोगतः २९ ततः सा कृतद्युतिश्चित्रकेतोर्भार्या तस्य यज्ञावशिष्टस्य प्राशनाद्भक्षणादेव चित्रकेतोः सकाशात्पुत्ररूपं गर्भमधारयद्धृतव
ती यथा कृत्तिका अग्नेः सकाशात्कुमारं कुमाररूपं दधार तद्वत् ३० तस्याः कृतद्युतावनुदिनं शुक्लपक्षे उडुपश्चंद्र इव शूरसेनानामीशस्य चित्रकेतो
स्तेजसा वीर्येण गर्भः शनैर्ववृधे एधामास ३१ अथ काले दशमासात्मके काले उपावृत्ते गते सति कुमारः पुत्रः समजायत कथंभूतः सन् राज्ञः
पुत्रोत्पत्तिं शृण्वतां शूरसेनदेशस्थानां जनानां परमां मुदं हर्षं जनयन् उत्पादयन् सन् ३२ ततः हृष्टो हर्षयुक्तो राजा चित्रकेतुः सद्य एव स्ना
त्वा शुचिरुदारमनाः वस्त्रादिभिरलंकृतश्च कुमारस्य विप्रैराशिषो वाचयित्वा जातकं जातकर्म कारयामास ३३ ॥रामचंद्राय नमः॥

नलब्धितः मम सुहेतुर्यस्त्वं मतं सुतं श्रुत्वा स चित्रकेतुः दुःखितो भूदितिशेषः तदेवाह नष्टदृष्टिरिति पुत्रस्नेहानुबंध नानुबद्ध स्तेन हेतु
नाएधितयावर्द्धितया शुचा शोकेनातीव पीडितः अत एव विनष्टदृष्टिर्यस्मात् अत एव पथि क्वचिच्च स्खलन् कचिद्विमूर्छितः स राजर्षिराजः चि
त्रकेतुरनुसृत्य गच्छद्भिः प्रकृतिभिरमात्यादिभिर्द्विजैश्च परिवृत्तः ५० मृतस्य बालस्य पादमूले पपात कथंभूतः विस्रस्ताः शिरोरुहा
अंबरे च यस्य दीर्घयथातथा श्वसन् श्वासं मुंचन् बाष्पकलाभिरुपरोधतः संभृतत्वेन निरुद्धः कंठो यस्य ताहृशः भाषितुं किंचिद्यथिवक्तु
नशशाक नाशक्नोत् ५१ तयोरुक्तयोः महता शोकेनार्पितं प्राप्तं पतितं तं एकमेव संततिरूपं मृतं वालं पुत्रं च निरीक्ष्य जनस्य राज्ञः प्रकृते
रमात्यादेश्च कृतं मनः पीडायथा भवति तथा सती र्कृतद्युतिः राज्ञीतिपाठे सती राज्ञी जनस्य प्रकृतेश्च हृदुज्जयथा तथा चित्रधानेकप्रका

श्रुत्वा मृतं पुत्रमलक्षितांतकं विनष्टदृष्टिः प्रपतन्स्खलन्पथि स्नेहानुबंधैधितया शुचा भृशं विमूर्छितोनुप्रकृतिर्द्विजैर्वृतः ५०
पपात बालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहांबरः दीर्घं श्वसन्बाष्पकलोपरोधतो निरुद्धकंठो न शशाक भाषितुं ५१ प
तिं निरीक्ष्योरुशुचार्पितं तदा मृतं च बालं सुतमेकसंततिं जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विललाप चित्रधा ५२ स्तन
द्वयं कुंकुमगंधमंडितं निषिंचती सांजनबाष्पविंदुभिः विकीर्य केशान्विगलत्स्रजः सुतं शुशोच चित्रं कुररीव सुस्वरं ५३ क
लयुतिः अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे परोनुजीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवः परः ५४

रं विललाप ५२ विलापमेव प्रपंचयति स्तनद्वयमिति सार्द्धेन अकलाभिः द्वयं तेन तावत्कुंकुमगंधेन कुंकुममिश्रहरिचंदनेन मंडि
तं भूषितं स्तनद्वयं सांजनयुक्तैर्बाष्पविंदुभिर्निषिंचती विगलंती स्रजो यस्मात् केशान्विकीर्य कुररीव पुत्रं प्रति सुस्वरं यथा तथा
शुशोच ५३ हे विधातस्त्वमहो बालिशः मूर्खः निंद्यो वा कुतः यस्त्वमात्मसृष्टेः स्वकर्तृकसृष्टेः पित्रादिक्रमनिवृत्त्या अप्रतिरूपं
ईहसे चेष्टसे तदेवाह परे प्राक्कालजाते पित्रादौ अनुजीवति सति अपरस्य पश्चात्कालजातस्य पुत्रादेर्या मृतिर्मरणमिति तदेतदप्रति
रूपमित्यर्थः विपर्ययश्चेद्यद्युक्तविपर्यय एव स्यात् पुत्रादौ जीवति पित्रादेरेव मृतिः स्यादित्यर्थः तर्हि किं ध्रुवं नूनं परः सर्वेश्वरो भूर्वेदितैव
मेनतस्मात् बालिशो वालिशावेति भावः यदि न नु सृष्टिस्तु पित्रादिक्रमेणैव मृतिर्नियमेन नियतेति चेत्तर्हि ध्रुवं नूनं परः सर्वविलक्षणोसीत्यपि

प्रति२

एवंसपत्न्याःकृतद्युतेःपुत्रसंपदानितरांदह्यमानचित्तानांराज्ञश्चित्रकेतोर्मसंमतारत्तिजीवनंयासांवलवान्विद्वेषोभूत् ४२ ततोनृप
त्तिंचित्रकेतुंदुर्मर्षाश्चासहमानास्तद्विद्वेषेणनष्टविवेकाःक्रूरचित्ताःकुमारायगरंविषंददुः ४३ सपत्नीनांमहदघंगरदानरूपमजानं
तीकृतद्युतिःकेवलंकुमारंवीक्ष्यसुप्तएवेतिमत्वागृहेव्यचरत्संचचार ४४ कुमारेसुचिरतरंसुप्तमुपधार्यविज्ञायमनीषिणीपुत्रला।
लनविषयकबुद्धिमतीकृतद्युतिःहेभद्रेमेपुत्रमानयेतिधात्रींस्तन्यदायिनींप्रेरयामास ४५ साधात्रीशयानंसुप्तंतंउपव्रज्यकुमारस
मीपंगत्वाउत्तारेऊर्ध्वतोत्तारेकनीनिकेययोस्तेलोचनेयस्यतादृशंप्राणैरिंद्रियैरात्मना जीवेनत्यक्तंदृष्ट्वाहाहतास्मीतिक्रोशंतीभुव्यप
तत् ४६ कराभ्यामुच्चैरतितरांउरोघ्नंत्यास्ताडयंत्यास्तस्याधात्र्याआनिलरांमातुरंदुःखयुक्तंदीनंस्वरमाकर्ण्यराज्ञीकृतद्युतिःत्वरयात्मजं

एवंसंदह्यमानानांसपत्न्याःपुत्रसंपदा राज्ञोऽसंमतवतीनांविद्वेषोवलवानभूत् ४२ विद्वेषनष्टमतयःस्त्रियोदारुणचेतसः गरंददुः
कुमारायदुर्मर्षानृपतिंप्रति ४३ कृतद्युतिरजानंतीसपत्नीनामघंमहत् सुप्तएवेतिसंचिंत्यनिरीक्ष्यचरद्गृहे ४४ शयानंसुचिरंवा
लेमुपधार्यमनीषिणी पुत्रमानयमेभद्रेइतिधात्रीमचोदयत् ४५ साशयानमुपव्रज्यदृष्ट्वाचोत्तारलोचनं प्राणेंद्रियात्मभिस्त्यक्तंह
तास्मीत्यपतद्भुवि ४६ तस्यास्तदाकर्ण्यभृशातुरस्वरंघ्नंत्याःकराभ्यामुरउच्चकैरपि प्रविश्यराज्ञीत्वरयात्मजांतिकंददर्शवालं
सहसामृतंसुतं ४७ पपातभूमौपरिवृद्धयाशुचामुमोहविभ्रष्टशिरोरुहांवरा ४८ ततोनृपांतःपुरवर्त्तिनोजनानराश्चनार्य
श्चनिशम्यरोदनं आगत्यतुल्यव्यसनाःसुदुःखितास्ताश्चव्यलीकंरुरुदुःकृतागसः ४९ ॥ ॥ ॥श्रीजानकीजीवनायनमः

स्यांतिकंप्रविश्यसहसासर्वथामृतंएववालंसुतंददर्श ४७ ततःभूमौपपात परिवृद्धयाएधमानयाशुचाशोकेनमुमोहविचित्ताऽभू
त् मोहमेवदर्शयितुंतांविशिनष्टि विभ्रष्टशिरोरुहांवराविभ्रष्टाःविलुलिताःशिरोरुहाःकेशाअंवरंचयस्याःसा ४८ ततःनृपसांतः
पुरवासिनोजनाहेनृपेतिसंबोधनंवा जनानेवाह नराइतिनराश्चनार्यश्चसर्वेजनाःरोदनमाकर्ण्यकुमारसमीपमागत्यराज्ञ्यासह
तुल्यदुःखाःसुदुःखिताबभूवुः त[illegible]दाकृतागसः गरदानेनकृतापराधाअपिताःसपत्न्यःसमागत्यव्यलीकंनिष्कपटमिव य
द्वासकपटंयथातथामिथ्यावारुरुदुःस्वापराधंप्रच्छादयितुंइतिभावः ४९ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥

भा०ष०
५८

एवं दंपत्योरल्पेषु च भस्त्रीशोकाविष्टेषु सनारदः पुनरंगिरास्तत्राययौ इत्याह मुनिः प्रलपंत्यामिति मृतं पुत्रं प्रति चित्रविलापनैरिति प्रलपंत्यां सः
सत्यां चित्रकेतुरपि नितरां शोकेन तप्तोऽत एव मुक्तकंठः स्वरयुक्तः कंठो यस्य ताहृशः रुरोद [illegible] ५८ तयोर्दंपत्योरेवं विलपतोः।
सतोस्तदनुव्रताः सर्वे नरा नार्यश्च रुरुदुः इतरत्सर्वं जनं जातं मचेतनप्रायमासीत् चित्रितप्रतिमा इव भूवुरित्यर्थः ६० एवं कश्मलं महद्दुःखमा
पन्नमत एव नष्टसंज्ञं विवेकरहितमनायकं तत्त्वोपदेष्टारहितं समुदायं ज्ञात्वा नारदेन सहितोऽङ्गिरानाम मुनिराजगामागतवान् ६१ षष्ठेच
तुर्दश।।१४।। एवं तत्रागताभ्यामंगिरोनारदाभ्यां शोकापनयाय नमूचतुरित्याह मुनिः ऊचतुरिति मृतकोपांते शावसमीपे पतितं मृतकोपमं शाव
सदृशं तत्र हेतुं शोकेनाभिभूतं तिरस्कृतविवेकं राजानं चित्रकेतुं सदुक्तिभिः प्रकृतिपुरुषपरयाथात्म्यवेदनीभिरुक्तिभिर्बोधयंतौ विवे
कमुत्पादयंतावूचतुः १ सदुक्तिभिर्बोधनप्रकारमेवाह कइत्यादिना वस्तुनिकल्पित इत्यंतेन तावज्जीवानां परस्परं निरुपाधिकसंबंधाभा

श्रीशुक उवाच प्रलपंत्यां मृतं पुत्रमिति चित्रविलापनैः चित्रकेतुर्भृशं तप्तो मुक्तकंठो रुरोद ह ५९ तयोर्विलपतोः सर्वे दंपत्योस्तदनुव्रताः रु
रुदुः स्म नरा नार्यः सर्वमासीदचेतनं ६० एवं कश्मलमापन्नं नष्टसंज्ञमनायकं ज्ञात्वांगिरा नाम मुनिराजगाम सनारदः ६१ इति श्रीभा
षष्ठस्कंधे चतुर्दशः।।१४।। श्रीशुक उ० ऊचतुर्मृतकोपांते पतितं मृतकोपमं शोकाभिभूतं राजानं बोधयंतौ सदुक्तिभिः १ कोयं स्यात्तव राजेंद्र
भवान्यमनुशोचति त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परं २ यथा प्रयाति संयाति स्रोतोवेगेन वालुकाः संयुज्यंते वियुज्यंते तथा कालेन देहिनः ३

128

स्यौपाधिक

वादौपाधिकसंबंधप्रयुक्तशोकमोहभयादेर्निमित्तसंबंधस्यैव निवर्तनेन शोकहेतुरस्तीत्यूचतुः कइति हे राजेंद्र यं प्रति भवाननुशोचति सोयं भवा
हरूपायां सृष्टौ पुरा भूतकाले इदानीं वर्तमानकाले इतः परं भविष्यत्काले प्रातवकः स्यात् त्वमप्यस्य शोच्यमानस्य कतमः यद्धि जीवात्मानं प्रति शोच
सि तर्हि शोच्यस्य जीवस्य तव कः संबंधः केनरूपेण अनेन तव कः संबंध इत्यर्थः २ देहद्वारकपितृपुत्रसंबंधेनानुशोचामीत्यत्रोचतुः यथेति।
स्रोतोवेगेन प्रवाहवेगेन यथा वालुकाः सिकताः कदाचित्संयांति संयुक्ताः भवंति कदाचिच्च प्रयांति वियुक्ताश्च भवंति तथा कालेन निमि
त्तेन देहिनो प्राणिनो देहिभिः सह संयुज्यंते वियुज्यंते च देहिनां परस्परं कालकर्माधीनदेहद्वारकसंबंधस्यौपाधिकत्वादुपाधिविलये तत्प्रयुक्त
संबंधस्यापि विलयाद्विलीनसंबंधप्रयुक्तः शोको न कार्य इति भावः ३ ।। ।। ।।श्री।। ।। ।।श्री।। ।। ।।श्री।।

राम
५९

ननु तत्र कर्मानुसारेण उत्पत्तिमरणे स्तः न चात्र क्रमोस्ति न वा ममात्रापराधोस्ति तत्राह नहीति इह प्रकृतिमंडले शारीरिणामस्तु जन्म
नोः क्रमो नास्ति चेत् अस्माज्जाते पुत्रे जीवत्येव पिता पूर्वं जातो म्रियत इत्येवंविधः क्रमो नास्ति चेदित्यर्थः उत्पत्तिक्रमेणैव मृतिक्रमो नास्ति
इति चेदित्यर्थः जन्मग्रहणं दृष्टान्तार्थं यथा जन्मनि क्रमोस्ति तथा मृतौ क्रमो नास्तीति चेत्तर्ह्यात्मकर्मभिरेव मम स्यादिदं सर्वम
स्तु किमीश्वरेण त्वया ह्यत्र समस्ति कर्मानुसारेण फलप्रापको ह्यमिति चेत्तत्राह यदीति निजसर्गरहस्ये तत्र यास्नेहपाशाः पुत्रादि
षु स्नेहरूपाः पाशाः कृतास्तानिमान् स्वयमेव विरच्यसि आर्षत्वात् आर्थनायां लट् छिंधीत्यर्थः ५५ एवं दैवं प्रत्याक्रुश्य प्रथमं तं बालकं
प्रति विललाप त्वमिति हे तात पुत्र मां मन्नाथामेतं दुःखसागराद्दुस्तरं करहितां दीनां ममकुं त्वं नार्हसि तं क्रोशकेन तं पितरं वि
रकेन तु विवत्सपरूप यद्यस्मात्त्वं कर्तैकात् स्वलोकनाद प्रत्र दुस्तरमेन पत्यव प्रयुक्तां दयिलैशान्त दुस्तरे अप्रत्न त्वक्लेशास्तुप

नहि क्रमस्त्वेदिह मृत्युजन्मनोः शारीरिणामस्तु तदात्मकर्मभिः । यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्तेन तमिमं विरच्यसि ॥ ५५ ॥
त्वं तात नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तं । अंजस्तरेम भवता प्रजदुस्तरं यद्ध्वांतं नयाः ह्यकरुणेन यमेन दूरं ॥ ५६ ॥
उत्तिष्ठ तात त इमे शिशवो वयस्यास्त्वामाह्वयंति नृपनंदन संविहर्तुं । सुप्तश्चिरं ह्यशनया च भवान्परीतो भुंक्ष्व स्तनं पिब शुचो हर नः स्वकानां ॥ ५७ ॥
नाहं तनूज ददृशे हतमंगला ते मुग्धस्मितं मुदितवीक्षणमाननाब्जं । किं वा गतोस्यपुनरन्वयमन्यलोकं नीतोघृणेन न शृणोमि कलि

याकथंचित्सोढुं शक्या अयं तु नितरां सोढुमशक्य इति भावः त्वं ध्वांतं शोकं तरेम यद्दिन परूपसि तर्ह्यकरुणेन निर्घृणेन यमेन करणभूते।
ते मामपि दूरं नय यमसमीपं नयेत्यर्थः ५६ हे तात पुत्र त्वं उत्तिष्ठ इमे एव यस्यास्तव समानवयसः शिशवो बालाः हे नृपनंदन त्वया सह सं।
विहर्तुं त्वामाह्वयंति किंच त्वं चिरं सुप्तः अशनया क्षुधा च परीतो व्याप्तः अतः किंचिद्भुक्ष्व अस्मिदुग्धं पिब स्वकानां नोस्माकं
शुचो हर अपनुद ५७ हे तनूज पुत्रक ते तव आननाब्जं मुखकमलमहं न ददृशे न दृष्टवती कथंभूतं मुग्धं सुंदरं स्मितं यस्मिन् मुदि
तं चलत्प्रसन्नेक्षणं नेत्रे यस्मिन् तादृशं अतएव हतं मंगलं यस्याः साहमिदानीमपि तव कलामधुरा गिरः न शृणोमि ना अपि
नहि किमपुनरन्वयं पुनरागमनरहितमन्यलोकं लोकांतरं घृणेन दैवेन नीतः प्रापितः गतोसि किं वेत्यर्थः ५८ ॥ श्री ॥ श्री

देस्तत्री लीलाप्रयोज[illegible] नत्वमुक्तं निरपेक्षोपीत्यनेन लीलाव्यतिरिक्तप्रयोजनांतरनिरपेक्षत्वं चोक्तं अतो नाप्तकामत्वभंगः [illegible] केवललीलाप्रयोजनानां कंदुकाद्यारंभाणां बालमहाराजादिषु दर्शनात् नेन्चे[illegible] पीश्वरस्य देवतिर्यङ्मनुष्यस्थावरात्मनो त्कृष्टमध्यमापकृष्टसृष्ट्यापक्षपातः प्रसज्येत अतिघोरदुःखयोगकरणान्नैर्घृण्यं चावर्जनीयमिति शंकमानं प्रयुक्तं भूतेशाइति अयं भावः एवं स्वएष रपि नवैषम्यादिदोषप्रसक्तिः सर्वभूतानां ततत्कर्मानुसारेण नियंतृत्वात् विषमसृष्टेः सुखदुःखादेश्च देवादिदेवत्वकर्म साफल्यत्वादितिभावः तथाच श्रुतिः साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन कर्मणेति तथा चोक्तं भगवता पराशरेणापि देवादिवैचित्र्ये हेतुः देवत्रानां प्राचीन शक्तिरेवेति निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि प्रधानकारणीभूता यतो वै सृज्यशक्तयः निमित्तमात्रमुक्तैवनान्यत्किंचिदपेक्षते नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तुतां इति स्वकर्मणैव वसु

देहेन देहिनो राजन् देहाद्देहोऽभिजायते
बीजादेव यथा बीजं देहार्थ इव शाश्वतः ॥ १

वस्तु देवत्वं वस्तुतां देवादिवस्तुतां प्राप्यत इत्यर्थः ॥ किंच देहस्य जन्ममरणादिस्वभावत्वादपुरुषार्थस्वरूपत्वादात्मनस्तु तद्विपरीतस्व भावत्वाच्च न देहसंबंधप्रयुक्तशोकः कार्य इत्याह देहेनेति हे राजन् देहिनो जीवस्य देहेनापि तच्छरीरेण देहान्मातृशरीरादभिजायते यथा बीजा देव भूमौ निहिताद्बीजांतरं जायते दिह उपचय इति धातुपाठादुपचयार्थकाद्दिहिधातोर्निष्पन्नो देहशब्द उपचयापचयादि षड्भावविका रवद्वाचकः प्रयुक्तः तस्य तत्स्वभावसूचनाय एवं चाग्नेरोष्ण्यवत् जलस्यशैत्यं तीव देहस्य मृतिं प्रति शोको मुधेतिभावः आत्मनो देहवैपरी त्याकारत्वमुक्तं देहार्थ इव शाश्वत इति देही जीवः शाश्वतः नित्यः सनैकरूप आनंद एवार्थः पुरुषार्थस्वरूपः आनंदरूपः आनंदो हि पुरुषार्थ इव शब्द एवकारार्थकः निपातानामनेकार्थत्वात् पुरुषार्थरूप एवेत्यर्थः नित्यत्वसनैकरूपत्वानंदरूपत्वादिस्वभावात्मानुदर्शनं विहि यतद्विपरीतं देहप्रत्यनुशोको व्यर्थ इतिभावः ॥ १ ॥

भा०ब० ६०

२३

राम ६०

ग१ सं२

ननु पितृपुत्रत्वादिसंबंधो न केवलमात्मगतः नापि देहमात्रगतः अपितु विशिष्टगतोऽतो विशिष्टं प्रत्येवाहं विशिष्टरूपः शोचामीति चेदेवमपि
न शोकः कार्य इत्याह तु यथेति यथा धाना सुवीजेषु जातिगुणादिविशेषणविशिष्टेषु तादृशा धानावीजांतराणि ईश्वरैकल्पेन भवंत्युत्पद्यंते ॥
अपादानस्यैवाधिकरणत्वविवक्षया सप्तमी न भवंति नुत्पद्यंते च तथा भूतेभ्यः भूतांतराणि परमेश्वरमायया उत्पद्यंते न उत्पद्यंते च अप्राणिभ्यः प्राणि
नामिव प्राणिभ्यः प्राणिनामप्युत्पत्ते ईश्वरसंकल्पायत्तत्वात् तद्वत्प्राणिभिरपीश्वरमायावैभवमनुसंदधद्भिस्तूष्णीमेवस्थेयं न तु शोकः कार्यः किंच
विशिष्टविशेष्यांशस्य जीवस्यागतत्वाच्च न शोकः कार्य इति भावः ४ ननु गच्छतु विशेष्यांशो जीवः साक्षात्संबंधापादकमवस्थितं देहं प्रत्यनुशोचा
मीत्यत्राह वयं चेति वयं त्वं चामी इमे चराचराश्च सर्वे तुल्यकालाः वर्तमानकालीना यथा जन्मतः प्राक् पश्चाच्च न संति जन्मतः प्राक् नासन्न
त्याश्च पश्चान्न भविष्यंति भो राजन्नधुनाप्यमी एव नास्ति विशारणमारभ्य इमं देहमप्यसंतं पश्येत्यर्थः ५ यदीशमायया भूतेभ्यो भूतानि भ

यथा धाना सुवै धाना भवंति न भवंति च एवं भूतानि भूतेषु चोदितानीशमायया ४ वयं च त्वं च ये चेमे तुल्यकालाश्चराचराः न
नम्रत्योर्यथा पश्चान्प्राङ्नैवमधुनापि भो ५ भूतैर्भूतानि भूतेशः सृजत्यवति हंत्यजः आत्मसृष्टैरस्वतंत्रैरनपेक्षोपि बालवत् ६ (

वंति तर्हि तस्य स्वातंत्र्यरूपमीश्वरत्वमेव न स्यात्तत्तज्जीवविशेषापेक्षत्वात् सुखदुःखप्रदत्वे नैर्घृण्यप्रसंगात् तयोश्च कर्मवश्यजीवधर्मत्वा
ज्जीवकर्मानुरूपत्वात् प्रसंगादित्याशंक्याह भूतैरिति भूतेशः समष्टिव्यष्ट्यात्मनावस्थितानां सर्वेषां भूतानामीशः अतः विरचितजीवक
र्मानुसारेणेशः स्वात्मना स्वेन सृष्टैरत एवास्वतंत्रैः सृजतीत्यनेन तस्य स्रष्टुः सकलेतरविलक्षणत्वं सर्वार्थशक्तियुक्तत्वं चोक्तं अजड
त्वनेन कर्मफलानुभवायत्ततदायत्तत्वात् आदिराहित्योक्त्या स्वात्मसमस्तकामत्वमप्युक्तं भवति नन्वेवंभूत [illegible] जगत्सृष्ट्या [illegible]
केनचित्प्रयोजनेन न भवितव्यं निःप्रयोजनस्य प्रवृत्तेरसंभवात् तत्र बुद्धिपूर्वकारिणामारंभो हि द्विविधं हि प्रयोजनं स्वार्थिकः परार्थो वा
ता:३ न हि परस्य ब्रह्मणः स्वभावत एवाप्तसमस्तकामस्य भगवतः सर्गेण किंचन प्रयोजनमनवाप्तमवाप्यते नापि क्रौ [illegible] स्यवाप्तसमस्त
कामस्य [illegible] ना परानुग्रहेण भवति न चेद्गर्भजन्मजरामरणनरकादिनानाविधानंतदुःखबहुलं जगत्सृजति वा (
नस्सृजतीत्याशंक्य मानं प्रत्याह तु निरपेक्षोपि बालवदिति प्रयोजननिरपेक्षोपि बालवत्सृजतीत्यर्थः दृष्टांतेत्तारतम्येन जगत्सृष्ट्या

प्र२ स्यावि४ र्थ:३

तदेवाह को युवमित्यादिना ज्ञानदीप उदीर्यतामित्यंतेन तावदवधूतवेषौ को युवामिति पृच्छति को इति ज्ञानसंपन्नौ अतस्तत्र वस्तुत्वानामपि पृष्टौ यो युवां तावत्कौ पृच्छन्नपि किं पृच्छसीत्यत्राह अवधूतेन तु दृष्टेनैव वेषेण गूढौ तिरोधापितस्ववेषौ इह समागतौ युवामन्यथा तु दृष्टेत्ताहृशां ज्ञानसंपत्ति दुर्लभेति भावः १० विरक्तो भूत्वा त्रिलोकानां पावनाय चरंति हि इत्युक्तरीत्या लोकानुग्रहायैवावधूतवेषा ज्ञानिनश्चरंतीत्याह चरंतीति ब्राह्मणा भगवद्भक्ता उन्मत्तस्येव लिंगं येषां ते तथा संतो ग्राम्यबुद्धीनां विषयासक्तानां संसारिणां मादृशानां बोधाय ज्ञानोत्पादनाय अवनौ भूमौ कामं यथेष्टं चरंति हि यस्माद्भगवत्प्रिया उन्मत्तलिंगिन एव मादृशां बोधाय चरंत्यतो युवां को इति वान्वयः ११ ब्राह्मणो भगवत्प्रियानुन्मत्तलिंगेन चरतः एव दर्शयति कुमार इति चतुर्भिः सनत्कुमारः १२ रामो भार्गवः १३ दत्तो द

चित्रकेतुरुवाच को युवां ज्ञानसंपन्नौ महिष्ठौ च महीयसां अवधूतेन वेषेण गूढाविह समागतौ १० चरंति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिंगिनः ११ कुमारो नारद ऋभुरंगिरा देवलोऽसितः अपांतरतमो व्यासो मार्कंडेयोऽथ गौतमः १२ वशिष्ठो भगवान्रामः कपिलो बादरायणिः दुर्वासा याज्ञवल्क्यश्च जातूकर्णस्तथारुणिः १३ रोमशश्च्यवनो दत्त आसुरिः सपतंजलिः मुनिर्वेदशिरा धौम्यो मुनिः पंचशिखस्तथा १४ हिरण्यनाभः कौशल्यः श्रुतदेव ऋतध्वजः एते परे च सिद्धेशाश्चरंति ज्ञानसंपदः १५ तस्माद्युवां ग्राम्यपशोर्मम मूढधियः प्रभू अंधे तमसि मग्नस्य ज्ञानदीप उदीर्यतां १६ अंगिरा उवाच अहं ते पुत्रकामस्य पुत्रदोऽस्म्यंगिरा नृप एष ब्रह्मसुतः साक्षान्नारदो भगवानृषिः १७ ॥श्री॥श्री॥

त्तात्रेयः सपतंजलिः पतंजलिर्महामुनिर्भरद्वाजः मुनिः ऋषिर्वेदशिरोत इति पाठे बोधस्य गोत्रापत्यं बौध्यः आंगिरसः कपिवोधांवांगिरस इति यद्वा १४ एते कुमारादयः तथापरे च ज्ञानमेव संपद्येषां ते सिद्धेशाश्चरंति १५ युवां यौ कौचित्तौ ताव यस्मादहं भूमा दृशावोधने दक्षौ तस्माद्युवाभ्यां मम ज्ञानमेव दीपः प्रकर्षेणोदीर्यतां दीपवत्तां इत्यर्थः कथंभूतस्यांधे तमसि अज्ञानरूपे मग्नस्यात एव मूढधियः अत एव ग्राम्ये भवो ग्राम्यो नरः स एव पशुस्तस्य १६ एवमुभावपि पृष्टौ तत्र तावदंगिरा आत्मनोऽप्यागमनप्रयोजने च वदंश्चित्रकेतोर्वैराग्यमुत्पादयति अहं इत्यादिना पराममाविज्ञोस्यंतेन हे नृप पूर्वं पुत्रकामं प्रमानस्य तव पुत्रदो योंऽगिराः सोऽहमस्मि एष द्वितीयस्त्वयं साक्षाद्ब्रह्म

देहिनोदेहोजायतेदेह्यर्थश्चवराश्वतइतिनित्यसंबंधार्थकमतवेर्थेप्रत्ययांतेनजीवोनिर्दिष्टः नत्वपद्यनेतदुःखाकरदेहसंबंधोजीवस्यानि
त्यश्चेदपुरुषार्थनित्यसंबंधिनोप्यपुरुषार्थरूपत्वैवस्यान्ननुपुरुषार्थरूपत्वमितिशंकांनिराकर्वतावदेहतुः देहीति पुरायोयमविवेकः
अनादिदेहात्मभ्रमस्वतंत्रात्मभ्रमरूपपरमार्थकर्ममूलकस्तेनकृतोदेहदेहीविभागःस्वरूपतः अयंदेहोयंदेहीतिविभागरहितेआत्मनिदे
वमनुष्यादिदेहप्रतिबंधप्रयमात्मातदात्मप्रतिबंधअयंदेहइतिविभागःकेवलदेहात्मादिभ्रममूलकःसंजातइत्यर्थः यथाऽवस्तुरजत
वस्तात्वोरजतव्यक्तिभिन्नेशुक्तौद्विवस्तुनीदंरजतमितिरजतत्वतदाश्रयव्यक्त्योर्विभागःपरमार्थसादृश्यादिदोषमूलकेनभ्रमेणकल्पि
तस्तद्वत् यद्यपिदृष्टांतेरजतत्वेतदाश्रयरूप्यजातिमत्त्वभयभिन्नेशुक्त्यादौजातिव्यक्तिविभागःकल्पितःसचविभागःप्रतीतिमात्रविष
योनतुप्रमितिविषयःअतएवनेदंरजतमितितत्रबाधप्रवृत्तिःदार्ष्टांतिकेतुदेहप्रत्याश्रयभूतएवात्मरूपेवस्तुनिदेहदेहिविभागःसच
प्रमितिविषयश्च अतएवहितत्रनायंदेहःनायंदेहीपाश्चात्यबाधनादर्शनेचेतिदृष्टांतदार्ष्टांतिकयोर्वैषम्यंतत्राप्युभयत्रजातिव्य

देहदेहिविभागोयमविवेककृतःपुरा। जातिव्यक्तिविभागोयंयथावस्तुनिकल्पितः ८ श्रीशुकउवाच॥
एवमाश्वासितोराजाचित्रकेतुर्द्विजोक्तिभिः प्रमृज्यपाणिनावक्त्रमाधिम्लानमभाषत ९ ॥श्री॥

क्तिविभागदेहदेहिविभागयोर्भ्रममूलकत्वस्यभ्रमकारणयोसादृश्यकर्मणोः पारमार्थिकत्वस्यसाम्यदार्ष्टांतिकभावउपपन्नः नहिदृष्टांत
दार्ष्टांतिकभावेसर्वसाधर्म्यमपेक्षितं अन्यथानयोस्तादात्म्यापत्त्यादृष्टांतदार्ष्टांतिकभावस्यैवकाप्यसंगतत्वापत्तेः अविवेककृतइत्यनेनाविवे
कंप्रतिनिमित्तभूतेपुण्यपापात्मकेकर्मणिपरमात्मोपासनेननिःशेषंनिरस्तेसतितन्निमित्तदेहात्मभ्रमादेरपिनिरस्तत्वापुरुषार्थसंबंधा
भावेआत्मस्वरूपमनुभूतंभवतीतिसूचितं यथादृष्टांतेसादृश्यस्यदोषस्यनिरुपायेननिरस्तेभ्रमेजातिव्यक्तिविभागानर्हशुक्त्यादियाथात्म्यमनु
भूतंभवतितद्वत् देहीतिइतिप्रत्ययोननित्ययोगेऽपितुसंबंधमात्रइतिभावः ८ एवमपित्रिभ्यांबोधितश्चित्रकेतुर्ज्ञातविवेकस्तावु
वाचेत्याहमुनिःएवमीति द्विजयोरंगिरोनारदयोरुक्तिभिरेवमाश्वासितःपरिसांत्वितोराजाचित्रकेतुराधिनापुत्रशोकेनम्ला
नंग्लानंवक्त्रंपाणिनाप्रमृज्यविशोध्याभाषतोवाच ९ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥ श्री

पथा

सर्वे चैते गंधर्वनगरभ्रमाः गंधर्वनगरेण तुल्यं भ्रमायंते प्रसिध्यंते तेन तथा गंधर्वनगरत्वेन प्रसिद्धाः गंधर्वाणां हि नगरमावासस्थानं न नियतं
तदेते ऽप्यनियताश्चंचलाः ऽनित्या इति यावत् प्रसिद्धं दृष्टांतांतरमाह स्वप्नमायामनोरथा इति स्वप्ने ये मायामनोरथाः मायाश्च रम्याश्चर्यवाच्या
श्चर्यरूपा मनोरथाः संकल्प [illegible] विकल्पात्मकमनोविषयाः देशांतरगमनराज्याभिषेकशिरश्छेदादयः ते चाश्चर्यभूता एव न तत्सुख
षानुभावकत्वेन चाल्पकालानुभाव्यपुण्यपापात्मककर्मफलत्वेन चेश्वरसृष्टानां जाग्रदवस्थानुभाव्यपदार्थेभ्यो विलक्षणत्वात् स्वप्नमा
यामनोरथवदनित्या इत्यर्थः द्वयोस्तु विशेषः स्वप्नमायामनोरथाः तत्कालमात्रावस्थायिनः एते तु तदपेक्षया किंचिच्चिरकालावस्थायिन इ
त्यनित्यत्वं तत्तज्जीवकर्मानुसारेण सृष्टत्वं मनःप्रभवत्वं सुखमात्राहेतुत्वं चोभयत्राप्यविशिष्टं २३ तदेवाह दृश्यमाना इति स्पर्थेन परम
पुरुषार्थेन निरतिशयानंदेन विना दृश्यमानाः न दृश्यंते कालांतरेपि न दृश्यंते जाग्रत्स्वप्नावस्थाद्वयानुभाव्याः पदार्था मनोभवाश्च ननु स्वा
प्नपदार्था मनोभवा इति नु युक्तं तेषां यथा स्वप्नदृष्टुः कर्मानुसारेण मनः संकल्पविकल्पौ करोति तदनुसारेणेश्वरसृष्टत्वेन मनो निमित्त

संकल्प

सर्वेपि शूरसेनेमे शोकमोहभयार्तिदाः गंधर्वनगरभ्रमाः स्वप्नमायामनोरथाः २३ दृश्यमाना विनार्थेन न दृश्यंते मनोभवाः कर्म
भिर्ध्यायतो नानाकर्माणि मनसो भवन् २४ अयं हि देही नो देहो द्रव्यज्ञानक्रियात्मकः देहिनो विविधक्लेशसंतापकृदुदाहृतः २५॥

कत्वात् जाग्रदवस्थानुभाव्यानां तु पुत्रदारादीनां कथं मनःप्रभवत्वं तत्राह कर्मभिरनादिवासनारूपैरर्थान्विषयान्मनसा ध्यायतः पुंसस्तावत्
कर्माणि मनसो भवन् अनादिकर्मवासनावासितमनःसंपृक्तो हि यो विषयान्ध्यायं स्तावत्कर्माणि करोतीत्यर्थः २४ ततस्तत्कर्मफलानुभवाः
यास्य देहिनः द्रव्यज्ञानक्रियात्मकः द्रव्यं भूतपंचकं ज्ञानानि ज्ञानेंद्रियाणि क्रियाः कर्मेंद्रियाणि एतदात्मक एतत्संघातरूपः अयं देहोऽस
देहिनः विविधक्लेशरूपसंतापे क्लेशसंतापशब्दौ वैषयिकं परोवा वैषयिकसुखस्यांततः क्लेशात्मकत्वात्करोति इति तयोदाहृतः [illegible]
कथित इत्यर्थः प्रथममनादिवासनावासितेन मनसा विषयचिंतनं तया विषयलाभोपयुक्तानि पुण्यपापात्मकानि कर्माणि कर्म
भ्यः क्लेशसंतापकृद्देहः तेन पूर्वजन्मकृतकर्मफलशब्दादि विषयमनुभवतः पुनरपि विषयचिंतनात् पुनस्तया कर्माणीत्येवमि
यं परिवृत्तिः वासनावासितमनोमूलिकेति सर्वं मनःप्रभवा इति भावः २५ ॥ ॥ ॥श्री॥ ॥ ॥

मा०ब०
६२

राम
६२

किमर्थमागतावित्यत्राह इत्थं इति पुत्रशोकेनेत्थं दुस्तरे तमसि अज्ञाने मग्नमतदर्हं शोकानर्हं महापुरुषगोचरं उत्तमपुरुषैरनुग्राह्यं त्वा
मनुस्मृत्य प्रत्यभिज्ञाय भवतोनुग्रहाय भवंतमनुग्रहीतुमावां प्राप्तौ हे प्रभो ब्रह्मण्यो ब्रह्मकुले साधुर्ब्रह्मण्यः तत्रापि भगवद्भक्तः नावशी
वसीदितुं दुःखितुं नार्हतीति यथा पूर्वमागतस्तथा त्वद्गृहं यस्मादागतोहं तेन तुभ्यं परं ज्ञानं दद्यामि भगवद्भक्त इत्यत्रादिकमीत्युक्तं आरब्धभ
गवद्भक्तियोगः भक्तिमोगारंभभूतायाः सत्संगतेः कृतत्वादितिभावः २८ तर्हि पूर्वमेव ज्ञानं किं न ददास्यत्राह तदैवेति पूर्वमेव
तेतुभ्यं परं ज्ञानं गृहमागतोहं ददामि परं तु तेन त्वान्याभिनिवेशं पुत्राभिलाषं ज्ञात्वा तेतुभ्यं पुत्रमेवाहं दत्तवान् २० ननु ममान्याभि
निवेशोसत्यपि तस्य दुःखोदर्कतां ज्ञापयितुं ज्ञानमेव किं न दत्तवानित्यपेक्षायामभिलाषितपुत्रप्रदानमंतरेण दत्तमपि ज्ञानं न सुप्रति
ष्ठितं भवति पुत्रोत्पत्तिविपत्तिभ्यामनुभूतसुखदुःखस्य तदृष्टांतेनेतरेषामपि वैषयिकसुखानां सुखोदर्कतामनुमन्यमानस्य संजात(

इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे अतदर्हमनुस्मृत्य महापुरुषगोचरं २८ अनुग्रहाय भवतः प्राप्तावावामिह
प्रभो ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति २९ तदैव ते परं ज्ञानं ददामि गृहमागतः ज्ञात्वाऽन्याभिनिवेशं ते पु
त्रमेव ददावहं २० अधुना पुत्रिणां तापो भवतैवानुभूयते एवं दारा गृहा रायो विविधैश्वर्यसंपदः २१ शब्दादयश्च
विषयाश्चला राज्यविभूतयः मही राज्यं बलं कोशो भृत्यामात्यसुहृज्जनाः २२ ॥श्रीराम राम राम राम राम राम॥

ते.१ वैराग्यस्यानुदये ज्ञानं सुप्रतिष्ठितं भवतीत्यालोच्य न दत्तवानस्मीत्यभिप्रायतः पुत्रदृष्टांतेनेतरेषामप्यंततो दुःखहेतुतां निदर्शयति अधुने
ति यथैव भवता पुत्रिणां तापोऽधुनानुभूयते ज्ञायते एवं दारादयोपि सर्वे हे शूरसेनेश शोकमोहभयार्तिदाः संत एवानुभविष्यंते भ
वतैव भवतेवेति पाठे अधुना भवतेव त्वयेव सर्वैरपि एव पुत्रिणां तापोनुभूयते सर्वैरपि पुत्रिभिस्तापोनुभूयत इत्यर्थः शोकमोहा
दिप्रदः तथा दारादयोपीत्यन्वयः तत्र रामा विहारवनानि विविधा ऐश्वर्यसंपदः प्रशास्तृत्वप्रभुत्वभोगोपकरणादि समृद्
यः २१ तथा हे राजन् भोगाः शब्दादयो विषयाः विभूतयो अणिमादयः मही राज्यं राज्ञः कर्म भावो राज्यं स्वामित्वं महाराज्यं सार्व
भौमत्वं इत्यर्थः बलं चतुरंगयुक्तं कोशो धनसंचयः २२

शेषमवशिष्टमायुर्जीवनं यस्य तत् कलेवरं समाविश्य अथ मम सुनाम तवावशेषमायुरित्युक्तं सुहृद्भिः परिवृतस्त्वं रपासनमधितिष्ट
न्पित्र्याश्वत्नान्दत्तान्भोगान्भुंक्ष्व ३ इत्युक्तो जीवस्तत्कलेवरमाविश्य यावदरि त्याह कस्मिन्नित्यादिना द्वाभ्यां रह इत्येतेन तावत्पि
तृपुत्रत्वादिसंबंधस्यानियतत्वमाह द्वाभ्यां देवतिर्यङ्मनुष्ययोनिषु कर्मभिः पुण्यपापरूपैः भ्राम्यमाणस्य जायमानस्यात एव तत्र
तत्रैतत्स्वरूपविशेषान्ध्रुतितन्निरूपितेबंधत्वादिभावं प्राप्तस्य मम अमी विभक्तिव्यत्ययश्चार्षः अमी चित्रकेत्वादयः कस्मिन्जन्म
नि पितरः मातरश्चाभवन्न सर्वेषु जन्मसु च भवन्किं वेतस्मिन्नेवातः पितृपुत्रत्वादिसंबंधेन नियत इति भावः यद्वा कस्मिन्जन्मनि मम
मी पितरो मातरश्चाभवन् ४ ननु सर्वेष्वपि जन्मसु च भवंतीत्यत्राह बंध्विति सर्वे जीवाः सर्वेषां जीवानां क्रमशः जन्मपरंपराभिः

कलेवरं त्वमाविश्य शेषमायुः सुहृद्वृतः भुंक्ष्व भोगान्पितृप्रत्तानधितिष्ठ नृपासनं ३ जीव उवाच ॥ कस्मिन्जन्मन्यमी
मह्यं पितरो मातरोऽभवन् कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु ४ बंधुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः सर्व ए
व हि सर्वेषां भवंति क्रमशो मिथः ५ यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः पर्यटंति नरेष्वेवं जीवो योनिषु कर्तृ
षु ६ नित्यस्यार्थस्य संबंधो ह्यनित्यो दृश्यते नृषु यावद्यस्य हि संबंधो ममत्वं तावदेव हि ७ ॥श्री॥श्री॥श्री॥श्री

मिथः क्रमेणोक्तसंबंधवादयो भवंतीत्यन्वयः तत्र बंधवो विवाहादिभिः संबंधिनः ज्ञातयः सपिंडाः अरयो घातुकाः मित्राणि स्नेहकाः
मध्यस्था उभयव्यतिरिक्ता विद्विषो द्रुहः आदिनिमित्तेन द्वेषिणः उदासीनास्तद्व्यतिरिक्ता इति भेदः ५ कर्मभिर्भ्राम्यमाणत्वे दृष्टांत
माह यथेति यथा पण्यानि क्रय्याणि हेमादीनि हेमविकाररूपाणि निष्कांगुलीयकादीनि वस्तूनि कर्तृषु व्यवहर्तृषु नरेषु तत
स्ततः पर्यटंति एवं जीवाश्चापि देवतिर्यङ्मनुष्ययोनिषु भ्रमंति संसरंति ६ एकस्मिन्नपि जन्मनि संबंधस्यानियतत्वं सदृष्टांत
माह नित्यस्येति द्वाभ्यां नित्यस्याविद्धृतस्य जीववत्स्थिरस्येति यावत् तस्य पश्वादेरर्थस्यानित्यः संबंधो न नियत इति भावः तद्वो
पपादयति यावदिति यस्य पुंसो येन पश्वादिना यावत्संबंधः क्रयादिनिमित्तः संबंधोऽस्ति तस्य ममत्वं स्वामित्वादिसंबं

३२

प्रश्नावदेवाहृष्टी नोत्तरलोक वमसिंहृद्यालमवि १ ?

राम ६३

तस्मात्पुत्रदारादीनां सर्वेषां स्वात्मकल्पितत्वात्स्वस्थेन विक्षेपरहितेन मनसाऽऽत्मनः प्रत्यगात्मनो गतिं स्वरूपं विमृश्य बुद्धीन्द्रियमनःप्रा
णादिभिर्भिन्नत्वेन ज्ञानानंदादिस्वरूपत्वभावत्वेन परमात्मशरीरत्वेन च विमृश्य पदैते उक्तविधप्रत्यगात्मगतदेवमनुष्यादिभे
दाभिन्ने स्थिरेशरीरे ध्रुवार्थविस्रंभमात्माभिमानं त्यज उपशमं वैराग्यं माविश्य विरक्तो भवेत्यर्थः २६ एवमंगिरसोक्त्यादिना विवेका
यच्चित्रकेतवे भगवान्नारदो मंत्रविद्यामुपदिदिक्षुस्तावत्प्रभावमाह एतामिति एतामुपदेक्ष्यमाणां मंत्रोपनिषदं प्रयतः समाहि
न्वितः मम उपदेक्ष्यतो मत्तः प्रतीच्छ स्वीकुरु यां मंत्रोपनिषदं धारयमाणो भवान्सप्तरात्रादूर्ध्वं भगवंतं संकर्षणं द्रष्टा द्रक्ष्यति
२७ संकर्षणं विशिनष्टि तस्य तत्त्वाकारमूलमाह यदिति हे नरेंद्र यस्य भगवतः संकर्षणस्य पादमूलमुपसृत्य साश्रित्य पूर्वे शर्वाद्
दयः द्वितयं द्वावयवौ यस्य द्वितयं द्विदलात्मकं भ्रममवब्रह्मात्मकं स्वतंत्रात्मकत्वरूपदलद्वयात्मकं भ्रमं विसृज्य अतुलानधिकं

तस्मात्स्वस्थेन मनसा विमृश्य गतिमात्मनः द्वैते ध्रुवार्थविस्रंभं त्यजोपशममाविश २६ नारद उवाच एतां मंत्रोपनि
षदं प्रतीच्छ प्रयतो मम यां धारयन्सप्तरात्राद्द्रष्टा संकर्षणं विभुं २७ यत्पादमूलमुपसृत्य नरेंद्र पूर्वे शर्वादयो भ्रममिमं द्वित
यं विसृज्य सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं न चिरादुपैति २८ इति श्रीभागवते महापुराणे षष्ठ
स्कंधे पंचदशोऽध्यायः ॥१५॥ श्रीशुक उवाच अथ देवऋषी राजन्संपरेतं नृपात्मजं दर्शयित्वेति होवाच ज्ञातीनामनु
शोचनं १ नारद उवाच जीवात्मन्पश्य भद्रं ते मातरं पितरं च ते सुहृदो बांधवास्तप्ताः शुचा त्वत्कृतया भृशं २

निःसमाभ्यधिकं तदीयं संकर्षणसंबंधि महत्त्वं माहात्म्यं प्रापुः तथा भवानपि चिरादाशु परं माहात्म्यमुपैति २८ षष्ठे पंचदशः ॥ एवमुपदेश
माणं मंत्रोपनिषद्ग्रहणे तस्य रुचिमुत्पाद्यांगिरसोपदिष्टेषु वैराग्योपायादिके षष्ठेषु चित्रकेतुप्रभृतीनां विस्रंभयोत्तनायमजके पुनर्जीवं स्वयो
गमहिमाविरूपतन्मुखेनांगिरसोपदिष्टानर्थानवीवदन्नारदस्त्वाह मुनिः अथेति हे राजन्स देवर्षिर्नारदः संपरेतं मृतं नृपात्मजं रोद
तेताचीनां चित्रकेत्वादीनां दर्शयित्वा योगप्रभावेनाविष्टजीवं पुरस्तात्दृश्यमानं उवाच हे त्वा अथ ... होनारदप्रभावो यन्मृतमपि पु
नरञ्जीवयतीति १ उक्तमेवाह जीवात्मन् हे जीवात्मन् ते भद्रं प्रविष्टशरीर ते तव मातरं पितरं सुहृदादीन् त्वन्निमित्तया शुचा भृशं तप्ता
न्पश्य बांधवास्तप्ता इति प्रथमांतपाठे मातरं पितरं च पश्य बांधवाः सुहृदश्च त्वत्कृतया शुचा तप्ता अतस्तान्पश्येत्यन्वयः २

सर्वधियां द्रष्टेत्यनेन तस्य सर्वज्ञत्वं गुणपापकर्तृत्वं तत्फलभोक्तृत्वं चाभिप्रेतं तन्नेत्याह नादत्त इति आत्मा परमपुरुषो गुणदोषौ नादत्ते न स्वी
करोति गुणदोषकर्तृत्वमात्मनि न मन्यते न च तत एव क्रियाफलं सुखदुःखादिकं च नादत्ते किंतूदासीनः उदासीनवज्जीवांतराले तथा स्थितः वल
क्षणेनात्वं नोदासितत्वमपि नास्तीत्यावेदितं गुणदोषयोस्तस्य प्रयोजककर्तृत्वात् साक्षात्कर्तृत्वाभावादुदासीनत्वं तत्तत्पूर्वकर्मवासनानुसा
सि४ रेण प्रयोजयितृत्वाच्चानुदासीनत्वमपि विषयभेदादुभयोरेकस्मिन्न विरोध इति भावः ननु जीवस्यापि न गुणदोषयोः साक्षात्कर्तृत्वं त
स्य निष्क्रियत्वाद्देहस्यैव साक्षात्कर्तृत्वात् किंतु देहेंद्रियादिनियमनस्यैव तस्य कर्तृत्वं एवं च प्रयोजयितृत्वं जीवपरयोरप्यविशिष्टमिति क
थमन्यतरस्य क्रियाफलोपादानमन्यतरस्य नेति विभागस्तत्राह परावरदृगीश्वर इति स्वयमीश्वरो देहेंद्रियमनःप्राणपर्यंतानां नियंता
१२ स परावरदृक् स्वपरं प्रकृतिपुरुषाभ्यां विलक्षणं स्वस्वरूपं परं जीवस्वरूपं प्रकृतिस्वरूपं च ज्ञानत्रितयं यथावत् पश्यतीति परावरदृक् जीव
स्तु कर्मणा तिरोहितस्वभावः प्रकृतिमेवात्मानं तत्कृतं कर्तृत्वं स्वस्मिन्मनुत इति स क्रियाफलभोक्ता भवति परमात्मा तु नित्यासंकु

नादत्त आत्मा हि गुणं न दोषं न क्रियाफलं उदासीनवदासीनः परावरदृगीश्वरः ११ श्रीशुक उ० इत्युदीर्य गतो जीवो ज्ञातयस्तस्य
ते तदा विस्मिता मुमुचुः शोकं छित्वात्मस्नेहशृंखलां १२ निर्हृत्य ज्ञातयो देहं ज्ञातेः कृत्वोचिताः क्रियाः तत्यजुर्दुस्त्यजं स्नेहं शोक
मोहभयार्तिदं १३

चितापरिच्छिन्नानुभूतस्वपरयाथात्म्यविज्ञानाद्देहात्मभ्रमाभावेन न क्रियाफलभोक्तेति भावः नहीत्यादिश्लोकद्वयं जीवपरतयापि व्या
ख्येयं तथाहि पूर्वप्रस्तुतं जीवस्वरूपमेव तिरोधीयते नहीति अस्य जीवस्य प्रियाप्रियौ न भवतः अपितु कर्मकृता विस्पर्धाः तथा स्वपरवि
भागोऽपि न एकः एकरूपः ज्ञानैकाकारः देहगतविकारैरस्पृष्टत्वेन न सदेकरूपस्य इति वा गुणदोषयोः कर्तृणां हेतुभूतानां सर्वधियां द्रष्टा
आश्रयः नादत्त इति विवेकी आत्मा गुणदोषान्वयं नाभिमन्यत इत्यर्थः ईश्वरः देहादिनियमनपरः परावरदृक् स्वस्वरूपप्रकृति
स्वरूपयोर्द्रष्टेत्युक्तवान्न विशेषो जीवः ११ तदुपरिवृत्तांतमाह मुनिः इतीति इतीत्थमुदीर्योक्त्वा पुनर्जीवः कलेवराद्विनिष्क्रम्य गतस्त
तस्तस्मात् तस्य ये ज्ञातयः ते तथा विस्मिताः संतः आत्मनो स्वेषां यः पुत्रादिविषयकः स्नेहः स एव शृंखला निगडस्तां छित्वा प्रोद्भूतशोकं मु
मुचुः १२ ततो ज्ञातयः तं शवमग्नेर्निहृत्य दग्ध्वा ज्ञातेः उचिताः मृतोद्देशेन कर्तव्याः क्रियाः कृत्वा शोकमोहादिप्रदं दुस्त्यजं स्नेहमनुरागं
तत्यजुः १३

एवं दृष्टान्तेनोपपादितमर्थं दार्ष्टान्तिके दर्शयति एवमिति सप्रसिद्धो निरहंकृतः वस्तुतो देहाद्यभिमानरहितोऽपि जीवः कर्मणा योनि गतो देवादिशरीरेष्वनुप्रविष्टः सन् यत्र देवादिशरीरे नित्योऽपरित्यक्तदेहो यावदुपलभ्यते तावदेव तस्य स्वत्वं स्वीयत्वं हि तस्य पित्रादयः स्वीया भवन्ति तावदेव तस्येतरैः पितृपुत्रत्वादिसंबंध इति यावत् तस्मात्तत्रोपलभ्यमानत्वादित्यर्थः यद्वा यत्र शरीरे यावदुपलभ्यते तस्य शरीरस्य तावन्तं कालं जीवात्मानं प्रति स्वत्वं ततस्मात्तत्रोपलभ्यमानत्वादित्यर्थानुपलंभे तु आत्मनिरूपितस्वत्वस्यैव शरीरेऽभावाच्छरीरनिरूपितपुत्रादिसंबंधो दूरापास्त इति भावः ८ तर्हि कीदृशं तस्य स्वरूपं यत्स्वरूपगतो न भवत्यनित्यः पितृपुत्रत्वादिसंबंध इत्यत्राह एष जीवो नित्यः आद्यन्तरहितः कुतः अव्ययः नाशरहितः तत्कुतः सूक्ष्मः विनाशकैरग्राह्यः निरतिशयसूक्ष्मत्वात् विनाशका हि जलाग्निविषशस्त्रादयो विनाश्यं व्याप्य विनाशयन्ति तस्य तु निरतिशयसूक्ष्मतया सर्वान्तःप्रवेशनस्वभावत्वेनाव्याप्यत्वादव्ययाकः शानेकाकारः एको व्रीहिः सुसंपन्न इतिवज्जात्यभिप्रायमेकत्वकथनं न तु जीवस्वरूपैकत्वाभिप्रायकं तत्स्वरूपनानात्वस्य वहुप्रमाण

एवं योनिगतो जीवः स नित्यो निरहंकृतः। यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य तत् ८ एष नित्योऽव्ययः सूक्ष्म एष सर्वाश्रयः स्वदृक्।
आत्ममायागुणैर्विश्वमात्मानं सृजते परः ९ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा। एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः १०

प्रतिपन्नत्वात् सर्वाश्रयः सर्वेषां बुद्धीन्द्रियमनःप्राणादीनामाश्रयो धारकः स्वमात्मानं पश्यतीति स्वदृक् प्रत्यगनुभवः यद्वा स्वेनैव दृश्यत इति स्वदृक् स्वयंप्रकाशः अस्त्वीदृशं तस्य स्वरूपं किमस्य स्वानर्थावहदेवमनुष्यादिशरीरं स्वयमेव सृष्ट्वा तत्र प्रविष्टोऽनर्थमनुभवति उतान्यकीयकर्मणा सृष्टे प्रविष्टोऽनुभवतीत्यत्राह आत्मेति [illegible] न स्वानर्थावहं शरीरं स्वयं सृजति नापि केवलं कर्म अपि तु परः परमपुरुषः आत्मनः स्वस्य मा

भि९ यया तस्या गुणैः सत्त्वादिरात्मानं प्रत्यगात्मानं विश्वं देवमनुष्यादिविश्वाकारं सृजति ९ ननु कोऽसौ परः पुरुषः यदि कश्चित्सिध्यति तर्हि सोऽपीश्वरो देवादिविषमसृष्टिं जन्मजरामरणाद्यनेकदुःखजातं कुर्वन्वैषम्यनैर्घृण्ययुक्तः संसृष्टजीवानां स्यादिति चेत्तत्राह न हीति अस्य परमपुरुषस्य कश्चिदतीव प्रीतिविषयः कश्चिच्चाप्रियः स्वीयः परकीयो वा नास्ति किं तु सर्वेषु समदृष्टिरिति भावः तर्हि कथं विषमं सृजतीत्यत्राह एक इति गुणदोषयोः पुण्यपापयोः कर्तॄणां जीवानां सर्वबुद्धिवृत्तीनां एक एव द्रष्टा भवति तस्य सामान्येन द्रष्टृत्वेऽपि देवादिवै

स्प१ षम्यं तत्तज्जीवसंबंधिपुण्यपापमूलकत्वान्न तस्य वैषम्यादिदोषप्रसक्तिरिति भावः १० ॥ ॥ ॥श्री॥ ॥ ॥

तेर

भा०ष०
६५

स्वात्मानंदानुभवेनैवन्यस्तानिरस्ताःशाक्र्यास्ववलेनोर्मयःअशनापिपासाशोकमोहजरामरणरूपाःषडूर्मयोयस्यतस्मैहृषीकाणामिं
द्रियाणांतदधिपतेरीशायनियंत्रेकरणाधिपायेत्यर्थः महतेस्वस्वरूपेणगुणैश्चानिरतिशयवते विविधेर्विचित्रानंतशक्तयेतुभ्यंनमः।
२० एवंनमनंविधायाथतस्मात्स्वरक्षांप्रार्थयते वचसीति मनसासहवचसिउपरतेनिवर्तेसत्य वचोरभावाङ्मनसयोर्निवर्तयोःअ
प्राप्यअपरिच्छिन्नतयाअनुसंधेयः अतएवैकनिःसमाभ्यधिकः प्राप्येत्यविभक्तिकपाठःअप्राप्येतिछेदःतदामनसासहाप्राप्यवाधं
वचसुपरतेसतियः अपरिच्छिन्नानंदरूपस्तिशेषः वाङ्मनसापरिच्छेद्योअपरिच्छिन्नानंदरूपइत्यर्थः चिन्मात्रःज्ञानैकाकारःअतएवेकः
निःसमाभ्यधिकःकर्मकृतनामरूपरहितःसदसत्परःचेतनाचेतनाभ्यांविलक्षणःसःप्रसिद्धःभगवान्नोऽस्मान्रक्षतु अत्रश्रुतिपदमु

34

॥ आत्मानंदानुभूत्यैवन्यस्तशक्त्यूर्मयेनमः हृषीकेशायमहतेनमस्तेनंतशक्तये २०
॥ वचस्युपरतेप्राप्ययएकोमनसासह अनामरूपश्चिन्मात्रःसोऽव्यान्नःसदसत्परः २१

टीव२

पनिषदर्थांश्चाभिप्रेताः विज्ञानमात्रायपरमानंदमूर्तयइत्यनेनविज्ञानमानंदंब्रह्मेतिश्रुत्यर्थः आत्मारामायेत्यनेनसर्वैश्वर्यसंपन्नः
शंभुराकाशमध्यगाइति निरस्तद्वैतदृष्टयेअ नामरूपेश्वैत्यनेनअस्थूलमनण्वित्ति आत्मानंदेत्यादिनाअशनापिपासेशोकमोहौजरामृत्यु
अत्येति हृषीकेशायेत्यनेनसत्यंज्ञानमनंतंब्रह्मेतिअनंतशक्तयइत्यनेनतस्यकार्यंकरणंचविद्यतेनतत्समश्चाभ्यधिकश्चदृश्यतइति
सदसत्परइत्यनेनभोक्ताभोग्यंप्रेरितारंचमत्वात्रिविधंब्रह्ममेतत् तेराराभिज्ञातेदेवएकःयोऽस्मिन्नंतरेसंचरन्यस्यापृथ्वीशरीरंसोत्तरमंतरे
संचरन्यस्याक्षरंशरीरमितिश्रुत्यर्थोऽभिप्रेताः२१

राम
६५

परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेति वचस्युपरतेइत्यादिनायतोवाचोनिवर्तंतेअप्राप्यमनसासहआनंदंब्रह्मणइ
तिएकइत्यनेनश्रुर

ततो वालघ्नः याग रद्दानेन वालंहतवत्यः ताः सर्वा द्विजेन आंगिरसा भाषितं स्मरंत्यो व्रीडिता लज्जिता वालहत्यया हताः प्रभाः यासां ताः य
द्वालहत्याव्रतं वालहत्यापनोदकं व्रतं ब्राह्मणैर्यन्निरूपितं कर्तव्यत्वेन वोधितं तच्च यमुनायां हे महाराज चेरुः अनुष्ठितवत्यः १४ ततः स
चित्रकेतुः इत्थं द्विजोक्तिभिः अंगिरस उक्तिभिर्जीवन संवादिनीभिर्नारदोक्तिभिश्च प्रतिबुद्धः उदितः आत्मविवेको यस्य तादृशः सरसः
पंकाद्गज इव गृहरूपात् अंधकूपात् तस्मात् निष्क्रांतः निर्गतः १५ कालिंद्यां यमुनायां विधिवत् स्नात्वा कृताः पुण्यजलक्रियाः पित
तर्पणाद्यो येन तादृशः मौनेन परमात्मस्वरूपसंशीलनेन नहेत्वर्थे तृतीया मौनार्थं संयतेंद्रियः नियमितांतर्वहिरिंद्रियः [illegible] संभाषण
रहितरूपेण मौनेन वा ब्रह्मपुत्रौ नारदांगिरसौ अवंदत दंडवन्ननाम १६ ततस्तस्मै प्रपन्नाय यथाविधि गुरूपसत्तिं कृतवास्थितायभक्ताय

वालघ्नो व्रीडितास्तत्र वालहत्याहतप्रभाः वालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितं यमुनायां महाराज स्मरंत्यो द्विजभाषितं॥
१४ स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः गृहांधकूपान्निष्क्रांतः सरःपंकादिव द्विपः १५ कालिंद्यां विधिवत्स्नात्वा कृतपुण्य
जलक्रियः मौनेन संयतप्राणो ब्रह्मपुत्राववंदत १६ अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने भगवान्नारदः प्रीतो विद्यामेतामुवा
चह १७ श्रीनारद उ० नमस्तस्मै भगवते वासुदेवाय धीमहि प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च १८ नमो विज्ञानमा
त्राय परमानंदमूर्तये आत्मारामाय शांताय निवृत्तद्वैतदृष्टये १९

गुरुभक्तियुताय प्रयतात्मने श्रवणादियुक्त प्रयत मनस्काय भ
गवान्नारदः शिष्यलक्षणैर्हर्षितः एतां वक्ष्यमाणां विद्यां मंत्रोपनिषदमुवाच उपदिदेश १७ नारदेनोपदिष्टां विद्यामेवाह नम इत्यादि
ना परमेष्ठिन्नमस्त इत्यंतेन तावत्सकलेतरविलक्षणं परमात्मानं निरोधप्रग्रणमति वासुदेवादिचतुर्व्यूहात्मनावस्थिताय तस्मै
तुभ्यं भगवते नमः एवंभूतं त्वां धीमहि ध्यायेमहि १८ विज्ञानमात्राय क्वचिदपि जाड्यरहिताय निरतिशयानंदस्वरूपायात्मारामाया
त्मन्येव रममाणाय सुखांतरनिरपेक्षायेत्यर्थः शांताय रागादिरहिताय निवृत्तद्वैतदृष्टये सर्वेषु हृदयः निवृत्ता द्वैतस्य दृष्टिर्जी
त्वादिकल्पना यस्य तस्मै जात्यादिकल्पनारहितायेत्यर्थः निवृत्तद्वैतदृष्टये इति पाठे निवृत्ता द्वैत दृष्टिः स्थूलत्वाणुत्वादिभेददर्शनं य
स्मिन् तथा च श्रूयते अस्थूलमनण्वह्रस्वमगोत्रमचक्षुः श्रोत्रं तदपाणिपादं इत्यादि एवंभूताय भगवते षड्गुणपूर्णाय नमः इत्यर्थः १९

श्री०
भा०ष०
६६

किंच मनआदीनां तदाहितज्ञानक्रियादिशक्तिमत्वेन तत्तद्विषयी कुर्वतीति स दृष्टान्तमाह देहेति अमी देहेन्द्रियादयः यदंशविद्धाः यदास्य शक्तिर्विविधे
वक्ष्यते स्वाभाविकी ज्ञानबलक्रिया चेत्युक्तज्ञानक्रियादिशक्तिमतो ब्रह्मणोंशेन ज्ञानक्रियाशक्तिविषयानुविद्धा अप्राणाः कर्मसु स्वस्वव्यापारेषु प्रवर्त
न्ते प्रवर्तन्ते अन्यथा यदंशानननुविद्धास्तु न प्रचरन्ति ते षामचेतनत्वपरिणामरूपत्वेन वस्तुतो ज्ञानशक्तिविरहादिति भावः तत्र दृष्टान्तः लोहमिति यथा
प्रतप्तं लोहं दहति दाहकशक्तिना अग्निनानुविद्धमेव लोहमितरं दहत् अग्निनाननुविद्धं तु इतरदपि न दहतीति तथा परमात्माहितज्ञानक्रिया
शक्तयो देहेन्द्रियादयः स्वस्वविषयेषु प्रचरन्ति न परमात्मनाहितशक्तयस्तु स्वस्वकर्मस्वपि न प्रचरन्तीत्यर्थः नन्विन्द्रियाणां स्वतो ज्ञानशक्ति
विरहात् तमाविषयीकुर्वन्तु जीवस्तु स्वभावतो ज्ञानशक्तिमत्वात्तं विषयीकुर्यात्तत्राह स्थानेष्विति तत्तज्जीवेऽपि स्थानेषु द्रष्टृत्वदेशांद्रष्टृत्वव्यपदेशो मेति

देहेन्द्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरन्ति कर्मसु नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद्द्रष्ट्रपदेशमेति २४
ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सकलसात्वतपरिवृढनिकरकरकमलकुड्मलोपला-
लितचरणारविंदयुगलपरमेष्ठिन् नमस्ते २५ श्रीशुक उवाच॥ भक्तायैतां प्रपन्नाय विद्यामादिश्य नारदः ययावंगिरसा
साकं धाम स्वायंभुवं प्रभो २६ चित्रकेतुस्तु विद्यां तां यथा नारदभाषितां धारयामास सप्ताहमब्भक्षः सुसमाहितः २७

35

गच्छति ईश्वरसंकल्पादेव जीवस्य ज्ञानविकास इत्यर्थः २४ भगवते पूर्णषाड्गुण्याय पुरुषाय पुरुषसूक्तप्रतिपाद्यमहापुरुषायानन्दवामहा
नुभावाय महाविभूतेर्योगैश्वर्यलीलाविलासविभूतेरधिपतये तुभ्यं नमः सकलाये सात्वतपरिवृढा भागवतश्रेष्ठास्तेषां समूहास्तेषां करकमला
नां कुड्मलैर्मुकुलैरुपलालितं चरणारविंदयुगलं यस्य तस्य संबोधनं परमनिः समाभ्यधिकपरमेष्ठिन्परमस्थाने स्थित ते तुभ्यं नमः २५ हे प्र
भो राजन् प्रपन्नाय चित्रकेतवे एवमेतां विद्यामुपदिश्यांगिरसा सह नारदः स्वायंभुवं धाम सत्यलोकं ययौ पूर्वं नारदेन सहांगिरा आजगामेति
प्राधान्येनोक्तोंगिराः चित्रकेतोः पुत्रदत्वेन तस्य प्रथमं वैराग्यजननद्वारोपकारकत्वादिह नारदोंगिरसा साकं ययावित्युक्तिः नारदः प्राधान्येन निर्दिष्टः
विद्योपदेशेन तस्य महोपकारत्वात् २६ एवमुपदिष्टश्चित्रकेतुस्तां नारदेन भाषितां उपदिष्टां विद्यां यथाविधि सुसमाहितचित्तोऽप् एव भ

तपसा शिवसमावृथग्यामासकताप २

राम
६६

एवं सकलेन रविलक्षणो मोपनिषदं ब्रह्मविशेष्य ब्रह्मणा मन्ततः स्वेति श्रुतिरवृत्तिं आच्छायत देवं ब्रह्मजगज्जन्मादिकारणत्वेनोपलक्षणमाह यस्मि
न्निति सदसत्स्वरूपस्योदाहृत श्रुत्यर्थप्रत्यभिज्ञापकतया उक्तविधस्य स्वरूपस्य ब्रह्मणः अस्मिन् चिदचिच्छरीरकत्वं प्रत्यभिज्ञापितो वनिषद्भिरेव प्रतिपन्न
मित्यभिप्रेत्य चिदचिद्विशिष्टस्य जगत्कारणत्वं लक्षणमत्रोच्यते इदं स्थूलचिदचिदात्मकं जगत् ततः सूक्ष्मचिदचिद्विशिष्टाद्ब्रह्मणो जायते यस्मि
न्नप्येति लीयते यस्मिन्नुक्तविधे ब्रह्मस्वरूपे तिष्ठत्याधेयतया वर्तते ब्रह्मैव नेदं ब्रह्म सदेकमासीत् घ तो द्यावापृथिवी निष्टतक्षुरिति श्रुत्युक्तरी
त्या आधारोपि ब्रह्मैवेति भावः तत्र दृष्टान्तः मृन्मयेष्विति मृज्जातिरिति मृन्मयजातीयपरः यथा मृन्मयेषु मृज्जातीयघटशरावादिकारण
भूतेषु मृद्विकाररूपमृत्पिंडेषु मृज्जातीयो घटादिर्जायते अपादानस्याधिकरणत्वविवक्षया सप्तमी मृन्मयेभ्यो यथा मृज्जातिर्जायत इत्य
र्थः यद्वा मृन्मयेष्विति निमित्तसप्तमी निमित्तमत्रोपादानकारणं तथाच मृन्मयेभ्यो मृत्पिंडेभ्य उपादानकारणभूतेभ्यो मृज्जातीयो घटादि
र्जायत इत्यर्थः अथवा मृन्मयेष्विति यदमेव मृद्विकारघटादिपरं मृज्जातिर्मृत्पिंडः मृन्मयेषु घटादिषु कारणतयाऽनुस्यूतः अथवा यस्मि ५२

यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः २२ यं न स्पृशन्
ति न विदुर्मनोबुद्धीन्द्रियासवः अन्तर्बहिश्च विततं व्योमवत्तन्नतोस्म्यहं २३ ॥ राधाकृष्णाय नमः

न्नधितिष्ठतीत्यत्र दृष्टान्तः मृन्मयेषु घटादिषु मृज्जातिमत्त्वमधितिष्ठति अस्य यथा किंद्व प्रकारतया वर्तते तदिदं विश्वं चिदचिदात्मकमप्यपृ
थक्सिद्धप्रकारतया यस्मिन् वर्तते तस्मै ब्रह्मणे नमः अत्रापि यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीत्यादिश्रुत्यर्थोऽनुसंधेयः
२२ एवं प्रतिपदमोपनिषदर्थप्रत्यभिज्ञापनेनैतेनोपनिषदैकगम्यत्वं ब्रह्मणोऽभिसूचितं तदेव द्रढीकर्तुं तदितरप्रमाणाविषयत्ववदन्त्यं णमति यमिति २
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति श्रुत्युक्तरीत्या कृत्स्नं जगदन्तर्बहिश्च विततं व्याप्य स्थितमपि व्योमशरीरकं आकाशशरीरं ब्रह्मेति श्रु
तेः यं मनोबुद्धीन्द्रियासवो न स्पृशन्ति न विदुः तत्र कर्मेन्द्रियाण्यसवः प्राणा अभिव्यक्ति प्रधाना न स्पृशन्ति न विषयीकुर्वन्ति मनश्च बुद्धिश्च च
क्षुरादीनीन्द्रियाणि च यं न विदुरित्यन्वयः बुद्धीन्द्रियाद्यविषयत्वेन तन्मूलकप्रत्यक्षप्रमाणाविषयमिति भावः अतीन्द्रियत्वे हेतुः व्योमेति व्यो
मशरीरकत्वेन तदन्तः प्रवेशाद्योग्यतया तन्नतोपि सूक्ष्मत्वादिन्द्रियाविषयमिति भावः तद्ब्रह्मत्वामहं नतोस्मि २३ ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

श्री
भा० ष०
६७

तामेवाह अजितेत्यादिनासहस्रमूर्धइत्यंतेन तावदाश्रयणसौकर्यापादकसौलभ्यवात्सल्यमहौदार्यगुणविशिष्टंस्तौति हेअजितइतरैःस्वा
धीनंकर्तुमशक्यहेदुर्लभेत्यर्थः तथापिसाधुभिर्जितःतैर्भवानसुलभइत्यर्थः कथंभूतैःसाधुभिर्विजितःआत्मामनोयैस्सममतिभिःकृत्स्नंज
गद्ब्रह्मात्मकत्वेनपश्यद्भिः कथमेतत्साधुभिर्विजितोहमितितत्राह योभवान्भजतामकामात्मनामनन्यप्रयोजनेनभजतामात्मानंस्वंस्वरूपंददाति
त्यात्मदः एवंसौलभ्यमुक्त्वामात्मदइत्यनेनमहौदार्यंच अथवात्सल्यमाह भवतात्वयातेसाधवोपिजिताः कुतः यतस्त्वमतिकरुणआश्रितवात्स
ल्यविवशः अत्यंतवात्सल्येनत्वयासाधवोपिवशीकृताइत्यर्थः ३४ ननुपरत्वेसत्युक्तंगुणत्रयंम[illegible]वाश्रयणसौकर्यापादकमन्यथातृणस्येवसौ
लभ्यवद्दरिद्रस्येवौदार्यवत्पिशाचादेरिवकारुण्यवच्चाकिंचित्करंस्यादित्यत्रपरत्वविशिष्टंस्तौति तवेति हेभगवन्जगतःउत्पत्तिस्थितिलया

86

चित्रकेतुरुवाच अजितजितःसममतिभिर्भवान्जितात्मभिर्भवता विजितास्तेपिचभजतामकामात्मनांयआत्मदोतिकरुणः ३
४ तवविभवःखलुभगवन्जगदुद्भवस्थितिलयादीनि विश्वसृजस्तेंशांशास्तत्रमृषास्पर्द्धंतेपृथगभिमत्या ३५ ॥श्री॥श्री॥

दीनि आदिशब्देनमहानंदरूपमोक्षांतर्नियमनादिर्विवक्षितः तवविभवःऐश्वर्यमतस्त्वत्तःपरोनास्तीत्यर्थः एवंपरत्वंततएवनिरुपाधिकत्वा
मित्वंचोक्तं ननुजगदुत्पत्त्यादीनिब्रह्मरुद्रादीनांविभवोनममेत्यत्राह विश्वसृजइतिविश्वसृजोब्रह्मादयःतेतवांशांशाः अग्नेर्विस्फुलिंगाइ
वत्वदंशांशाभूतत्वात्तेषांविभवोजगदुत्पत्त्यादिरित्यर्थः त्वन्नियोगेनतेजगदुत्पत्त्यादिकर्तारइतिभावः ननुतेपिवयंविश्वस्यस्रष्ट्रादिकर्तारइ
तिस्पर्द्धंतेतत्राह तत्रेति तत्रतेषांत्वदंशांशत्वेसतितावन्मात्रएववयमपिपृथगीश्वराइत्यभिमानेनमृषतमीशितारंत्वांपरमपुरुषायंतं
इत्यज्ञात्वा मुधावृथैवस्पर्द्धंते तेषांस्पर्द्धामात्रमवशिष्यतेनत्वीशत्वंसिद्ध्यतिइतिभावः ३५ ॥ ॥ ॥श्रीरामचंद्रायनमः॥हरयेनमः॥

राम
६७

ततःसप्तरात्रांते धार्यमाणया विद्यया तत्प्रभावेनेत्यर्थः नृपश्चित्रकेतुः अविभक्तिकपाठे हे नृप विद्याधराणामधिपत्यं च लेभे चशब्दोऽन्वाये चैव
रः आनुषंगिकं विद्याधराधिपत्यं लब्धवानित्यर्थः २८ अथानंतफलमाह ततः कतिपयैरहोभिर्विद्ययाऽऽद्धेन रोद्धेन मनसा गतिर्यस्य विद्याप्रभावे
न पथेऽगतिरित्यर्थः देवदेवस्य शेषस्य संकर्षणस्य चरणसमीपं जगाम पाताललोकादधःस्थितसंकर्षणसमीपं गतवानित्यर्थः २९ संकर्ष
णं वर्णयन्तं ददर्शेत्याह मृणालेति मृणालवत्स्वच्छतनुवद्गौरं शुभ्रं शितिनिवाससं नीलांबरं स्फुरंति किरीटादीनि यस्य कटित्रं कटिसूत्रं प्रसन्ना
नि वक्त्राणि यस्यारुणानि लोचनानि यस्य तं च सिद्धेश्वराणां समूहैर्वृतं परिवेष्टितं विभुं संकर्षणं ददर्श ३० ततस्तस्य संकर्षणस्य दर्शनेन तध्व
स्तं किल्बिषं यस्य अत एव स्वच्छमंतःकरणं यस्य अत एव प्रवृद्धया भक्त्या प्रणयाश्रुभ्यां आनंदबाष्पं लोचनयोर्यस्य प्रहृष्टान्युद्गतानि रोमाणि

ततश्च स सप्तरात्रान्ते विद्यया धार्यमाणया विद्याधराधिपत्यं स लेभेऽप्रतिहतं नृपः २८ ततं कतिपयाहोभिर्विद्ययेद्धमनोगतिः ॥
जगाम देवदेवस्य शेषस्य चरणांतिकं २९ मृणालगौरं शितिवाससं स्फुरत्किरीटकेयूरकटित्रकंकणं प्रसन्नवक्त्रारुणलोचनं
वृतं ददर्श सिद्धेश्वरमंडलैः प्रभुं ३० तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वच्छामलांतःकरणोऽभ्ययान्मुनिः प्रवृद्धभक्त्या प्रणयाश्रुलो
चनः प्रहृष्टरोमाऽनमदादिपुरुषं ३१ स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेहयन्मुहुः प्रेमावरुद्धाखिलवर्णनिर्गमो नैवा
शकत्तं प्रसमीडितुं चिरं ३२ ततः समाधाय मनो मनीषया बभाष एतत्प्रतिलब्धवागसौ नियम्य सर्वेंद्रियबाह्यवर्तनं जगद्गुरुं सात्वतशास्त्र
विग्रहं

यस्य ताहशा मा यिपूरुषमभ्ययादभिमुखं जगाम आनमत्प्रणनाम ३१ ततः स चित्रकेतुरुत्तमश्लोकस्य संकर्षणस्य पदाब्जविष्टरं पादपी
ठं प्रेमाश्रुलेशैरानंदकणैर्मुहुरुपसेचयन् प्रेम्णोद्रेकेन प्रेम्णोपरुद्धः अखिलानां वर्णानामक्षराणां निर्गमः उच्चारणं यस्य अत एव भगवंतं प्रसमीडि तं २
तुं स्तोतुं चिरं न बभूव अकल्प्यताकाशक्त्वा ३२ ततो मनीषया बुद्ध्या मनः समाधाय स्वस्थीकृत्य प्रतिलब्धा वाग्येनासौ चित्रकेतुः प्रतिलब्धा
वाग्स इति पाठोंतरं तत्र प्रतिलब्धवाग्मतः सर्वेंद्रियाणां बाह्यवर्तनं आपारं नियम्य उपोद्घो इत्यर्थः सात्वतशास्त्रं पंचरात्रशास्त्रं तद्रूपि
पाद्यो विग्रहो यस्य तं जगद्गुरुं सात्वततंत्रोपदेष्टारं संकर्षणं प्रति एतद्वक्ष्यमाणं बभाषे वक्ष्यमाणं स्तुतिप्रकरो इत्यर्थः ३३ ॥श्री॥

भा०वृ०
६८

एवं त्वस्य समाश्रयणीयत्वोपयुक्तगुणात् ... त्वाद्देवतान्तरस्य तद्भावं वदन् तमेव स्तौति विषयत्वम् इति ये विषयेषु शब्दादिषु तृष्णया ऽभि
लाषोपेताः ते फलकामा नरा एव पशवः ते विभूतीः त्वद्विभूतिभूतान् रुद्रादीनुपासते न तु परं सर्वोत्कृष्टं विभूतिपतिं उपासते हे ईश इति षां विष
यत्वं विभूतीरुपासीनानां माशिषः त्वद्विभूतिभिर्दत्ताः अर्वाचीनानां नानास्वर्गादिफलरूपाः पुरुषार्थाः तदनु विभूतिविनाशमनु नश्यन्ति य
था राजकुले यथा राजकुलविनाशमनु तत्सेवकानामाशिषो नश्यन्ति तद्वत् उक्तं च त्वयैव यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति लभते च
ततः कामान्मयैव विहितान् हितान् अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसामित्यन्तेनेति भावः त्वद्विभूतीनां परत्वादिगुणापूर्णभावादिति नाम
र्यं ३७ तदेकप्रयोजनत्वेन कृतात्वत्सेवास्तु निरतिशयनिमित्तफलजनकत्वान्न नश्यन्तीत्याह कामधिय इति त्वयि विषयभूते रचिताः कृताः याः
कामधियः तदेकप्रयोजनीस्त्वद्विषया उपासनाः पुनर्न रोहन्ति पुनः रोहे दृष्टान्तः यथा करंभवीजानि भर्जितवीजानि पुनर्न रोहन्ति नाङ्कुरीभ
ना८

37

विषयत्वो नरपशवो य उपासते विभूतीर्न परं त्वां तेषामाशिष ईश तदनु विनश्यन्ति यथा राजकुलं ३७ कामधि
यस्त्वयि रचिता न परमरोहन्ति यथा करंभवीजानि ज्ञानात्मन्यगुणमये गुणगणतोऽस्य द्वन्द्वजालानि ३८ ॥

भाववृ २

ना१ वन्ति तद्वत् पुनररोहे हेतुं वदंस्तं विशिनष्टि ज्ञानात्मनीति गुणमयः सत्वादिप्रकृतिगुणविकारः स न विद्यते यस्य सोऽगुणमयः तथाभूते निःसंकु
चितापरिच्छिन्नज्ञानस्वरूपे त्वयि गुणमूलककर्मवश्यत्वात् तन्मूलकसंकुचितज्ञानत्वात् कर्मसाध्यमोक्षाधिपत्यप्रदानजनानिष्टपरिहारक
त्वतदिष्टप्रापणसमर्थत्वादिगुणयुक्तत्वात् त्वयि रचिताः कामधियो न पुनरर्थरूपवन्धाय भवन्ति देवतान्तराणां तु तद्विपरीतगुणत्वात्तेषु रचिताः
स्वर्गादिकामधियो नश्यन्तीति भावः तदेवाह गुणगणत इति अस्य विरंचिप्रभृत्याकिंचनपर्यन्तस्य जीववर्गस्य गुणानां सत्वादिप्रकृतिगुणानां
ना२ योगा णा विकाररूपाः संघाः तेभ्यः गुणगणतः द्वन्द्वजालानि सुखदुःखादीनि द्वन्द्वसमूहा भवन्ति उपास्यदेवतानां तेषामपि उपासकवत् कर्मवश्य
त्वादियुक्तत्वात्सेवाप्रेरवलितस्य पुंसस्तात्त्विकसेवातदनिष्टपरिहारेष्टप्रापणक्षमा न भवन्तीति भावः एवं ज्ञानशक्त्याद्याश्रितकार्यापादक
गुणपूर्तिरप्युक्ता एवं समाश्रयणीयत्वोपयुक्तपरत्वादिगुणपूर्णत्वेन देवतान्तरेभ्यो वैलक्षण्यं पन्नस्यैव समाश्रयणीयत्वं चोक्तं भवति ३९

३२
राम
६८

जगदुत्पत्तिकाविभवत्वेऽपि दृष्टांतमुखेन विवादयन्नाह त्वमिति परमाणविति परमाणुपरममहतोरल्पीयसो विपुलस्य च वस्तुनो या आद्यंतांतराणि सृष्टि
संहारस्थित्यवस्था इत्यर्थः तेषु वर्तत इति वर्ती अंतरात्मतया व्याप्य स्थितः त्रयविधुरः आद्यंतमध्यरहितः त्वमेव कार्यस्य वस्तुनः कारणात्मतया
दा२ दौ ववति ष्टतेऽन्ते च यदवशिष्यते तद्विभवत्त्वमेव हि कार्यस्य वस्तुनो हेतुः यथा मृत्सुवर्णात्म घटकटकादाविति दृष्टांतो नाभिहितः एवं समष्टिव्यष्ट्या
त्मकस्य कस्यस्य कार्यजातस्यादौ कारणत्वेनावस्थानादंते चावशेषात्त्वदीभवएव जगदुत्पत्त्यादिर्न तु मध्यस्थ चतुर्मुखादेरिति भावः कार्यवस्तु
मध्यस्थस्य विभवो नेति किं वक्तव्यमित्याह आदाविति सत्त्वानां कार्यत्वेनावस्थितानां पदार्थानामादावंते च यत् ध्रुवं स्थिरमादौ कारणत्वेनावस्थि
तमंते चावस्थितमित्यर्थः अंतरालेपि तदेव अंतरालावस्थावद्विभव एवाद्यंतयोर्यदस्ति तस्य मध्यस्थविभवकत्वं किं पुनर्न्यायसिद्धमिति एवं काल
मिति त्रयवर्तित्वभावः अनेन कालतोऽपरिछिन्नत्वमुक्तमथ सर्वदा सर्वत्रांतरात्मतया व्याप्य स्थिति कथनेन सर्ववस्तुसामानाधिकरण्य रूपवस्तुपरिछे

परमाणुपरममहतोस्त्वमाद्यंतांतरवर्ती त्रयविधुरः आदावंतेऽपि च सत्त्वानां यत् ध्रुवं तदेवांतरालेऽपि ३६ क्षित्यादिभिरे
व किलावृतः सप्तभिर्दशगुणोत्तरैरयमंडकोशः यत्र पतत्यणुकल्पः सहांडकोटिभिस्तदनंतः ३७ ॥ॐ नमो नारायणाय

दोप्युक्तः सर्ववस्तुसामानाधिकरण्यमेव हि वस्तुपरिछेदः यद्वा स्वावेक्षयोत्कृष्टगुणवस्त्वंतरराहित्यं वस्तुपरिछेदः स हि जगत्कारणत्वत
दुपयुक्तसार्वज्ञसत्यसंकल्पत्वाद्यादिगुणजातस्य कथनेनाभिहितप्रायएव ३६ एवं द्विविधपरिछेदराहित्यमुक्तमथ देशपरिछेदरहि
तत्वं वदन्नेतत्त्रिविधपरिछेदराहित्यमेवत्वनंतशब्दस्य प्रवृत्तौ निमित्तमित्याह क्षित्यादिभिरिति पूर्वस्मात्पूर्वस्माद्दशगुणमुत्तरैरधिकैः
क्षित्यादिभिः पृथिव्यब्वह्निवाय्वाकाशाहंकारमहद्भिः सप्तभिरावृतः एषः परिदृश्यमानोंऽडकोशः ईदृशीभिरंडकोटिभिः सह सहितो यत्र
स्वं ततोऽनंतः विभूत्साऽनंतत्वादनंतशब्दवाच्य इत्यर्थः एतमंडकोशं विशिनष्टि यत्र एतस्मिन्नंडकोशेऽणुकल्पः जीवः पतति सं
सरति यद्वा यस्मादीदृशीभिरंडकोटिभिः सह एषोंऽडकोशः यत्र यस्मिन् त्वय्यणुकल्पः पतति परिभ्रमति तत्त्वमनंतः सर्वस्य चे
तनाचेतनात्मकांडकोशस्य त्वद्व्याप्यत्वादिदमत्र नास्तीत्येवं रूपदेशपरिछेदराहित्यमपि परत्वापादकं भवतीत्यर्थः ३७ ॥श्री॥

भा०ष०
६९

विषममधियारचितमाह कइति स्वं कर्त्तारं परं च द्रुह्यतीति स्वपरध्रुक् तेन शरीरायासकारित्वात् ततः संसृतिरूपानर्थहेतुत्वाच्च स्वध्रुक् शत्रुहिं-
सादिकामनागर्भत्वात् परध्रुक् तेन धर्मेण देवतान्तराराधनरूपेण निजपरयोः कः क्षेमः किं सुखं न किंचिदपीत्यर्थः परस्य हननं दृष्टान्तार्थं यथा
ऽभिचारादिकर्मणा मुमूर्षोर्न क्षेमस्तथा तत्कर्तुरपीत्यर्थः अस्तु वा कर्तुः स्वाद्यालौकिकः कश्चित् क्षेमस्तथापि तत्किमानर्थः पुरुषार्थः अनित्यत्वा-
दित्यर्थः क्षयिसुख्यादिति भावः एवं पुरुषार्थहेतुर्न भवतीत्युक्तं अप्युतानर्थहेतुश्चेत्याह स्वद्रोहात् स्वस्यैवाहितकरणाद्धेतोस्तवेश्वरस्य
कोपः निग्रहः स्यात् यः स्वस्यैवाहितमाचरति किमुत परस्य स्वतोयमतीव निग्राह्य इत्येवं तव कोपः स्यात् आत्मसंभाविताः स्तब्धा धन
मानमदान्विताः यजन्ते नामयज्ञैस्ते दंभेनाविधिपूर्वकं अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः मामात्मपरदेहेषु [illegible]न्तोऽभ्यसू-
यकाः तानहं द्विषतः क्रूरान् संसारेषु नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु इत्यादिना प्रतिज्ञातो निग्रहः स्यादिति भावः॥
तव कोपः स्यात् तावन्मात्रे परसंपीडया परस्य द्रोहाद्धेतोरधर्मस्तथा स्यादेव स्वकृतेन धर्मेण परस्य यादृशी पीडा भवेत्तादृशी पीडा हेतुर-

टी०६
टी७

39

कः क्षेमो निजपरयोः कियान्वार्थः स्वपरद्रुहा धर्मेण स्वद्रोहात्तव कोपः परसंपीडया च तथाऽधर्मः ४२ ॥
न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः स्थिरचरसत्त्वकदंबेष्वपृथग्धियो यमुपासते त्वार्याः ४३

धर्मो यस्यानुष्ठितधर्ममनुस्यादित्यर्थः ४२ एवं धर्मान्तरस्य न पुरुषार्थहेतुत्वं प्रत्युतानर्थहेतुत्वं चोक्तं त्वदाराधनरूपधर्मस्य त्वनिष्टपरि-
हारेष्टप्राप्तिहेतुत्वमव्यभिचरितं इत्याह नेति सत्यकामः सत्यसंकल्प इति श्रुत्युक्तसंकल्पस्य तवेक्षा ये तु सर्वाणि कर्माणि मयि संन्यस्य
मत्पराः अनन्येनैव योगेन मां ध्यायन्त उपासते तेषामहं समुद्धर्ता मृत्युसंसारसागरात् भवामि न चिरात्पार्थ मय्यावेशितचेतसां इति
कृतः संकल्प इत्यर्थः न व्यभिचरति यथार्थो न भवति यया हेतुभूतया ईक्षया भागवतः भगवतस्तव संबंधी त्वदाराधनरूपो धर्मो अभिहितः प्रो-
क्तः पंचरात्रादिनेति शेषः भागवतधर्माभिधाने त्वत्कृपाविधेईक्षैव हेतुरन्यथा तद्धर्मानभिज्ञत्वात् केवलविषयासक्ते सति सर्वस्मिन्
लोके समुद्धर्त्रभावादीक्षाया निर्विषयास्यादिति भावः एवं चेक्षायाः सत्यत्वात्तद्विषयत्वापादकभागवतधर्मोऽप्यनिष्टपरिहारेष्ट
प्राप्तिहेतुत्वेन व्यभिचरतीति तात्पर्यं यं एतं वमनतएव त्वदीक्षाभिज्ञास्तद्विषयापादिकं चराचरात्मकभूतसमूहे अपृथग्धिया
त्वदात्मकबुद्ध्याऽसक्ता [illegible] सततं अनुतिष्ठन्तीत्यर्थः त्वामिति च शेषः ४३॥

राम
६८

यत एव भवानितरेभ्यः परः अत एव त्वदाराधनात्मकस्त्वदभिहितो धर्मः तदनुष्ठातारश्चेतरदेवताराधनरूपधर्मतदनुष्ठातृभ्यो विलक्षणा इत्या
ह जितमिति त्रिभिः हे अजित ताऽजितत्वात्स्ववर्त्तिनिमित्तमस्य भवता [illegible] जितं सर्वं स्ववशीकृतं यतस्तस्मात्परत्वेनावस्थितं एतदेवाजित [illegible] शब्दस्ववर्त्ति
निमित्तमित्यपि सूचितं तथा धर्मेणेति शेषः त्वदाराधनरूपधर्मेणापि जितमित्यर्थः सोपि सर्वोत्कृष्ट इत्यर्थः कोसौ धर्मस्तत्राह यं भागवतं भ
गवतस्तवाराधनरूपमनवद्यं निर्दुष्टं धर्मं भवानाह पंचरात्रगीतादिमुखेनोक्तवान् पंचधर्मं निष्किंचनाः अनन्यप्रयोजनाः आत्मारामाः ब्रह्म
गुणानुभवपरा ये मुनयः अपवर्गाय मुक्तये उपासतेऽनुतिष्ठंति ४० यत्र धर्मे त्वमहं तव ममेति च या नृणाम मत्यत्रान्यस्मिन्धर्मे विषमामतिर हं

जितमजित तदा भवता यदाह भागवतं धर्ममनवद्यं निःकिं।
चना ये मुनय आत्मारामा य उपासतेऽपवर्गाय ४० विषमम
तिर्न यत्र त्वमहमिति मम तवेति च यदन्यत्र विषमधिया र
चितो यः स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः ४१ ॥श्री॥श्री॥

कारममकाररूपा नास्तिरसं इत्यर्थः सर्वज्ञेन भ्रमविप्रलिप्सादिदोषरहितेन परमकारुणिकेन भवताभिहितत्वादहंकारममकारयुक्त
हिंसादिगर्भत्वाभावात्सर्वस्य ब्रह्मात्मकत्वानुसंधानगर्भत्वान्निरतिशयानंदहेतुत्वाच्च त्वदाराधनरूपो धर्मः सर्वोत्कृष्टः तथा तदनुष्ठातारोपित्र
दादिविषयसुखार्थदंभमात्सर्यहिंसादिस्वभावत्वाभावात्सर्वभूतसुहृत्त्वादिगुणयुक्तत्वाच्च उत्कृष्टाः इतरधर्मतदनुष्ठातारस्तूक्तविपरीता इ
ति भावः तदेवाह विषमधियेति अहं ममेत्याद्यहंममाभिमानेन रचितो यो देवतांतराधनरूपः स ह्यविशुद्धः रागद्वेषादिगर्भत्वादधर्मब
हुरः शत्रुमरणादिकामनागर्भत्वात्क्षयिष्णुरस्थिरफलश्च ४२ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥ ॥श्री

भा०ष०
७०

एवंस्वस्यतत्स्तुतावनधिकारमाविष्कुर्वन्किंचित्तद्गुणाननुस्मरन्केवलंनमस्करोतिनमइतिद्वाभ्यां भगवतेषाड्गुण्यपरिपूर्णायनिरस्तदोषा
यसकलस्यजगतःस्थितिलययोरिदमुत्पत्तेरप्युपलक्षणंउत्पत्तिस्थितिलयानामीशायकर्त्रेकुयोगिनांकर्तरिषष्ठी कुयोगिभिर्भिदाऽब्र
ह्मात्मकस्वतंत्रवस्तुदृष्ट्यादुरवसिताऽज्ञातानुमशक्याऽऽत्मनोगतिस्वरूपंस्वभावश्चयस्यअज्ञातानुमशक्यस्वरूपस्वभावायेत्यर्थः परमहंसाया
त्यंतशुद्धायतुभ्यंनमः ४७ अनंतगुणमहात्म्यंकथयन्नमस्करोति यमिति श्वसंतंवहुस्यामितिसंकल्पंतोव्याप्रियमाणंयंत्वामनुविश्वसृवि
श्वसृजःब्रह्मादयःश्वसंतिविवदायतस्वसखालाभेनव्याप्रियंतइत्यर्थः चेकितानंसर्वंपश्यंतेवंचित्तयःचित्तवृत्तयः अनुउच्चकंतिअनुचरं
तिप्रसरंतिज्ञानमपित्वदधीनमित्यर्थः यस्यतवमूर्द्धिकृत्स्नंभूमंडलंसर्षपायतिसर्षपवदाचरति यःकृत्स्नभूमंडलभारमपिसर्षपवन्मन्यत

नमस्तुभ्यंभगवतेसकलजगत्स्थितिलयोदयेशाय दुरवसितात्मगतयेकुयोगिनांभिदापरमहंसाय ४७ यंवैश्वसंतम
नुविश्वसृजःश्वसंतियंचेकितानमनुचित्तयउच्चकंति भूमंडलंसर्षपायतियस्यमूर्द्धितस्मैनमोभगवतेऽस्तुसहस्रमूर्द्ध्ने ४८ ।
श्रीशुकउवाच संस्तुतोभगवानेवमनंतस्तमभाषत विद्याधरपतिंप्रीतश्चित्रकेतुंकुरूद्वह ४९ श्रीसंकर्षणउवाच॥
यन्नारदांगिरोभ्यांतेव्याहृतंमेनुशासनं संसिद्धोसितयाराजन्विद्ययादर्शनाच्चमे ५० ॥श्रीजानकीजीवनायनमः ।

३९

३९

इत्यर्थः तस्मैसहस्रशिरसेभगवतेतुभ्यंनमोऽस्तुमेनमनंभवानंगीकरोत्वित्यर्थः ४८ चित्रकेतुनेत्थंस्तुतोभगवाननंतस्तमभाषतेत्याह
मुनिः संस्तुतइति इत्थमनेनगुणमहात्म्येनस्तुतोभगवाननंतः प्रीतःसन्हेकुरूद्वहतंविद्याधराणांपतिंचित्रकेतुमभाषत ४९ तदेवा
हयादित्यादिनासिद्धप्रसीत्संतेन नारदांगिरोभ्यांतुभ्यंयद्व्याहृतमुक्तंतदनुशासनंप्रकृतिपुरुषेश्वरस्वरूपविषयकविविच्यज्ञापनरूपंव
चःममैवमत्संबंध्येवांतरात्मस्वरूपमत्संकल्पादेवताभ्यांतेव्याहृतं ईश्वरस्यचसोहार्दंयदृष्ट्यासुकृतंतथाविष्णोःकटाक्षअद्वेषआनुकू
ल्यंसात्विकैःसंभाषणंषडेतानिह्याचार्यप्राप्तिहेतवः इत्युक्तरीत्यामदनुग्रहमंतरेणसदाचार्यप्राप्तेर्दुर्लभत्वादितिभावः अतोहेरा
जन्तयानारदोपदिष्टयामंत्रविद्ययाममदर्शनाच्चसंसिद्धोसि ५० ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥

राम
७०

एवं समाश्रयणोपयुक्त समाश्रितकार्यावारकगुणपूर्त्तिकथनमुखेन तदाराधनरूपधर्मसेवनिरतिशयश्रेयःसाधनत्वमुक्तं इदानींस्व
स्यकृतार्थतामाविःकुर्वंस्तद्दर्शनस्य कृतार्थतापादकत्वं कैमुत्यन्यायेनाह नहीति हे भगवन् नृणां भवद्दर्शनादखिलपापक्षयो भ
वतीति इदमघटितं नहि किंतु युक्तमेव कुतः यद्यस्मान्नाम्नस्तन्नाम्नः सकृदेव श्रवणादेव पुल्कसकोपि हीनजातिरपि संसारबंधा
द्विमुच्येत नामश्रवणस्यैवेदृशं माहात्म्यं किं पुनः साक्षात्तद्दर्शनस्येति भावः ४४ अथाचार्यकृतं महोपकारं स्मरन् स्वस्य कृतार्थतामा
ह अथेति हे भगवन्नथातोऽधुना तवावलोकनेन परिमृष्टा निरस्ता आशये चित्ते मला येषां ते तादृशा वयं कृतार्थाः जाता इत्यर्थः य
स्मात्तावकेन प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इत्युक्तरीत्या तवातिशयप्रियेण सुरर्षिणा श्रीनारदेनादिष्टं त्वद्दर्शनेन म
म कृतार्थत्वे निमित्तं मंत्ररूपं वचो यददित्तं तदेवाऽधुना जातं अन्यथा महापकर्त्तुः सदाचार्याननुग्रहे कथं भवस्येवंविधः परमो भु

नहि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः यन्नामसकृच्छ्रवणात्पुल्कसकोपि विमुच्यते संसारात् ४४ अथ
भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः सुरर्षिणा यदुदितं तावकेन कथमन्यथा भवति ४५ विदितमनंत समस
स्तं तव जगदात्मनो जनैरिहाचरितं विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतैः ४६ ॥ ॥ ॥श्री॥ ॥ श्री

७२

दयस्तदनर्हस्य मम कथं भवेदित्यर्थः ४५ कथं भवेदित्यनेनेदृशाभ्युदयानर्हत्वं स्वस्य सूचितं तच्च भवतः सर्वज्ञेन सर्वं विदितमेव किं मया वि
ज्ञाप्यमधुना विशिष्यत इत्याह विदितमिति हे अनंत इह लोके जनैर्यद्यदाचरितं तत्तत्समस्तं जगदात्मनः कृत्स्नजगदंतर्यामितया सर्वेषां बुद्धि
वृत्तीर्युगपत्साक्षात्कुर्वतस्तव विदितमेव ततो मादृशैर्विज्ञाप्यं परमगुरोस्तव कियत् यथा सवितुरिव खद्योतैः यद्वाऽनंत कल्याणगुणाकर
स्य तव गुणैकदेशमपि स्तोतुमहमसमर्थ इति त्वया विदितमेवेत्याह विदितमिति हे अनंत त्रिविधपरिच्छेदरहित इह लोके जनैर्जननमर
णभाग्भिस्त्वदाहितज्ञानभक्तिभिर्मादृशैर्यद्यदाचरितमंतर्बहिरिंद्रियैर्व्यापारितं तत्समस्तं जगदंतरात्मनः सर्वज्ञस्य तव विदितमेव परिच्छिन्न
मतेर्मम वाङ्मनसाभ्यामनंतस्य सर्वज्ञस्य तव गुणवर्णने यावानक्षमता तत्त्वया विदितमेवेत्यर्थः अतः परमगुरोर्ज्ञानप्रदानां नारदादीनामपि
ज्ञानदस्य तवेह मया विज्ञाप्यं विज्ञापनीयं कियत् मया कर्त्तुं गुणास्तव नंतवाक् यदल्पमित्यर्थः यथा सवितुर्लोकत्रयप्रकाशक
स्य खद्योतैः कीटविशेषैः कृतं द्योतनं कियदल्पं तद्वदित्यर्थः ४६

यद्वा सर्वभूतात्मा जीव एव भवतु न तदन्यः परमात्मेत्यत आह लोक इति २
मच्छरीरके या परमात्मा नाः ३
मच्छरीरके परमात्मनि ३ चेतना ४

ननु सर्वेषां भूतग्रामवाच्यानां देवादिशरीराणामात्मा जीवः स एव किं भवान्नेत्याह लोक इति लोके परिदृश्यमाने चित्प्रपंचे देवादिशरीररूपे विततं व्याप्तं अन्तः प्रविश्य धारकतया व्याप्तं प्रत्यगात्मानं द्वितीयान्तानां पदानां पश्चादाहृतेनान्वयः तथा आत्मनि प्रत्यगात्मनि संततं प्रोतं धार्यत्वेनावस्थितं लोकं चैतमेवमुभयं मया परमात्मनान्तः प्रविश्य भर्त्रा व्याप्तं उक्तमुभयमपि कृतं च मदाधेयं कृतमित्यर्थः लोके विततमात्मानमित्यनेन चेतनेतरावस्थाव्याप्तिरुक्ता लोकं चात्मनीत्यनेनाचेतनस्य जीवधार्यत्वमुक्तं उभयमित्यनेन चेतनयोरीश्वरधार्यत्वं व्याप्यत्वं ईश्वरस्य सर्वस्य धारकत्वं व्यापकत्वं चोक्तं अतो नाहं जीवो भूतात्मेत्यत्र भूतशरीरोऽचेतनविशिष्टचेतनपरः इति भावः आत्मानमित्येकवचनं जात्यभिप्रायकं यद्वा एकामेव जीवव्यक्तिमुपादाय क्रमप्राप्तेषु देवादिशरीरेषु व्याप्तिरुच्यते अतो जीवैकवादभ्रमो न कर्तव्यः ५२ ननु कथमेतद्विमर्शनीयं सर्वाण्यचेतनानि प्रत्यगात्मभिर्व्याप्तानि उभयं तु त्वया व्याप्तमित्यपेक्षायां बुद्धिनैपुण्येन सदृष्टान्तमाह यथेत्यादिभिश्चतुर्भिः

लोके विततमात्मानं लोकं चात्मनि संततं उभये च मया व्याप्ता मयि चाप्युभये कृते ५२ यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ५३ ॥राम श्रीराम

७२

तावज्जीवस्वरूपविमर्शनाय दृष्टान्तं निदर्शयति यथा सुषुप्तः स्वप्नद्रष्टा पुरुषः सुषुप्त इति न सुषुप्त्यवस्थो जीव उच्यते स्वप्न उत्थित इत्यनन्तरोक्त्या तत्सुषुप्तौ विश्वदर्शनानुपपत्तेश्च स्वप्ने स्वप्नावस्थायामेकस्मिन्नेव स्वप्ने पश्यत्यात्मनि विश्वं पश्यति गजस्कंधारोहणदेशान्तरगमनराज्याभिषेकशिरश्छेदादि सर्वं शरीरजातं पश्यति प्रकृत्युपाधिकं पश्यतीत्यर्थः ... मायामात्रं तु कार्त्स्न्येन अनभिव्यक्तस्वरूपत्वादिति सूत्रपरामर्शाद्वा उत्थितो जाग्रदवस्थायां प्राप्तः आत्मानमेकदेशस्थं क्वचिदपवरकादिशयानं शरीरमात्रवर्तिनं मन्यते स्वप्नावस्थायां प्रदृष्टस्वरूपप्रयुक्तावपि तु स्वप्न जाग्रदवस्थाद्वयान्वितप्रकृत्युपाधिकस्वप्नद्रष्टैकजीवकर्मानुगुणमीश्वरसृष्टगजादिपदार्थानुप्रवेशपूर्वकतद्दर्शनरूपेति दृष्टेनेति विवक्षितोऽर्थः ५३॥

भा०ष० ७२

40

राम ७२

तिङ् स्वर

अत्रास्यैव भूतभावनत्वं शरीरात्मनोः परमात्मा मच्छरीरकः एवं सर्वभूतानामात्मेति नात्र सामानाधिकरण्यस्वरूपाभेदाभिप्रायकं किंतु शरीरशरीरिभाव निबंधनं तच्च सामानाधिकरण्यं कार्यकारणानिबंधनमपि घटते इत्याह भूतभावन इति शेषम् २

ननु मह्यमुपदिष्टमिति न तत्प्रतीतिरुक्तवानतः कथं तद्याह त्वं त्वदनुशासनमेवेति जानीयां किंच तयोरेव वचो ऽहमस्मि एवं तत्तु तवेत्यत्राह अहं हीति तावत्सर्वाणि भूतान्यहमेव सर्वाण्यपि भूतानि मदभिन्नान्येव किमुत तस्मात्त्वं मां विजानीया ज्ञानी त्वात्मैव मे मतमित्युक्ताभिमान विषयावंगिरो नारदो मदभिन्नाविति भावः अतस्त्वयाहृतं मदनुशासनमेवेति तात्पर्यं ननु सर्वभूतान्यहमेवेत्युक्तो भेदः किं मदात्मको घट इतिवत्स्वरूपाभेदः स च स्याद्वा सर्वविकाराश्रयतापत्तिस्तत्राह भूतात्मा सर्वभूतानामंतरात्मा आत्मादेवो जात इत्यादिवच्छरीरात्मभावश्चोक्तः सर्वभूतैः सह मम भेदः विकाराणां शरीरगतानां जीववाल्यादीनामिव न मयि प्रसक्तिरिति तात्पर्यं शरीरात्मभावनिबंधनो ऽभेदव्यपदेशो बहुशो दृष्टः ब्राह्मणो ऽहं कृशो ऽहं स्थूलो ऽहमित्यादि न चेदं रजतमितिवद्बाधितो ऽयं व्यपदेशः नीलो घट इत्यादावभेदव्यपदेशस्यापि वाधकत्वापत्तेः अथ जातिगुणादीनां व्यक्तिगुणापृथक्सिद्धप्रकारत्वान्नबुद्धितच्छब्दयोर्व्यक्तिगुणिपर्यंतत्वान्न वाधस्तर्हि शरीरस्यात्मापृथक्सिद्धप्रकारत्वेन तद्बुद्धितच्छब्दयोरपि तत्पर्यंतत्वादयमप्यवाधित एव न तु जात्यादेर्भूत्यादीनां स्वत्वपृथक्सिद्धप्रकारत्वं प्रत्यक्षगम्यं जातिव्यक्त्योरुभयोरपि चक्षुर्विषयत्वादात्मनस्तु तदविषयत्वात्कथं शरीरस्यात्मापृथक्सिद्धविशेषणत्वमिति

अहं वै सर्वभूतानि भूतात्मा भूतभावनः शब्दब्रह्म परं ब्रह्म ममैतेभ्यो भवतीति तन्नू ५२ ॥

चेन्मात्तु जातिव्यक्त्योरिव शरीरात्मनोरेकप्रमाणविषयत्वमपेक्षात्मापृथक्सिद्धप्रकारत्वं शरीरस्यास्ति तमेव न हि भिन्नसामग्रीवेद्यत्व मात्रेण तद्यथा हंतुक्ता कामन्यथा चक्षुर्घ्राणेंद्रियवेद्ययोः पृथिवीगंधयोरपि नियतप्रकार प्रकारिता यानुपपत्तेरित्यन्यत्र विस्तरः न केवलं शरीरात्मभावनिबंधन एव भूतैर्ममाभेदः अपि तु कार्यकारणभावनिबंधनश्चेत्याह भूतानि चिदचिदात्मकानि देवमनुष्यादिनि भावय त्युत्पादयति स्वस्मादेवोपादानभूतादिति भूतभावनः कार्यकारणयोरभेदस्त्वारंभणाधिकरणादिभाष्ये बहूपपत्तिभिर्निरूपितः यदा शंकितं तयोरेव वचो ऽहमेव न त्वेतन्नत्राह शब्देति शब्दात्मकं यद्ब्रह्म वरशब्देन वाच्यमर्थात्मकं चयद्ब्रह्म इमे द्वे ब्रह्मणी ममैवाभ्यतीतन्नूपा वत्सत्तम पृथक्सिद्धे मम शरीरभूत इत्यर्थः स्वस्मिन्नुरव्यवत्तो ब्रह्मत्वाद शब्दार्थात्मकयोः प्रपंचदलयोः स्वशरीरत्वादुपचरितः परब्रह्मणः स्वतनुत्वकथनं दृष्टांतार्थं यथा ब्रह्मांतर्गतनारदांगिरसौ मच्छरीरकत्वं एवं शब्दब्रह्मांतर्गतत्वं वचसोपि मदुक्तत्वमित्यर्थः यद्यपि स्वस्य सर्व भूतात्मकत्वकथनेनैव सर्वभूतवचसोः स्ववचस्त्वमपि कथितप्रायं तथापि नामरूपयोरपि स्वशरीरकत्वज्ञापनाय पृथगुक्तमित्यवगंतव्यं श

ममेत्यत्र मच्छरीरकस्य परमात्मनः स्वरूपमुक्तमिति ३

तथाचसुखंवेदसुखमहस्वाप्समितिपरामर्शानुगुणंसुखंचयस्मवतिकृतंवेदतंनिर्गुणंहेयगुणरहितंब्रह्मशब्दवाच्यंपरमात्मानंमामेवहिजा
नीहीत्यर्थः सुषुप्त्याधारत्वतत्कारणत्वसौषुप्तिकसुखहेतुत्वादिभिर्द्धर्मैः परमात्मस्वरूपविमर्शनीयमितिभावः निर्गुणमितिसुखवि
शेषणंवा निर्गुणप्रबोधस्वरूपमात्मानंतमोगुणाभिभवात्प्राग्[illegible]नुसंधीयमानस्यात्मनोयावरणाश्रमादिविशि
ष्टतात्ताद्दशगुणरहितमात्मबोधादहमित्येकाकारेणप्रतीयमानंसुखंच विविक्तस्फुटप्रतिभासंवेदेत्यर्थः सुप्तोत्थितस्यपरामर्शा
नुगुणमेवहिसौषुप्तिकंसुखंवर्णनीयं तत्परामर्शश्चैवंविधः सुखमहमस्वाप्संनाहंकिंचिदवेदिषमितितत्राहमस्वाप्समित्यनेनाह
मर्थस्यात्मनोनुवृत्तिर्दर्शिता सुखमित्यनेनतस्यसुखरूपतामाह किंचिद वेदिषमित्यनेनतस्यबाह्यप्रत्याह्रणत्वाद्याकारवैधुर्यंचद
र्शितं एवंविधंतत्सुखमितिविशेषपरामर्शाभावाच्चास्फुटत्वंच ५५ एवंसुषुप्तौपरमात्मस्वरूपविमर्शनप्रकारंकथनमुखेनजी
वस्वरूपमुभयमित्यादिनाविमृशन्ननूद्यब्रह्मतत्परमित्यनेनब्रह्मात्मकत्वंविदधाति उभयंप्रस्वापप्रतिबोधंचेत्युभयंस्मरतः पुंसोदे

सुखंहि निर्गुणंब्रह्मतमात्मानमवैहिमां ५५ उभयंस्मरतःपुंसः प्रस्वापप्रतिबोधयोः अन्वेतिव्यतिरिच्येततद्ज्ञानंब्रह्मतत्परं ५६
यद्येतद्दृश्यतेपुंसोमद्भावंभिन्नमात्मनः ततःसंसारएतस्यदेहाद्देहोमृतेमृतिः ५७ ॥

हिनोयज्ज्ञानंप्रस्वापप्रतिबोधयोरन्वेतिव्यतिरिच्येततत्तदव
स्थाश्रयेणानुवर्ततेतदुपाधिविग[illegible]मेतदवस्थाभिर्व्यतिरिक्तमस्मात्तत्तदवस्थानाश्रयंस्यात् यद्वाउत्तरोत्तरावस्थासुपूर्वपूर्वावस्थाव्यतिरिक्तंसा
तस्मात्परिच्छिन्नज्ञानस्वरूपाज्जीवात्परंविलक्षणंतदात्मभूतंब्रह्मेत्यर्थः यद्वाउभयमित्यादिश्लोकार्थयथायज्जीवस्वरूपात्मकंज्ञानंस
र्वावस्थानुवर्त्तितदृष्टउत्तरोत्तरावस्थासुपूर्वपूर्वावस्थाव्यतिरिक्तंचतथातस्मात्परंविलक्षणंसर्वावस्थासुजीवस्वरूपनियंतृतया
नुस्यूतंदृष्टंतदवस्थासंबंधिसुखदुःखाद्यनेनान्वयितयाव्यतिरिक्तंचब्रह्मेत्यर्थः यथासर्वावस्थानुवर्तित्वज्ञानानंदादिस्वरूपत्वस्वभा
वतस्तत्तदवस्थानन्वयित्वाहंप्रत्ययगोचरत्वादिभिर्द्धर्मैर्जीवस्वरूपंविशोध्यंतथाब्रह्मशरीरत्वेनापितद्विशोध्यमित्यभिप्रायः ५६ एवं
ब्रह्मशरीरत्वेनतदायत्तसत्तास्थितिप्रवृत्तिकत्वरूपवारतंत्र्यमप्यनुसंधेयमित्युक्तं एवमननुसंधाने नाऽर्थमाह यदीति यद्येतस्ये
सोदेहिनआत्मनःस्वस्यमद्भावेभावःप्रकारः क्षीवत्वमार्षमत्प्रकारकत्वंविस्मृतंभिन्नंभावप्रधानोभिन्नशब्दःभिन्नत्वंपृथक्सिद्धत्व
रूपंस्वतंत्रत्वंस्यादित्यर्थः भिन्नत्वेनानुसंहितंस्यादितिभावः तत्तोहेतोरस्यजीवस्यसंसारोभवतिसंसारस्वरूपमाहदेहादेहः जन्मोतरंपुनर्जन्ममृते

वतिर॰

[illegible]

राम
९२

स्प२ नि स्या

इममर्थं दर्शयति एवमिति एवं स्वप्नावस्थावज्जागरणादीनि जीवस्थानानि एवं स्वजीवस्यावस्थानानि अवस्था इत्यर्थः स्वप्नवत्
जागराद्यपि योगिनात्मस्वरूपप्रयुक्तमपि तु प्रकृत्युपाधिकं स्वरूपप्रयुक्तत्वेन तस्य सर्वावस्थानुगतत्वेन तत्प्रयुक्ताः पूर्वपूर्वावस्था उत्तरोत्तरा-
वस्थासूपलभ्येत न च ... सर्वैः ... तद्दृष्टभेदद्रष्टृत्वाद्वादिनोक्तः कर्मानुस्मृतिरित्यादिवत् अनुपपत्तेः कर्म तावत्सुषुप्तेन पूर्वकृतं पुण्यपा-
परूपं तत्तज्ज्ञानात्प्राक्तनैनैव भोक्तव्यं अनुस्मृतिरपि एवाहं सुप्तः स एव प्रतिबुद्धोस्मीत्यादिः श्रुतिरपि सुप्तप्रबुद्धं स एवेति दर्शयति तेइ-
ह व्याघ्रो वा सिंहो वा वृको वा वराहो वा दंशो वा मशको वा यद्यद्भवन्ति तत्तथा भवन्तीति विधयश्च मोक्षार्थाः सुप्तस्य पुनरुत्थितेनान्यत्वे अनर्थकाः स्युः
अस्त्वेवं स्वप्नावस्थावज्जागरादयो न जीवस्वरूपप्रयुक्ता अपि तु प्रकृत्युपाधिका इति तथापि जीवस्वरूपविमर्शने किमायातं तत्राह
आत्मन इति जागरादीन्यवस्थानान्यात्मनो मायामात्राणि परमात्मसंबंधिप्रकृत्युपाधिकानि न स्वरूपप्रयुक्तानीति ज्ञात्वा आत्मनो
मायामात्राणीत्यनेन जीवस्य स्वप्नावस्थावत् परमात्मीयत्वेनाविर्भावितं तद्द्रष्टारं तत्तद ... स्थासाक्षिणं परं प्रकृतिविलक्षणं जीवात्मानं

एवं जागरणादीनि जीवस्थानानि चात्मनः मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ५४ येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तथा॥

स्मरेत् अचेतनस्य तत्तद्दृष्टत्वानुपपत्तेः एके केचन शरीरमेके केचन जीवेन तयोर्वादिनत्वस्वरूपं च तत्तदवस्थाद्रष्टृत्व पूर्वपूर्वावस्थानुस्मर्तृत्वाहं प्रत्य-
यगोचरत्वादिभिर्देहेन्द्रियगुणान्तरविवेकेनावगन्तव्यमिति भावः ५४ एवं परमात्मस्वरूपविमर्शनप्रकारमाह येनेति येन हेतुभूतेन परमात्म-
ना प्रसुप्तः सुषुप्त्यवस्थां प्राप्तः पुरुषो जीवः जीवस्य प्रसुप्तौ परमात्मनो हेतुत्वाद्येनेति हेत्वर्थे करणतृतीया तेन निर्दिष्टाः तथा हि स्वप्नान्तं मे सो-
म्य विजानीहि इत्युपक्रम्य यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वमपीतो भवती-
ति छान्दोग्ये श्रुतं स्वप्नान्तं सुषुप्तिः सता ब्रह्मणा संपन्नो भवति जीवः सता साकं समितिर्नाम शरीरेन्द्रियाधिष्ठातृत्वादिव्यापाररहितत्वेन ब्रह्मणि
स्थितिमात्रं सैव सुषुप्तिः स्वं स्वशरीरकं परमात्मानं प्रत्यपीतो भवति लीनो भवतीत्युक्तविधा संपत्तिरेव लयः कारणे हि कार्यस्य लयः
सुषुप्त्याधारत्वात् कारणत्वाच्च येनेति तद्धेतुत्वेन निर्दिष्टः एवं येन सुषुप्तः पुरुष आत्मनः स्वस्य स्वापं वेदानुभवतीत्यर्थः ॥

५४

१२

दृष्टश्रुताभिरैहिकामुष्मिकाभिर्मात्राभिर्विषयसुखलैशैः स्वेनतेजसा स्वविवेकबलेननिर्मुक्तः मात्रासुजातविरागः ज्ञानविज्ञानाभ्यां पूर्वो
क्ताभ्यां संतुष्टः ज्ञानसहकृतभगवदनुभवरूपविज्ञानमात्रसंतुष्टः मद्भक्तः ममनिरतिशयप्रियः पुरुषो भवेत् एवं चाभयं तस्य ब्रह्मात्म
कत्वमनुसंदधतः कस्मात् इति भावः ६२ एतावानिति योगनैपुण्यं यस्याः सा बुद्धिर्येषां तैर्मनुजैः सर्वात्मना सर्वप्रकारेण ज्ञेयः स्वार्थो निति
कत्वमनुसंदधतः कस्येत्यर्थः स्वार्थवतिः यद्वा एतावानेवैतत्परितिमितएव कोसौ तत्राह
स्वपरिहारेणप्रापणसमर्थ पुरुषेण प्रार्थनीयं वस्तु एतावानेवेत्यर्थः स्वार्थवतिः यद्वा एतावानेवैतत्परितिमितएव कोसौ तत्राह
यत्पराल्मैक्यदर्शनं इति परस्य परमात्मनः आत्मनः स्वस्य चैक्यदर्शनमपृथक्सिद्धसंबंधदर्शनमिति यदेतावानित्यर्थः यद्वा प
रात्मनः परमात्मन ऐक्यदर्शनमेकत्वेन प्रकारित्वेनैकाकारेण च दर्शनमित्यर्थः ६३ एवं परात्मैक्यद्रष्टृत्वं चेत्त्वमप्याशु मुक्तोभ
विष्यसीत्याह त्वमिति हे राजन्चित्रकेतो त्वमथ मत्तः समाहितचित्तः श्रद्धया ज्ञानविज्ञानसंपन्नः संपत्तिः संपन्नः कर्तरिक्तः

दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेनतेजसा ज्ञानविज्ञानसंतुष्टो मद्भक्तः पुरुषो भवेत् ६२ एतावानेव मनुजैर्योगनैपुण्य
बुद्धिभिः स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैक्यदर्शनं ६३ त्वमेतच्छ्रद्धया राजन्नप्रमत्तो वचो मम ज्ञानविज्ञानसंपन्नो धा
रयन्नाशु सिध्यसि ६४ शुकउवाच ॥ आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः पश्यतस्तस्य विश्वात्मा ततश्चांत
र्दधे हरिः ६५ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे षोडशोध्यायः ॥ १६ ॥ ॥ ॥ श्रीशुकउवाच ॥ ॥
यतश्चांतर्हितोनंतस्तस्यै कृत्वा दिशे नमः विद्याधरश्चित्रकेतुश्चचार गगनेचरः १ ॥ ॥ श्री ॥ ॥ ॥ श्री ॥

ज्ञानविज्ञानयोः संपत्तिर्यस्मात्तत्सममवचः धारयन्स्वनिष्ठं कुर्वन् ज्ञानविज्ञानसंपादकं मदुक्तार्थमनुतिष्ठन्नित्यर्थः ब्रह्मात्मकत्वानुसंधा
नेन ज्ञानविज्ञाने प्रतिष्ठितो भव इति भावः ज्ञानविज्ञानसंपन्न इति प्रथमांतपाठे स्पष्टार्थः आशुसिध्यसि मुक्तो भविष्यसि ६४ ए
वमुपदिश्य भगवानंतर्दधे इत्याह मुनिः आश्वास्येति विश्वात्मा जगद्गुरुर्भगवान्हरिः संकर्षणश्चित्रकेतुमित्थमाश्वास्य नारदांगिरो
क्तिसंवादितवचसा विश्वास्य तस्य चित्रकेतोः पश्यतः सतस्तत्रैव पातालादधस्तात्कस्यांचिद्दिशि अंतर्हितवान् ६५ इति षोडशः ॥
ततउपरितनं चित्रकेतोर्वृत्तांतमाह मुनिः यत इति यस्यां दिशि संकर्षणोंतर्हितस्तस्यै दिशे नमस्कृत्वा स विद्याधरः विद्याधरत्वं प्राप्तः ॥
विद्याधरैरिति पाठे तैः सह चित्रकेतुर्गमनचारी भूत्वा गगनचरश्चचार १ ॥

एवंब्रह्मात्मकत्वाननुसंधानेऽनर्थः संसृतिरूपउक्तः अयंचमनुष्यजन्मनैवपरिहार्योनतिर्यगादिजन्मनेत्याह लब्ध्वेति एवजीवः ज्ञानंशास्त्र।
जन्यंविज्ञानंविवेकविमोकादिसाधनसप्तकजमुपासनात्मकं तयोः संभवोयस्यास्तांमानुषींयोनिंलब्ध्वामानुष्यंजन्मप्राप्यापीत्यर्थः आ।
त्मानमुक्तविधमात्मस्वरूपंयोनबुध्येतसपुमान्क्वचिदपिक्षेमंनाप्नुयात् तिर्यगादियोनिषुज्ञानविज्ञानयोग्यतैवनास्तितद्योग्यंदुर्लभं।
मानुषीयोनिंप्राप्यापिब्रह्मात्मकमात्मानंस्वशरीरकंब्रह्मवानोपासीतसपुनःपुनःसंसरेदेवेतिभावः ५८ मानुषींयोनिंलब्ध्वतोपिवि।
षयासक्तस्यकथंज्ञानादिकंप्रतिष्ठितंभवेत्तत्राह स्मृत्वेति ईहार्थविषयसुखार्थायांचेष्टायांप्रकृतिधर्मेपरिक्लेशमत्तंतशरीरायासादिरूपं
ततःईहातःफलविपर्ययंफलविपर्यासंसुखार्थचेष्टातोदुःखप्राप्तिंचस्मृत्वासदृष्टांतमालोच्यानीहायांनिरवृत्तिधर्मेऽभयमल्पत्वास्थिर

॥ लब्ध्वेहमानुषींयोनिंज्ञानविज्ञानसंभवां आत्मानंयोनबुध्येतनक्वचित्क्षेममाप्नुयात् ५८ स्मृत्वेहायांपरिक्ले
शंततःफलविपर्ययं अभयंचाप्यनीहायांसंकल्पाद्विरमेन्मुनिः ५९ सुखायदुःखमोक्षायकुर्वातेदंपतीक्रियाः ततोनि
वृत्तिरप्राप्तिर्दुःखस्यचसुखस्यच ६० एवंविपर्ययंबुध्वानृणांविज्ञाभिमानिनां आत्मनश्चगतिंसूक्ष्मांस्थानत्रयविलक्षणां ६१

२२

त्वदुःखोदर्कत्वनिमित्तभयरहितमम्भत्वंचपश्यन्मुनिः स्वात्मपरमात्मयाथात्म्यमननशीलः तत्तदीहातः शनैर्विरमेत्तदुक्तविधा
लोचनेनशनैर्वैराग्यमुत्पादयेदित्यर्थः ततोज्ञानविज्ञानेप्रतिष्ठितेभवतइतिभावः ५९ ईहायांपरिक्लेशफलविपर्ययावेव।
स्पष्टयति सुखायेति सुखायतत्प्राप्तयेदुःखनिवृत्तयेचक्रियाःतदुपयुक्तव्यापारांदंपतीअपिकुर्वातेतथापिततस्तत्क्रिया
भ्यःदुःखस्यानिवृत्तिःसुखस्याप्राप्तिश्चदुःखस्यनिवृत्तिःसुखस्यप्राप्तिश्चनभवतिप्रत्युतविपरीतमेवभवतीतिभावः ६० अनीहा।
यामुभयंस्पष्टयति एवमिति विज्ञाभिमानिनांवयमीहायांकुशलाः इत्यभिमानवतांनृणांईहायामेवमुक्तप्रका
रेणविपर्ययंबुध्वाआलोच्यस्थानत्रयविलक्षणांजाग्रत्स्वप्नसुषुप्तीनांकेवलाविषयासक्तेर्दुर्ज्ञेयामात्मनःप्रत्य
गात्मनोगतिंब्रह्मात्मकत्वाद्याकारंबुध्वा ६१ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥ ॥श्री॥

वकुशोभनमितिपाठःक्षे स्त्र ५९२

मा१

भा०ख०
७४

अतद्वीर्यविदुषितत्तस्यवीर्यप्रभावंतेजो यस्तांन देवा वेत्ति त्वायेन तेजो विशेषं विद्वांस्तस्मिंश्चित्रकेतौऽयंप्रद्वेष्वन्नस्तात्मकंशोभनं शिवं प्रति ब्रुवा
णोयतिदेव्याविकानिर्जितात्माभिमानिने जितेंद्रियत्वाभिमानवते अत एव दुष्टाय चित्रकेतवे रुषा क्रोधेनोवाच ननु तदनुव्रताः सभासु शीव
भवः कथं सा मामनुव्रता भवेतिश्रुत्वा तदनुव्रता देवी चित्रकेतुं राजवती त्याशोकात्क्षेत्युक्तं २० तदेवाह अयमित्यादिना किल्विषमित्यंतेन॥
तावन्नसुपालभने द्वाभ्यां अयमधुना किमर्थमागत इति रोषः अहो अस्मात्त्वं दंडयितुमधुनायमागत इत्युपालंभः तदेवाह अहो निर्लज्जा
नामस्मद्विधानां दुष्टानाम यं शास्ता हिताहितयो विविच्य ज्ञापकः शासनातिवर्त्तिष्वेव दंडधरः दंडयिता प्रभुर्दंडने समर्थ अतएव विप्रकृत्
इमनकारी २१ अहो पद्मयोन्यादयो धर्मं न विंदंति यतस्तेऽतिवर्त्तिनं मर्यादातिवर्त्तिनं हरं रुद्रं नो निषेधंत्यमं त्वधुना निषेधत इत्युपालंभः।

इत्यतद्वीर्यविदुषि ब्रुवाणे ब्रह्म शोभनं रुषाह देवी धृष्टाय निर्जितात्माभिमानिने २० पार्वत्युवाच॥ अयं किमधुना लोके शास्ता
दंडधरः प्रभुः अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत् २१ न वेद धर्मं किल पद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः न वै कु
मारः कपिलो मनुश्च ये नो निषेधंत्यतिवर्त्तिनं हरं २२ एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मंगलमंगलं स्वयं यः क्षत्रबंधुः परि
भूय सूरीन् प्रशास्ति धृष्टस्तदयं हि दंड्यः २३ नायमर्हति वैकुंठपादमूलोपसर्पणं संभावितमतिः स्तब्धः साधुभिः पर्युपासितं २४
अतः पापीयसीं योनिमासुरीं याहि दुर्मते यथेह भूयो महतां न कर्त्ता पुत्र किल्बिषं २५॥

43

तत्र पद्मयोनिर्ब्रह्मा कुमारः सनत्कुमारः
मनुः स्वायंभुवः २२ तमेवमुपालभ्यावक्षेपमयं निग्राह्य इत्याह एषामिति द्वाभ्यां तावत्प्रतिपाद्यस्य इष्यारूढं विशिनष्टि येषां पद्मयोन्यादी
नाम नुध्येयं ध्यातुं योग्यं पदाब्जयुग्मं यस्य जगद्गुरुं जगद्धितोपदेष्टारं स्वयं साक्षान्मंगलानामपि मंगलं ईदृशं हरिं सूरींश्चैव प्रायंच
श्रियाधमः परिभूय यद्यस्मात्प्रशास्ति तत्तस्मादयं दुष्टो दुरात्मा रेऽसः एव सूरीन् परिभूय जगद्गुरुं गिरिशं प्रशास्तीति वाक्यः २३ ननु भ
गवद्भक्तो यं न दंड्य इत्यत्राह नायमिति साधुभिः परिसेवितं सकृत्तं यद्वैकुंठस्य भगवतः पादमूलस्य उपसर्पणमनुसरणं सेवेति याव
त् तत्प्रसंगात्तत्र बंधुर्नार्हति कुतः यतोऽयं संभाविता अहमधिक इत्याभिमानवती मतिर्यस्य सः अत एव स्तब्धः [illegible]
स्थितः २४ किं तर्हि युक्तं तदाह अतः भगवत्सेवानर्हत्वाद्धे दुर्मते त्वमासुरीं पापीयसीं योनिं याहि हे पुत्र यथा भूयो महतां किल्वि
षमपराधं न कर्त्ता न करिष्यसि तथा याहीति २५॥

राम
७४

तदेवाह स इति महायोगी भगवान्स चित्रकेतुरव्याहतं बलं येषां तानीन्द्रियाणि यस्य तादृशो लक्षवर्षाणां लक्षं बहुकालमित्यर्थः मुनि
भिः सिद्धैश्चारणैश्च स्तूयमानः २ नानाविधाः स्वसंकल्पानुसारिण्यः सिद्धयः भोगपभोगोपकरणादिसिद्धयो यासु कुलाचलेन्द्रस्य मेर्वादे
द्रोणीषु विद्याधरैश्च स्त्रीभिरीश्वरं हरिं गापयन् गानं कारयन् रेमे ३ स चित्रकेतुरेकदा कदाचिद्विष्णुदत्तेन यथासंकल्पं भगवता द
विमानेन ४
त्तेन भास्वता प्रकाशमानेन तत्र तत्र गच्छन् संचरन् सिद्धैर्योगिभिश्च परीतं रुद्रं ददृशे ४ कथंभूतं रुद्रमंके उत्संगे कृतां निधापितां देवीं भवि
कां बाहुना आलिंग्य मुनीनां मननशीलानां संसदि सभायां स्थितमिति शेषः ततो देव्याः अपि एवं तां सत्यां उवाच जहास च हसितवांश्च ५ त

स लक्षं वर्षलक्षाणामव्याहतबलेन्द्रियः स्तूयमानो महायोगी मुनिभिः सिद्धचारणैः २ कुलाचलेन्द्रद्रोणीषु नानासंकल्पसिद्धि
षु रेमे विद्याधरस्त्रीभिर्गापयन्हरिमीश्वरं ३ एकदा स विमानेन विष्णुदत्तेन भास्वता गिरिशं ददृशे गच्छन् परीतं सिद्धचा
रणैः ४ आलिंग्यांकीकृतां देवीं बाहुना मुनिसंसदि उवाच देव्याः शृण्वन्त्या जहासोच्चैस्तदन्तिके ५ चित्रकेतुरुवाच एष लोक
गुरुः साक्षाद्धर्मं वक्ता शरीरिणाम् आस्ते मुख्यः सभायां वै मिथुनीभूय भार्यया ६ जटाधरस्तीव्रतपा ब्रह्मवादी सभापतिः अं
कीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा ७ प्रायशः प्राकृताश्चापि स्त्रियं रहसि बिभ्रति अयं महाव्रतधरो बिभर्ति सदसि
स्त्रियं ८ श्रीशुक उवाच ॥ भगवानपि तच्छ्रुत्वा प्रहस्यागाधधीर्नृप तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः ९ ॥श्रीः॥ १

देवाह त्रिभिः एष रुद्रः साक्षाल्लोकानां गुरुः हितोपदेष्टा किंच शरीरिणां धर्मवक्ता मुख्यः प्रधानः स्वयमीदृशः सन् सभायां भार्यया मि
थुनीभूयास्ते ६ किंच जटाः बिभर्तीति तथा तीव्रमुग्रं नितान्तं वा तपो यस्य स ब्रह्मज्ञानोपदेष्टाऽपि च सभायाः पतिः प्रधान एवंभूतोऽपि
लज्जाहीनः अंके स्त्रियं कृत्वा निधायास्ते उपविष्टवान् ७ किंच प्राकृता अपि बहुशो रहस्येव स्त्रियं बिभ्रति निधापयन्ति अयं तु महा
व्रतधरो सभायामेव स्त्रियमंके बिभर्ति अयं महान् अन्याय इति भावः ८ ततस्तच्चित्रकेतोर्वचः श्रुत्वाऽपि भगवान् रुद्रः अ
गाधा गंभीरा धीर्यस्य तादृशोऽत एव प्रहस्य तूष्णीं बभूव हे नृप तथा तं रुद्रमनुव्रतास्तदनुव्रताः सभ्याश्च तूष्णीं बभूवुः ९

भा०१०
७५

स्वरूपं४
व्व५

एवं वैषयिकसुखदुःखयोः पुरुषार्थत्वापुरुषार्थत्वाभ्युपगमेन कर्मानुसारेणेश्वरस्य कर्तृत्वमुक्तं इदानीं वैषयिकसुखं विषमिश्रक्षीरवद्
ततो दुःखहेतुत्वादपुरुषार्थरूपमेवेत्याह गुणप्रवाह इति गुणानां प्रकृतेर्गुणानां सत्वरजस्तमसां प्रवाहे परिणामरूपे एतस्मिन्प्रकृतिमण्डले जन्
तूनां कः शापः को वानुग्रहः उभयोर्वैलक्षण्यमेव दुर्वचमेवेति भावः तद्दुर्वचं तयोः स्वरूपं स्वर्गहेतुरनुग्रहो नरकहेतुर्निग्रह इति सुवचमेवे
त्यत्राह कः स्वर्गो नरको वेति स्वर्गनरकयोरपि दुर्वचमेवेति भावः ननु स्वर्गः सुखं दुःखं नरकमिति सुवचमित्यत्राह किं सुखं दुःखमेव वेति।
तदप्य[illegible] स्थितमित्यर्थः स्वर्गस्य सुखरूपत्वे दुःखगर्भत्वं तस्यान्नरस्यैकदुःखरूपत्वे वा तस्य सुखगर्भत्वात् स्वर्गोऽपि ततो दुःखहेतु
र्नरकोऽप्यतः किंचित्सुखहेतुर्दृष्टः अत उभयोरुभयगर्भत्वात्परस्परं व्यवस्थितिर्नास्तीति भावः शापनरकदुःखानि दृष्टान्तार्थतयोपात्तानि य
पातेषु पुरुषार्थत्वं तेषु तत्त्वं च नास्ति तथानुग्रहस्वस्य सुखेऽपीत्यर्थः २० नन्वेवंविधसुखदुःखवंति भूतानि किमकस्मात्स्वयमेवोत्पद्यंते

म२

गुणप्रवाह एतस्मिन् कः शापः को न्वनुग्रहः कः स्वर्गो नरको वापि किं सुखं दुःखमेव वा २० ॥
एकः सृजति भूतानि भगवानात्ममायया एषां बंधं च मोक्षं च सुखं दुःखं च निःकलः २१ ॥ ॥

४४

नेत्याह एक इति भगवान्निरस्तनिखिलदोषः षाड्गुण्यपूर्णः परमपुरुषस्त्वात्मनः स्वस्य मायया स्वयमेकः निस्समाभ्यधिकः स्वसमाभ्यधि
ककर्त्रंतर[illegible]करणांतरनिरपेक्षः एवं भूतानि देवमनुष्यादीनि विचित्रात्मकानि आब्रह्मस्तंबपर्यन्तानि सृजति न तु तान्यकस्मादुत्पद्यंत
इति भावः नहि किं कुलालादिवत्कर्मी यत्न देही भगवानित्याह निःकलः कर्माधीनयाप्तिपादाद्यवयवात्मकदेहरहितः तस्य वैषम्यनै
र्घृण्यादिदोषपरिहाराय भूतानि विशिनष्टि एषामिति एषां भूतानां स्वस्वकर्मानुगुणं बंधमोक्षादिकं भवति तानि सृजतीत्यन्वयः बं
धमोक्षमिति द्वितीयांतपाठे एषां भूतानां तत्तत्कर्मानुसारे एवं बंधादिकं च सृजति स एव तान्यपि सृजति न ततोऽपि वैषम्यादिदोष इत्य
र्थः एषामित्येतच्छब्दपाठे बंधमित्यादीनां द्वितीयांतपाठेऽनुसृष्टानामेतेषां भूतानां तत्तत्कर्मानुसारेण बंधादिकमपि सृजतीत्यर्थः
एवं बंधादिकं देवमनुष्यादिवैचित्र्यं च तत्तज्जीवकर्मानुसारेण तेषामीश्वरकृतमौपाधिकं न स्वरूपप्रयुक्तमित्युक्तं भवतीत्यर्थः। २१॥

राम
७५

हे भारत एवं इत्थं शप्तः स चित्रकेतुर्विमानादवरुह्य सतीमम्बिकां नम्रेण मूर्ध्ना प्रसादयामास प्रसन्नामकरोत् २६ तदेवाह प्रतीत्यादिना हे मातः सती
त्वं तेन [illegible] तावन्मम रोषो नास्तीति सूचयन् शापं स्वीकरोमि इत्याह हे अम्बिके ते त्वया दत्तं शापमात्मनो ऽञ्जलिना प्रतिगृह्णामि अञ्जलिबन्धपूर्वकं स्वी
करोमि मयि महाननुग्रहः त्वया कृतो न तु निग्रह इति भावः तदेव स्पष्टयति [illegible] तत्कुतः
हि यस्मात् देवैः प्रोक्तं तस्य निग्राह्यस्य वा जन्तोः पूर्वदिष्टं प्राचीनकर्मप्रयुक्तं मोक्षविरोधि प्राचीनकर्म एव श्राप्यतो नितरां मम मुक्तो मम प्रा
क्तनविरोधिप्राचीनकर्मफलरूपत्वाच्चानुभवेन निःशेषनिरस्तकर्मबंधस्य भगवत्प्राप्त्या निरतिशयानंदरूपमहाभ्युदयलाभात्त्वयानुग्रह एव
कृत इति भावः २७ एतदेव घटयितुं तावज्जन्तूनां कर्मभिर्भ्रमणमाह संसारचक्र इति एतस्मिन्प्रवाहरूपेण परिवर्तनशीले गर्भजन्मजरामर
णरूपे संसारे ऽज्ञानेन ज्ञानेतरेणानादिपुण्यपापात्मकेन कर्मणा मोहितः स्वात्मपरमात्मयाथात्म्यज्ञानरहितः केवलदेहात्माभिमानी

शुक उवाच एवं शप्तश्चित्रकेतुर्विमानादवरुह्य सः प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत २६ चित्रकेतुरुवाच प्रतिगृह्णामि
ते शापमात्मनो ऽञ्जलिनाम्बिके देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं हि तस्य तत् २७ संसारचक्र एतस्मिन्जन्तुरज्ञानमोहितः भ्राम्यन्सुखं
च दुःखं च भुंक्ते सर्वत्र सर्वदा २८ नैवात्मा न परश्चापि कर्ता स्यात्सुखदुःखयोः कर्तारं मन्यते ऽप्राज्ञ आत्मानं परमेव च २९ ॥ ॥

जन्तुर्भ्राम्यन्पुनः पुनः पूर्वपूर्ववासनानुरूपेणोन्नरोत्तरसुखदुःखादिहेतुभूतानि कर्माणि कुर्वन् तत्फलं सुखदुःखं च भुंक्ते एतन्न केवलमस्मि
न्नामकजन्तोः किंतु सर्वेषामेव जन्तूनामित्याह सर्वत्रास्यास्य तव मम च सर्वदा यावन्मुक्ति एतत्समानमिति भावः अस्य शापमात्रत्वे देहलनात्तवानादिकर्मप्र
युक्तदेहात्माभिमानमूलकः क्रोध एव न तस्यादितितात्पर्यं २८ यत एवमतस्त्वत्कारणकसुखदुःखादिकं सर्वमनादिकर्मनिमित्तमतावत्
तिरस्कर्तुर्ममांशावत्या त्वच्चनदोष इत्याह नैवेति सुखदुःखयोः कर्ता कारकः सुखदुःखादायक इत्यर्थः आत्मा स्वयं परो ऽप्यन्यस्य
न्नभवति किंतु तयोः कर्मैव निमित्तमितिभावः कर्मणः त्वत्प्रिकत्वाज्जडत्वाच्च कथं कालान्तरभाविसुखदुःखनिमित्तत्वमत्राह कर्तारमिति
प्राज्ञः पुण्यपापयाथात्म्यविस्मरणात्मानं परमपुरुषमेव सुखदुःखयोः कर्तारं मन्यते अयं भावः पुण्यपापेहि परमात्मनो निग्रहानु
ग्रहरूपे न तु प्रतिस्मरता आत्मकर्तृशास्त्रार्थानुवर्तिष्वनुग्रहः परमपुरुषस्य स एव हि पुण्यं नाम अननुवर्तिनि तु निग्रहः स एव हि पापं
एवं च परमपुरुष एव स्वशास्त्रानुवर्त्यननुवर्तिनिमित्तानुग्रहनिग्रहरूपपुण्यपापफलभूतयोः सुखदुःखयोः कर्तेति २९॥

स्फुर्द्

२४

भा०ष०
१६
पि५

एवं वस्तुस्थितिमभिधाय तच्छापोनुग्रह एवेति वदन्स्वापराधं क्षमापयति अतः वस्तुस्थितेरेवंविधत्वाद्धे भामिनि शापनिर्हरणाय त्वां॥
न प्रार्थये किं तु हे सति मम यावदुक्तमसाधु यथा तथा मन्यसे तत्तत्क्षम्यतामिति त्वां प्रसादये २४ इतीत्थं गिरिजां पार्वतीं प्रसाद्य प्रस-
न्नां कृत्वा चित्रकेतुर्हे अरिंदम स्मयतोस्त्वाश्चर्यं प्राप्तयोस्तयोर्भवभवान्योः पश्यतोः सतोर्विमानेन गमनसाधनेन जगाम २५
ततश्चित्रकेतोर्गमनानंतरं रुद्रो रुद्राणीमंबिकां प्रति रुद्रः इदं वक्ष्यमाणं देवर्षिप्रभृतीनां स्वपार्षदानां च शृण्वतामब्रवीत् २६ तदेवाह॥
दृष्टवतीत्यादिनासमर्दी त्वं तेन हे सुश्रोणि अद्भुतकर्मणः विचित्रस्वाभाविकक्रियाशक्तेर्भगवतो भृत्यवर्गाणां माहात्
म्यं दृष्टवत्यसि कथंभूतानां निःस्पृहाणां वैषयिकं सुखमनिच्छतां महात्मनामपकर्तृष्वप्युपकर्तृत्वबुद्धीनां सुखदुःखयोः समबु-
द्धीनां चेत्यर्थः २७ एतदृष्टांतेनान्यानपि भगवद्भक्तानीदृशानेवेत्याह नारायणपरा इति सर्वे नारायण एव परः परतत्वं येषां ते कुतश्च

अतः प्रसादये न त्वां शापमोक्षाय भामिनि यन्मन्यसे ह्यसाधूक्तं मम तत्क्षम्यतां सति २४ शुक उवाच॥ इति प्रसाद्य गि-
रिशौ चित्रकेतुररिंदमः जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः २५ ततस्तु भगवान्रुद्रो रुद्राणीमिदमब्रवीत् देवर्षिदै-
त्यसिद्धानां पार्षदानां च शृण्वतां २६ रुद्र उवाच॥ दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः माहात्म्यं भृत्यभृत्यानां निः-
स्पृहाणां महात्मनां २७ नारायणपराः सर्वे न कुतश्चन बिभ्यति स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः २८ देहिनां देह-
संयोगाद्द्वंद्वानीश्वरलीलया सुखं दुःखं मृतिर्जन्म शापोऽनुग्रह एव च २९ ॥

नार्वाचीनस्य निग्रहादेर्न बिभ्यति भयं न कु-
र्वंति कुतः स्वपतः स्वर्गादिष्वपि तुल्यार्थदर्शिनः तुल्यप्रयोजनदर्शिनः विषयार्थदर्शनमेव भयहेतुरिति भावः अपवर्गोऽत्र कैवल्यमोक्षः
भगवदनुग्रहरूपत्वेन तेषां न स्वर्गादितुल्यत्वकल्पनानुपपत्तेः यद्वा अपवर्गो मुक्तिः सा भगवद्दास्यमंतरेण तेषां न प्रयोजनं किं पुनः स्वर्गादि-
स्तेषां न प्रयोजनं इति सूचनार्थं चापवर्गशब्दः प्रयुक्तः स्वर्गस्यापि नरकतुल्यत्वख्यापनाय पुनर्नरकशब्दः यथा नरकस्तथा स्वर्गोपीत्यर्थः
तथा चोक्तं एते वै निरयास्तात स्थानस्य परमात्मन इति वासुदेवमनोयस्य जपहोमार्चनादिषु तस्यांतरायो मैत्रेय देवेंद्रत्वादिकं फ-
लं इति च स्वर्गादिषु तुल्यार्थदर्शिन इत्यनेन विषमदर्शनं भयहेतुरिति सूचितं २८ तत्र समदर्शननिमित्तं वक्तुं तावद्विषमदर्शननिमि-
त्तमाह देहिनामिति द्वाभ्यां नावदेहिनां जीवानां ईश्वरलीलया हेतुभूतया ईश्वरलीलात्मिकया जगत्सृष्ट्या यो देहसंबंधस्तस्मा

45

कोऽस्त्यंतर्हि जीवस्य स्वरूपं कुतस्तस्य कर्मायत्तं देवादिवैचित्र्यं वंधादिकं चेत्यपेक्षायामाह नकस्येति वस्तुतः कस्यापिजीवस्य कश्चिद्दयितादिर्ना
स्ति कुतः सर्वत्रदेवादिशरीरेषु समस्य समत्वेनावस्थितस्य ज्ञानैकाकारतया ज्ञानानंदस्वरूपत्वेन चावस्थितस्येत्यर्थः परस्परतारतम्येन हि प्रियाप्रि
यादिविभागः सर्वेषामात्मनामेकरसत्वान्न स्वरूपतः प्रियाप्रियादिविभाग इतिभावः ननु देवादिरूपेण वैचित्र्यात् कथं समत्वं तत्राह निरंजन
स्येति अंजनं स्वांतरापत्तिः तद्रहितस्य देवादिवैचित्र्यस्य प्रकृतिगतत्वाज्जीवस्वरूपगतत्वाभावात्सर्वत्र सम इतिभावः यत एव समो निरंजन
श्चात एव वैषयिकसुखेन रागः नासक्तिः [illegible] यत एव
सुखेन तस्य रागः कुतस्तरां तस्य वैषयिकलाभप्रतिबंधकविषये रोषः स्यादित्यर्थः तत्र दयितः प्रीतिविषयः अनुकूल इतियावत् प्रतीपः प्रति
कूलः ज्ञातिः सपिंडः बंधुर्वैवाहिकादिसंबंधवान् परोऽन्यदीयः स्वः स्वकीयः २२ एवं प्रकृतिविलक्षणं स्वाभाविकं जीवस्वरूपमुक्त्वा अथैवंभूतस्य
देवादिवैचित्र्यं बंधादिकं चोपपादयति यद्यप्येवंभूता जीवास्तथाप्येषां शरीरिणां जीवानां तच्छक्तिविसर्ग एव तस्य तज्जीवसंबंधिकर्मणो या

न कस्य कश्चिद्दयितः प्रतीपो न ज्ञातिबंधुर्न परो न च स्वः समस्य सर्वत्र निरंजनस्य सुखे न रागः कुत एव रोषः २२ तथापि
तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय बंधाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतयेऽवकल्पते २३ ॥ श्री

शक्तिस्तस्या विसर्गः सृष्टिरुत्तरोत्तरकर्मैव सुखादिरूपसंसृतये मोक्षाय चावकल्पते समर्थं भवतीति तन्निमित्तमित्यर्थः अयं भावः स्वभावतः
पूर्वोक्तविधानामपि बीजांकुरन्यायेनानादिकर्मवासनामात्रावशेषितानां कल्पांते परमात्मन्युपसंहृतानां पुनः कल्पादौ परमकारुण
केनेश्वरेण स्वाराधनेनैते निस्तरेयुरिति मनुजादि चतुर्णां प्रदत्तं करणकलेवरं धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनाववोधिवेदा
स्वयशास्त्राणि मयनादिवासनया तन्मोक्षं मनुष्याणां पशुपक्षिविरुत्त एगाहाराविस्पाद्युक्तैस्तत्साईहमानानां पुण्यपापरूपकर्माणि
पातन[illegible]तत्फलानुभवादिपरंपरया सर्वमुपपन्नमिति तत्र हिताहिताय सुखदुःखहेतुभूतधर्मा
धर्माय मृत्युजन्मनोर्जन्ममरणाभ्यामित्यर्थः तादर्थ्यस्य संबंधसामान्यत्वेन विवक्षया षष्ठी प्रयुक्ता मोक्षाय च तच्छक्तिविसर्ग एवावकल्पत इ
त्यनेन भगवत्प्रसादहेतुः कश्चिद्या[illegible]च्छिकानुषंगिकमासंगिकाद्य मनसपुण्यपापकर्मविशेष एव मोक्षोपायोपसंहारहेतुरिति स्मृतिः

एवंस्वभार्यायैर्नारायणपरायणानांमहात्म्यमजानंत्येतत्त्वदर्शितिरुद्रेणायस्त्रीस्वभावत्वात्सर्वेश्वरेसर्वकारणेत्वयिहृदूक्तेषुवात्वत्त्वरूप त्वन्नियाम्यनारायणस्यतद्भक्तानांवासमुद्रेविशुद्धिवक्किपदेतन्नमहात्म्यमित्याशंकमानांप्रत्याह नाहमिति अहंरुद्रःअस्मदादयोयस्यना रायणस्येहितंभावेक्तःईहाचेष्टांतत्स्वरूपंचनविदाम नजानीमः ईहाचजगद्व्यापाररूपाचेष्टाः अज्ञानेहेतुः अंशांशकाःतदाहित तैःद्वानशक्तिलेशयुक्ताः तन्मात्रेणैववयमपिपृथगीश्वराइत्यभिमानयुक्ताःअनेनस्वस्मिन्सर्वेश्वरत्वशंकानिवर्तिता ईहितंनविदा मैत्यनेनकारणत्वशंकापिसृष्ट्यादिव्यापारस्यतत्कर्तृत्वकथनात् स्वरूपंचनविदामेत्यनेनतत्स्वरूपस्यानंतमहिमशालित्वमपरिछि न्नत्वंचोक्तं तत्रविरिंचोब्रह्माकुमारःसनत्कुमारःब्रह्मपुत्रामरीच्यादयःमुनयःतद्व्यतिरिक्ताअन्येमुनयःसुरेशाइंद्रादयः ३२ यद्ययंस र्वेश्वरःसर्वकारणभूतःतर्हिस्वप्राकृतस्येवाश्रितेष्ववविशिष्योक्तविधमहात्म्यापादकःकिमपेपक्षपातःतत्राह नहीति अस्यना

नाहंविरिंचोनकुमारनारदौनब्रह्मपुत्रामुनयःसुरेश्वराः विदामयस्येहितमंशांशकाशकानतत्स्वरूपंपृथगी शमानिनः ३२ नह्यस्यास्तिप्रियःकश्चिन्नाप्रियःस्वपरोऽपिवा आत्मत्वात्सर्वभूतानांसर्वभूतप्रियोहरिः ३३

रायणस्यातीवप्रियादिःकश्चिन्नास्तितत्रहेतुरात्मत्वात्सर्वभूतानांब्रह्मादिस्तंवपर्यंतानांचिदचिदात्मकानांभूतानामात्मत्वादंतरात्मत्वा त् नह्यात्मनएकंशरीरंप्रियमेकमप्रियंभवतीतिभावः यतएवात्मासर्वभूतानामतस्तेषामाश्रयःधारकःअतः प्रविरूपभर्तेत्यर्थः स र्वभूताश्रयइत्यनेनशरीराणांसर्वभूतानामात्मपरमात्मानुवर्तनंयुक्तमितिसूचितं नहिशरीरमात्मानमनुवर्त्यावतिष्ठतेशरीरस्या त्मानुवर्तनस्वभावत्वात् हरिरित्यनेनस्वानुवर्त्यार्तिहरत्वंसूचितं एवंचयेस्वाभाविकंजीवपरमात्मनोःशरीरात्मभावंजानंतस्स मनुवर्तंतेतेषुतस्यानुग्रहः इतरेषुतदभावइतितात्पर्यं अतएवतस्यवैषम्यमित्यपिसूचितं नह्यनुवर्तिष्वनुग्रहमात्रेणतस्य वैषम्यंनह्याश्रिताभीष्टप्रदस्यसुरद्रुमस्यानाश्रिताभीष्टाप्रदानमात्रेणतस्यवैषम्यमापादयितुंशक्यं ३३ ॥ ॥ ॥

[illegible] मनुदृष्टे [illegible] गवैविवेकोवाहेतुरितितात्पर्यं २९ तर्हितत्र कोहेतुस्तत्राह ग्नविवेककृतइ
ति ग्नात्मनिज्ञानैकाकारेजीवेऽर्थभेदइवदेवमनुष्यत्वादिभेदइवगुणदोषविकल्पः गुणाः सुखजन्मानुग्रहाः दोषाद्दुःखमतिज्ञापाः ग
र्वाविकल्पभेदः ग्नविवेककृतः ग्ननादिकर्मनिमित्तो योदेहात्मभ्रांतिरूपोऽविवेकः तेनकृतः त[illegible]न्निमित्तइत्यर्थः ग्नर्थभेदस्यावि
वेककृतत्वंसिद्धवत्कारेणदृष्टांतितः उभयमप्यविवेककृतमितितात्पर्यं ग्नत्रएवार्थभेदस्याविवेककृतत्वंदेहात्मभ्रांतिमतांपुरुषाणा
७५ मप्रसिद्धमितितस्यदृष्टांतत्वमस्वरसमिस्यामिप्रेत्यप्रसिद्धंदृष्टांतांतरमाह मिदेवस्वप्नकल्पितेति यथास्वप्नद्रष्टुः स्वस्मिन्वस्तुतोऽवि
द्यमानएवगजस्कंधारोहेणदेशांतरगमनराज्याभिषेकशिरश्छेदाघर्हृदेहभेदस्तन्मात्रानुभावः तत्कालमात्रावसायीचनतुतत्कर्मनि
मित्तदेहात्मभ्रांत्याद्यनुगुणमीश्वरकल्पितो विवेककृतस्तथाजाग्रदवस्थानुभाव्यसुखदुःखादिद्वंद्वजालानिदेवादिवैचित्र्याणिचतत्त
त्कर्मतन्मूलकदेहात्माभिमानाद्यनुगुणमीश्वरकृतान्यप्यविवेकमूलान्येवेतिभावः ३० एवंभयनिमित्तेविषमदर्शनेऽविवेकोहेतु

ग्नविवेककृतः पुंसोह्यर्थभेदइवात्मनि गुणदोषविकल्पश्चभिदेवस्रजिवत्कृतः ३० ॥
वासुदेवेभगवतिभक्तिमुद्वहतांनृणां ज्ञानविज्ञानवीर्याणांनेहकश्चिद्व्यपाश्रयः ३१ ॥

रित्युक्त्वमथनारायणपरायणानांईदृशाविवेकाभावात्कचित्कदाचिदुत्पन्नस्याविवेकस्यपुनस्त्वात्मपरमात्मयाथात्म्यावमर्शोनतदयो
हात्तन्मूलकंविषमदर्शनंतन्मूलकंभयदर्शनंचनास्तीत्याह वासुदेवइति ज्ञानंशास्त्रजन्म[illegible]
[illegible] वैराग्यंशब्दादिविषयेष्वनासक्तिरूपंएतदुभयमेववीर्यंवलंयेषां तेषांवासुदेवेभगवतिनिरतिशयानंदरूपेभक्तिमुद्वहतांकु
र्वतांनृणांकुत्रचिदपिहेतोर्व्यपाश्रयः ग्नपगतग्राश्रयः यस्मात्सविषमदर्शन[illegible] ग्नाश्रियमाणो परमात्मापगतोभवतिविस्मृ
तोभवतिनात्वाविषमदर्शनंनास्तीत्यर्थः निरंतरप्रवृत्तिपुरुषेश्वरयाथात्म्यावलोकनतत्प्रयुक्तवैराग्यवलविस्मृतदेहतत्तदनुब
धितद्धर्माणोनिरतिशयानंदरूपभगवद्भक्तिनिर्वर्तनोभविवेकाभावात्कचित्कदाचित्प्रकाशितस्याप्युक्तविधज्ञानवैराग्यवलेन
तन्निरसनशीलत्वाच्चतेषांविषमदर्शनमेवनास्तिकुतः तन्निमित्तंभयमितिभावः ३२ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥

भा०ष०
१८

एवं दाक्षायण्याः कश्यपभार्यायाः अदितेर्वंशमुपक्रम्य विवस्वदर्यमपूषत्वष्टॄणां वंशमभिधाय तत्र सवितुर्वंशस्तदनुप्रसक्तं चाभिहितमथ स
वित्रादीनां वंशमनुक्रमते पृश्निरित्यादिना सवितुः पत्नी पृश्निः सावित्र्याद्यभिमानी देवताः प्रासूते तेषु मरस्यानुषंगः पश्वेव यागः
तदभिमानी देवताविशेषमिति एवमुत्तरत्रापि महामखान्स्त्वमहायज्ञान् १ एवं भगस्य भार्या सिद्धिरिति प्रसिद्धा भगादीन् तनुः पुत्राः
तथा धातुः समनन्तरो विधाता क्रियायां पत्न्यामग्नीन्पुरीष्यसंज्ञकान् एकचित्या गतीनां धनञ्जनयामास ३ वरुणस्य चर्षणी इति प्रसि
द्धा भार्या आसीत् भृगुः पूर्वं ब्रह्मणः पुत्रो यस्या पुनर्जातिः तथा वरुणस्यैव पुत्रो वाल्मीकिर्महायोगी वल्मीकादभवदेनौ वरुणस्याया
धारणौ पुत्रौ ४ ५ तथा रेवती भार्यायां मित्रस्योत्सर्गादेयोः साधारणः सुताः ३ मयोः साधारणौ सुतावगस्त्यवसिष्ठावृषी कथ

श्रीशुक उवाच ॥ पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतीं त्रयीं अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान् १ सिद्धिर्भगस्य भा
र्यांगमहिमानं विभुं प्रभुं आशिषं च वरारोहां कन्यां प्रासत सुव्रतां २ धातुः कुहूः सिनीवाली राका चानुमतिस्तथा सा
यं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ३ अग्नीन्पुरीष्यानाधत्त क्रियायां समनन्तरः चर्षणी वरुणस्यासीद्यस्यां जातो भृ
गुः पुनः वाल्मीकिश्च महायोगी वल्मीकादभवत्किल ४ अगस्त्यश्च वसिष्ठश्च मित्रावरुणयोरृषी । रेतः सिषिचतुः कुंभे उर्व
श्याः सन्निधौ द्रुतं ५ रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ६ पौलोम्यामिन्द्र आधत्त त्रीन्पुत्रानिति नः श्रुतं जयन्तमृष
भं तात तृतीयं मीढुषं प्रभुं ७ उरुक्रमस्य देवस्य मायावामनरूपिणः कीर्त्यां पत्न्यां बृहच्छ्लोकस्तस्यासन्सौभगादयः ८ तत्कर्म
गुणवीर्याणि काश्यपस्य महात्मनः पश्चाद्वक्ष्यामहेऽदित्यां यथैवावततार ह ९ ॥

मेकैकस्योभयसुतत्वं तत्राह रेत इति कदाचिन्मि
त्रावरुणौ उर्वश्याप्सरसः संनिधौ द्रुतं स्खलितरेतः कुंभे घटे सिक्तवन्तौ तत्र कुंभे वसिष्ठागस्त्यौ जातौ इति भावः ५ रेवत्यां मित्र उत्स
र्ग्यात प्रायं व्यधाज्जनयामास ६ हे तात प्रभुरिन्द्रः शक्रः पौलोम्यां शच्यां पत्न्यां जयन्तमृषभं तृतीयं मीढुषं इति त्रीन्पुत्रानजनयदिति
नोऽस्माभिः श्रुतं ७ तथोरुक्रमस्य त्रिभिः पादक्रमैर्लोकत्रयमाक्रान्तवतो मायया आत्मीयसंकल्पेन वामनरूपेणावतीर्णस्य कीर्त्याख्या
यां भार्यायां बृहच्छ्लोकः पुत्रस्तस्य बृहच्छ्लोकस्य सौभगादयः पुत्रा आसन् ८ कश्यपपुत्रस्य महात्मन उरुक्रमस्य तानि प्रसिद्धानि क
र्माणि पदत्रयेण लोकत्रयं याच्ञादीनि गुणाः स्वभक्तविषयकानुग्रहादिः सर्वज्ञत्वादयः वीर्याणि उत्कृष्टगुणोरन्येभ्य उत्कर्षो हि वी

यैतद्वायवीयाच्च पुष्ककोर्भवंशेवभ्याम मात्याहिरण्यायनस्यकारेण
कोर्णिवास्पकारं त्वमतीवव द्वाराः १५

यत एवायमात्माभूतानामाश्रितानामभीष्टार्थदो विषमस्थान एव चित्रकेतुवदहमपि तमेवोपासइत्याह तस्येति महाभागो विवेकी स
र्वत्र समदृक् शांतश्च चित्रकेतुस्तस्य नारायणस्यानुगो भक्तः भक्तस्यान्त एव प्रियः निरतिशयप्रीतिविषयः तथाहमप्यच्युतस्य प्रियः
तस्मिन्निमित्ते भक्तिमांश्च ३४ तस्मान्महापुरुषस्य भगवतो भक्तेषु महात्मसु प्रकृतिपुरुषेश्वरयाथात्म्यावमर्शनप्रवणचित्तेषु
त एव समदर्शिषु शांतेषु विरक्तेषु पुरुषेषु न विस्मयः कार्यः ३५ भगवतः शिवस्येत्थं एवमभिभाषितं वचः श्रुत्वा गौरी देवी विगतवि
स्मया विस्मयरहिता शांतधीः क्रोधरहिता च बभूव ३६ ततो भागवतश्चित्रकेतुर्गौर्याः प्रति सद्यः प्रतिशापं कर्तुं समर्थोऽपि तस्याः
शापं मूर्ध्ना संजगृहे शिरसोवाह साधूनां लक्षणमेतावदिहापकर्तृष्वप्युपकर्तृत्वबुद्धिमत्त्वमेव हि ध्रुवं सोऽनालक्षणमित्यर्थः ३७

तस्यैवायं महाभागश्चित्रकेतुः प्रियोऽनुगः सर्वत्र समदृक् शांतो ह्यहं चैवाच्युतप्रियः ३४ तस्मान्न विस्मयः कार्यः पुरुषेषु महा
त्मसु महापुरुषभक्तेषु शांतेषु समदर्शिषु ३५ शुक उवाच ॥ इति श्रुत्वा भगवतः शिवस्योमाभिभाषितं बभूव शांतधीराज
न्देवी विगतविस्मया ३६ इति भागवतो देव्याः प्रतिशप्तुमलंतमः मूर्ध्ना संजगृहे शापमेतावत्साधुलक्षणं ३७ जज्ञे त्व
ष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ३८ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि
वृत्रस्यासुरजातेश्च कारणं भगवन्मतेः ३९ इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः माहात्म्यं विष्णुभक्तानां श्रुत्वा बंधाद्वि
मुच्यते ४० य एतत्प्रातरुत्थाय श्रद्धया वाग्यतः पठेत् इतिहासं हरिं स्मृत्वा स याति परमां गतिं ४१ इति षष्ठे सप्तदशो ध्या०

यत् पृष्टं राज्ञा वृत्रस्यासुरस्वभावस्य नारायणे भगवति कथं दृढा मतिस्तस्योत्तरं संगमयति जज्ञ इति योऽयं मुक्तविधश्चित्रकेतुः स
एव त्वष्टुः संकल्पाद्दक्षिणाग्नेर्जातो जातः स एवासुरीं योनिमासुरभावमाश्रितः वृत्र इत्यभितः विख्यातः प्रसिद्धः सपूर्वजन्मसिद्धभगव
द्भक्त्याऽसिन्नपि जन्मनि ज्ञानविज्ञानाभ्यां युक्तः ३८ एवं तस्य पूर्वं प्रश्नस्योत्तरमुक्तमित्याह एतदिति यत्त्वमसुरजातेर्वृत्रस्य भगवति
मतेर्भक्तेः कारणं परिपृच्छसि पर्यपृच्छस्तस्योत्तरमेतत्सर्वं सप्रपंचं तेतुभ्यं मयाख्यातं कथितं ३९ अस्य चित्रकेतोरितिहासश्रवण
फलमाह इतिहासमिति महात्मनश्चित्रकेतोः संबंधिनं पुण्यमिममितिहासं विष्णुभक्तानां माहात्म्यसूचकं श्रुत्वा बंधात्संसा
रबंधाद्विमुच्यते मुक्तो भवेत् ४० यः पुमान्प्रातरुत्थाय श्रद्धयान्वितो वाग्यतः नियमितवाक् हरिं स्मृत्वा एतमितिहासं पठेत्स परमां

बाणस्तु गिरिशं रुद्रमाराध्य तद्गणवर्गे मुख्यतां लेभे तदेव व्यंजयन् बाणं विशिनष्टि यस्य बाणस्य पार्श्वे ऽद्यापि पुरपालकः सन् भगवान् गिरिशस्त्वास्ते १८ अन्यानपि दितेः पुत्रानाह मरुतश्चेति चकारो हिरण्यकशिपुहिरण्याक्षयोः समुच्चयार्थः मरुतो मरुद्गणाश्चत्वारिंशन्नवाधिकाः एकोनपंचाशत्संख्याकाः दितेः पुत्रा एव ते सर्वे मरुतः अप्रजाः अपुत्रा आसन् ते च इंद्रेण सात्मतां समानस्वरूपत्वं देवत्वं इति यावत् नीताः प्रापिताः अतो न ते देवानां दायादा इति भावः १९ एतदेव शुश्रूषुः पृच्छति राजा द्वाभ्यां कथमिति हे गुरो सुनेते मरुतः कथमौत्पत्तिकं जन्मसिद्धमासुरं भावमपोह्य त्यक्त्वा इंद्रेण सात्म्यं देवत्वं प्रापिताः देवत्वं प्रापितैस्तैर्मरुद्भिः किं तत्साधु हितं कृतं २० न केवलमिदमहमेव शुश्रूषुः अपितु हे ब्रह्मन् इमे ऋषयोपि परिज्ञानाय वेदितुं श्रद्दधते श्रद्धां कुर्वंति अतो हे भगवन् नोस्मभ्यं व्याख्यातुं कथयितुमर्हसि २१ एवमाचक्षाणमु

बाणआराध्यगिरिशं लेभेतद्गणमुख्यतां यत्पार्श्वे भगवानास्ते ह्यद्यापि पुरपालकः १८ मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः॥ त आसन्नप्रजाः सर्वे नीता इंद्रेण सात्मतां १९ राजोवाच कथं त आसुरं भावमपोह्यौत्पत्तिकं गुरो इंद्रेण प्रापिताः सात्म्यं किं तत्साधु कृतं हि तैः २० इमे श्रद्दधते ब्रह्मन्नृषयो हि मया सह परिज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि २१ सूत उवाच॥ तद्विष्णुरातस्य स बादरायणिर्वचो निशम्यादृतमल्पमर्थवत् सभाजयन् संनिभृतेन चेतसा जगाद सत्रायण सर्वदर्शनः २२ शुक उवाच॥ हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना मन्युना शोकदीप्तेन ज्वलंती पर्यचिंतयत् २३ दितिरुवाच कदा नु भ्रातृहंतारमिंद्रियाराममुल्बणं अक्लिन्नहृदयं पापं घातयित्वा शये सुखं २४ ॥

निःशम्य अभिनंद्य यथावदाचचक्ष इत्याह सूतः तदिति बादरायणस्यापत्यं पुमान् विष्णुरातः श्रीशुको ल्पमिताक्षरमर्थवद्बादरायणेर्भत्स्यराजस्तद्वचश्चाहृतं सादरं यथा तथा निशम्य निभृतेन चेतसा पूर्णेनांतःकरणेन राजानं सभाजयन् संमानयन् सर्वज्ञो मुनिः हे सत्रायण सत्रं ब्रह्मसत्रमयनमाश्रयो यस्य ब्रह्मसत्रेण दीक्षित इत्यर्थः तस्य संबोधनं हे शौनक जगाद २२ तदेवाह हतपुत्रेति शक्रपार्ष्णिग्राहेण शक्रं इंद्रं पार्ष्णिं पश्चात् स्वीयत्वेन गृह्णाति अंगीकरोति तथा विष्णुना हतौ पुत्रौ हिरण्यकशिपुहिरण्याक्षौ यस्याः सा दितिः रत एव शोकेन दीप्तो योमन्युः क्रोधस्तेन ज्वलंती परितप्यंती पर्यचिंतयत् स्मरितस्त्रिचिंतामकरोत् २३ चिंतामेव वर्णयति कदेति भ्रात्रोर्हिरण्यकशिपुहिरण्याक्षयोर्विष्णुद्वारा हंतारं तत्र हेतुः इंद्रियाराममुल्बणं क्रूरमक्लिन्नहृदयमनार्द्रचित्तमत एव पापं पापात्मानं घातयित्वा कथमहं सुखं यथा तथा स्वप्स्ये शये जाननिद्राभवेयं इत्यर्थः २४ ॥

एवंसा कल्येनादितेर्वंशमनुक्रम्याथ दितेर्वंशस्यानुक्रमं प्रतिजानीते अथेति काश्यपादीनां विवस्वदादीनामादितेयानां दायादान्सपिण्डान्पुत्रान्दैतेयान् दितिपुत्रान् तुभ्यं कीर्तयामि कथयामि तद्वंशे भागवतानाम भागवन्तत्पूर्वं मया ये दितिनामितिरात्रोभिशायमालोच्याह यत्रदिते

७४ देवानां शत्रूमरुतामदायादस्य स्वसमाएन द्वाविवेत्युक्त पुत्रौ दैत्यैस्तत्पुत्रपौत्रादिभिर्दानवैश्च वंदितौ बभूवतुः तौ च हिरण्यकशिपुहिरण्याक्षकीर्तितौ प्रख्यातौ २२ तत्र हिरण्यकशिपोर्भार्याजंभस्य दुहिता दानवी दनुवंशोद्भवा कयाधुरिति प्रसिद्धा सा कयाधुः प्रह्लादादीन् चतुरः सुतान्सुषुवे २२ प्राक् प्रथमं प्रह्लादं ततः क्रमेणानुल्हादसंल्हादल्हादान्सुषुवेइत्यर्थः तत्स्वसा तेषां प्रल्हादादीनां स्वसा भगिनी

अथ काश्यपदायादान् दैतेयान्कीर्तयामिते यत्र भागवतः श्रीमान्प्रल्हादोवलिरेव च २० दितेर्द्वावेव दायादौ दैत्यदानववंदितौ हिरण्यकशिपुर्नाम हिरण्याक्षश्च कीर्तितौ २२ हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी जंभस्य तनया दत्ता सुषुवे चतुरः सुतान् २३ प्रल्हादं प्रागनुल्हादं संल्हादं ल्हादमेव च तत्स्वसा सिंहिका नाम राहुं विप्रचित्तोग्रहीत २४ शिरोहरद्यस्य हरिश्चक्रेण पिवतोमृतं

स्य संहरे संल्हादस्य कृतिर्भार्या सूत पंचजनं ततः २४ ल्हादस्य धमनी भार्या सूत वातापिमिल्वलं योगस्त्याय त्वतिथये पेचेवातापिमिल्वलः २५ अनुल्हादस्य सूर्म्यायां वाष्कलो महिषस्तथा विरोचनस्तु प्रल्हादिर्धुत्यांतस्याभवद्वलिः २६ वाणज्येष्टं पुत्रशतं शामनायां ततोभवत् तस्यानुभावः सुश्लोक्यः पश्चादेवाभिधास्यते २७ ॥

सिंहिकेति प्रसिद्धा बभूव सा विप्रचित्तेर्~~कृतिर~~ दुर्दानवात्सकाशात् राहुं पुत्रमग्रहीत्सुषुवइत्यर्थः २३ राहुं विशिनष्टि शिरइति यस्य राहोरमृतं पिवतः शिरश्चक्रेण चिच्छेद संल्हादस्य हैरण्यकशिपोः कृतिर्नाम भार्या पंचजनाख्यं सुतमसूत २४ तथा ल्हादस्य धमनीति प्रसिद्धा वातापिमिल्वलं चासूत इल्वलं विशिनष्टि यइति अतिथये अगस्त्याय निमंत्रिताय गस्त्यायेल्वलो मेषरूपं वातापिं पेचे पपाच तमिल्वल इत्यपः इल्वल इति प्रथमान्तपाठः सुगमः २५ तथानुल्हादस्य सूर्म्यायां वाष्कलो महिषइति द्वौ पुत्रौ बभूवतुः तथा धृत्यां प्रल्हादस्य भार्यायां विरोचनः प्रल्हादिः प्रल्हादस्यापत्यं बभूव तस्य विरोचनस्य पुत्रो वलिरभवत् २६ ततोवलेः शामनायां बाणो ज्येष्ठो यस्य तत्सुतानां शतमभवत्तस्य प्रल्हादस्य वलेर्वा प्रभावः सुश्लोक्यः अतीव वर्णनीयः स पश्चादेव सप्तमे एवाकथयिष्यते

भा०ष०
८०

तदेवाह वरमिति हे वामोरु हे अनिंदिते वरमभीष्टं वरय कामयस्व भर्तरि स्त्रियाभितरां प्रीते सति इह लोके च कारात्परत्र च लोके अगमो ऽप्राप्यः कामः
को वा न को ऽप्यस्तीत्यर्थः स्त्रियाः ऽप्राप्य इति वान्वयः ३२ ननु कर्मवश्ये ऽनीश्वरे भर्तरि प्रीते सति कथं सर्वत्र सर्वकामसौलभ्यं तत्राह पतिरिति नारीणां
पतिरेव हि सर्वात्मत्वदेवत्वं मतस्तस्मिन्प्रीते सर्वकामसौलभ्यमिति भावः ननु तं देवतानां परमं च दैवतं इति श्रुत्युक्तरीत्या श्रियः पतिर्हि परमं
दैवतं न भर्तेत्यत आह मानस इति यः सर्वभूतानां मानसः मनसः साक्षी वासुदेवः सर्वान्तरात्मा श्रियः पतिः ३३ स एव भगवान्नामरूपाभ्यां विकल्पि
तैर्विभिन्नैर्देवतालिंगै रुद्रादिदेवतारूपैः शरीरैरिज्यते इदं दृष्टांतार्थं तदेवाह तत्त्वायुस्तत्त्वसूर्ये त्यायुक्तरीत्या पुंभिर्यज्वभिः एवमादिशरी
रैस्तोष्यते इत्यर्थः भगवति तुष्टे सति सर्वकामाः सुलभा इति भावः ३४ यत एवं तस्माद्धे सुमध्यमे श्रेयस्कामाः पतिव्रता नार्यः अनन्यभावेनान

कश्यप उवाच वरं वरय वामोरु प्रीतस्तेहमनिंदिते स्त्रिया भर्तरि सुप्रीते कः काम इह चागमः ३२ पतिरेव हि नारीणां दैवतं परमं स्मृ
तं मानसः सर्वभूतानां वासुदेवः श्रियः पतिः ३३ स एव देवतालिंगैर्नामरूपविकल्पितैः इज्यते भगवान्पुंभिः स्त्रीभिश्च पतिरूपधृ
क् ३४ तस्मात्पतिव्रता नार्यः श्रेयस्कामाः सुमध्यमे यजंते ऽनन्यभावेन पतिमात्मानमीश्वरं ३५ सोहं त्वयार्चितो भद्रे ईदृग्भावे
न भक्तितः तं ते संपादये काममसतीनां सुदुर्लभं ३६ दितिरुवाच॥ वरदो यदि मे ब्रह्मन्पुत्रमिंद्रहणं वृणे अमर्त्यं हतपुत्राहं ये
न मे घातितौ सुतौ ३७ शुक उवाच॥ निशम्य तद्वचो विप्रो विमनाः पर्यतप्यत कश्यप उवाच अहो अधर्मः सुमहानद्य मे स
मुपस्थितः ३८ अहोऽर्थेंद्रियारामो योषिन्मय्येह मायया गृहीतचेताः कृपणः पतिष्ये नरके ध्रुवं ३९ ॥रामचंद्राय नमः॥

न्याईशेषत्वेनेश्वरात्मकं पतिमेवाराधयंति ३५ हे भद्रे यत्तोहमीदृग्भावेनानन्यभावेन भक्तितश्च त्वयार्चितः सन् तस्मात्तेन तव काममिष्टं संपादये सिद्ध
वत्करोमि कथंभूतमसतीनामपतिव्रतानां सुदुर्लभं लब्धुमशक्यं ३६ एवं कश्यपचोदिता दितिराह वरद इति हे ब्रह्मन्मम यदि त्वं वरदः व
रं दद्यास्तर्हि अमर्त्यं हतौ पुत्रौ यस्याः साहं इंद्रहणं इंद्रहंतारं पुत्रं वृणे येनेंद्रेण प्रयोजकेन मघवता प्रयोज्यकर्त्रा मे सुतौ हिरण्यकशिपुहिरण्या
क्षौ घातितौ ३७ एवं तस्या दितेः वचो निशम्य विप्रः कश्यपः विमनाः खिन्नः पर्यतप्यत परितापं चकार तमेव परितापप्रकारमाह अ
हो इति अद्य महान् धर्मो मम प्राप्तः अहो इति खेदे ३८ अहो अद्यास्माद्धर्मादहं नरके ध्रुवं नूनं पतिष्ये कथंभूतः इंद्रियारामः अ
त एव योषिद्रूपया भगवन्मायया गृहीतं चेतो यस्य सः अत एव कृपणः दीनः ३९ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ १

राम
८०

ननु सर्वोपि लोकः स्वसुखाय परस्याहितमाचरति किमनेनात्रेशेनेत्यत्राह क्रिमीति ईशाभिहितस्य ईश्वरोहमहं भोगीत्याद्युक्तरीत्या स्वेनैवेशत्वेनाभि-
हितस्येशं मममानस्य परस्य देहस्य मरणानंतरं दाहाभावे क्रिमिरिति तत्समये श्वादिभिर्भक्षितस्य विष्ठेति दग्धस्य तु भस्मेति संज्ञा आसीत् तत्कृते तत्ता-
डनादेः सुखार्थं भूतध्रुग्भूतहिंसाकारी स किं स्वार्थं पुरुषार्थं वेद न वेदेत्यर्थः कुतः यतो भूतद्रोहाद्धेतोस्तस्य नितरां निरयो नरक एवातो भूतध्रु-
क् स्वार्थं न वेदेत्यर्थः २५ इदं शरीरमेवाशासानस्यात्मानं मममानस्य उन्नद्धमुद्धं खलं चेतो यस्य तस्येंद्रस्य यो मदस्तस्य शोषकः सुतो मम येन का-
रणेन ध्रुवं नूनं भूयात् २६ हे राजन् इत्थंभावेनाभिप्रायेण सा दितिर्भर्तुः कश्यपस्य शुश्रूषादिभिरसकृत्प्रियं हितं च चचाराचरितवतीत्यर्थः तत्र
शुश्रूषा सेवा परिचर्येति यावत् अनुरागः स्नेहः प्रश्रयो विनयः दमः इंद्रियनिग्रहः २७ भावज्ञा दितिर्वल्गुभाषितैर्मधुरालापैः सस्मितैर्मंदहासैः

क्रिमिविड्भस्मसंज्ञासीद्यस्येशाभिहितस्य च भूतध्रुक्तत्कृते स्वार्थं किं वेद निरयो यतः २५ आशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः मदशो-
षक इंद्रस्य भूयाद्येन सुतो हि मे २६ श्रीशुक उवाच॥ इत्थंभावेन सा भर्तुराचचारासकृत्प्रियं शुश्रूषयानुरागेण प्रश्रयेण दमेन च २७ भक्त्या पर-
मया राजन्मनोज्ञैर्वल्गुभाषितैः मनो जग्राह भावज्ञा सस्मितापांगवीक्षणैः २८ एवं स्त्रिया जडीभूतो विद्वानपि विदग्धया बाढमित्याह वि-
वशो न तच्चित्रं हि योषिति २९ विलोक्यैकांतभूतानि भूतान्यादौ प्रजापतिः स्त्रियं चक्रे स्वदेहार्धं यया पुंसां मतिर्हृता ३० एवं शुश्रूषितस्तात
भगवान्कश्यपस्त्रिया प्रहस्य परमप्रीतो दितिमाहाभिनंद्य च ३१ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥

सहितैरपांगवीक्षणैः कश्यपस्य मनो जग्राह स्ववशीकृतवती बभूव २८ कथं जितेंद्रियस्य तस्य विदुषः स्त्रीवश्यतेत्यत्राह एवमिति विद्वानपि वि-
दग्धया पुरुषवञ्चननैपुण्ययुक्तया स्त्रिया दित्या जडीभूतः मोहं प्रापितोत एव विवशः परवशः बाढमित्यासंभोगार्थमंगीकृतवानित्यर्थः यो-
षिति स्वयं कामयमानायां स्त्रियां पुरुषस्य तद्बाढमितिवाचो न चित्रं हीति लोकचरित्रप्रदर्शनं २९ प्रजापतिः कश्यपः आदौ प्रथमं भूतानि स्त्री-
पुरुषरूपाण्येकांतान्येकदेशाद्वाविभागेन लक्षणानि विलोक्य परस्परमेकशरीरवन्मिलितानीत्यालोच्येत्यर्थः स्वयमपि स्त्रियं स्वदे-
हस्यार्धांशं चक्रे मिथुनीभूतो बभूवेत्यर्थः एवंकरणे हेतुं वदन् सामान्यतः स्त्रियं विशिनष्टि यया स्त्रिया पुंसां मतिर्हृता भवतीति लोकरीत्यु-
क्तिः ३० भगवान्कश्यपः स्त्रिया दित्या एवं संभोगेन शुश्रूषितः परिचरितः अत एव नितरां प्रीतः अभिनंद्य तस्याः संभोगकौशलमभिनंद्य प्रहस्य
इतीदं वक्ष्यमाणमाह ३१

भा०ष०
८१

अप्सुजलेषुप्रविश्यनस्नायात्कस्मैचिदपिनकुप्येत्दुर्जनैर्नसंभाषेत अधौतम्मलालिप्तंवासःवस्त्रंनावसीतनाछादयेन्नविन्यस्याञ्चपूर्वविधृतांस्रक्तां
स्रजंचनपुनर्द्धारयेत् ४८ भोजनेपंचनिषिद्धाआह उच्छिष्टंचंडिकान्नंभद्रकाल्यैनिवेदितंसामिषंपिपीलिकादिदूषितंवृषलाहृतंशूद्रानी
तं३ तंउदक्ययारजस्वलयादृष्टंचान्नंनभुंजीतांजलिना[illegible]पःजलेननापिबेत् ४९ उच्छिष्टश्चेदस्पृष्टसलिलानभवेत्किंतुजलं[illegible]स्पृशेत् संध्ययोःसा
यंप्रातःमुक्ताःमूर्द्धजाःकेशायस्याःतादृशीतथाऽनर्चिताऽनलंकृताचनभवेन्नसंयतावाग्ययासानभवेदसंवीताऽप्रावृतावहिर्नचरेत् ५० अधौ
तौपादौययासाऽप्रयताऽसमाहितचित्तानशयीततथाआर्द्रौपादौयस्याःउदक्उत्तरदिशिशिरोयस्याः[illegible]साऽपराक्पश्चिमशिरा।

नाप्सुस्नायान्नकुप्येतनसंभाषेतदुर्जनैः नावसीताधौतवासःस्रजंचविधृतांक्वचित् ४८ नोच्छिष्टंचंडिकान्नंचसामिषंवृषलाहृतं भुं
जीतोदक्ययादृष्टंपिबेदंजलिनात्वपः ४९ नोच्छिष्टास्पृष्टसलिलासंध्यायांमुक्तमूर्द्धजा अनर्चितासंयतवागासंवीतावहिश्चरेत् ५०
नाधौतपादाप्रयतानार्द्रपान्नोदक्शिराः शयीतनापराग्नान्यैर्ननग्नानचसंध्ययोः ५१ धौतवासाःशुचिर्नित्यंसर्वमंगलसंयुता पूज
येत्प्रातराशात्प्राग्गोविप्रान्श्रियमच्युतं ५२ स्त्रियोवीरवतीश्चार्चेत्स्रग्गंधबलिमंडनैः पतिंचार्च्योपतिष्ठेतध्यायेत्कोष्ठगतंचतं ५३ सांव
त्सरंपुंसवनंव्रतमेतदविप्लुतं धारयिष्यसिचेत्तुभ्यंशक्रहाभवितासुतः ५४ शुकउवाच॥ बाढमित्यभिप्रेत्याथदितीराजन्महामनाः काश्य
पंगर्भमाधत्तव्रतंचांजोदधारसा ५५ मातृष्वसुरभिप्रायमिंद्रआज्ञायमानदः शुश्रूषणेनाश्रमस्थांदितिंपर्यचरत्कविः ५६ ॥ ॥

50

अन्नतथाऽन्यैःसहनग्नाविवसनाचतथासंध्ययोरपिनशयीत ५१ धौतंवासोयस्याःसासदाशुचिःसर्वैर्मंगलैर्हरिद्राचंदनादिभिर्द्रव्यैःसंयुक्ताप्रा
तर्भोजनात्प्रागेवगाःविप्रान्आद्यंमहालक्ष्मीमच्युतंचपूजयेत् ५२ तथावीरवतीःपुत्रवतीर्जीवद्भर्तृकाःनारीःस्रग्गादिभिःसर्वैःबलिरु
पायनंमंडनमलंकारः तथापतिंचार्च्यसंपूज्यउपसमीपेतिष्ठेत्ततंस्वपतिमेवकोष्ठगतंस्वोदरगतंध्यायेत् ५३ एतदंगकलापेनयुक्तंपुंसवना
ख्यंइदंसांवत्सरंसंवत्सरपर्यंतमविप्लुतमविकलंयथातथाधारयिष्यसिचेत्तर्हिइंद्रस्यहंतापुत्रस्तवभविष्यति ५४ इत्येवमुक्तादितिर्हेरा
जन्बाढमित्यंगीकृत्याथमहामनाःउरुव्रतासक्तमनाःसतीकश्यपाद्गर्भमाधत्तदधारतथांजःसम्यग्व्रतंचदधार ५५ ततइंद्रःकविर्विद्वा
न्ततएवमातृष्वसुरभिप्रायंज्ञात्वाहेमानदआश्रमस्थांव्रतस्थांकश्यपस्याश्रमस्थांवादितिंशुश्रूषणेनपर्यचरत् ५६ ॥श्रीराम॥

राम
८१

स्वभावंस्त्रीस्वभावमनुवर्त्तमानायाःयोषितःकोतिक्रमःनकश्चिद्दोषःअपितुममैवस्वार्थेमज्ञानंतंधिगहमेवस्वार्थमप्यजानन्नित्यर्थःकुतःयद्य
स्मादहंतु जितानींद्रियाणियेनतादृशः ४० स्त्रीणांस्वभावंवकान्नायपरितप्यते शरदिति अहोस्त्रीणांवक्त्रंमुखंशरच्चंद्रतुल्यंतथावचश्चश्रवणयोः
कर्णयोरमृततुल्यं हृदयंतुक्षुरस्यधारयाभोपमायस्यतादृशमतस्तासांचेष्टितंकोवेदनकोपीत्यर्थः ४१ नहिस्त्रीणामंजसासम्यक्कश्चिदपिपुमान्प्रि
योस्ति तत्रहेतुः स्वाशिषात्मनांस्वाशिषिस्वार्थेदित एवार्थआत्माचित्तंयासांतासांस्वाशिषात्मनामित्यर्थःइतिभावः अतएवार्थेस्वार्थेदितनार्थंनिमित्तंपति
पुत्रंभ्रातरंवाघ्नंतिमारयंति ४२ इदंमहत्संकटंइत्याह इदामीतियत्प्रतिश्रुतंप्रतिज्ञातंतन्ममवचःनमृषाभवेन्मिथ्याभवितुंनार्हतिवचसोऽनृतभयेन
दास्यामिचेदिंद्रोहन्येत इंद्रोपिवधंप्रतिनार्हतिअतस्तदिदंमहत्संकटंइतिभावः तत्रैतस्मिन्संकटेइदंमयावक्ष्यमाणंतत्संकटनिवृत्त्यैउपकल्पतेयोग्यंभ पे६

कोतिक्रमोनुवर्त्तन्त्याःस्वभावमिहयोषितः धिग्मांवताबुधंस्वार्थेयदहंत्वजितेंद्रियः ४० शरत्पद्मोत्सवंवक्त्रंवचश्चश्रवणामृतं हृदयंक्षु
रधाराभंस्त्रीणांकोवेदचेष्टितं ४१ नहिकश्चित्प्रियःस्त्रीणामंजसास्वाशिषात्मनां पतिंपुत्रंभ्रातरंवाघ्नन्त्यर्थेघातयंतिच ४२ प्रतिश्रुतंद
दामीतिवचस्तन्नमृषाभवेत् वधंनार्हतिचेंद्रोपितत्रेदमुपकल्पते ४३ शुकउवाच॥इतिसंचिंत्यभगवान्मारीचःकुरुनंदन उवाचकिं
चित्कुपितोह्यात्मानंचविगर्हयन् ४४ कश्यपउवाच॥पुत्रस्तेभवितामद्रेइंद्रहादेववांधवः संवत्सरंव्रतमिदंयद्यंजोधारयिष्यसि
४५॥दितिरुवाच॥धारयिष्येव्रतंब्रह्मन्ब्रूहिकार्याणियानिमे यानिचेहनिषिद्धानिनव्रतंघ्नंतियान्युत ४६ कश्यपउवाच॥नहिंस्या
द्भूतजातानिनशपेन्नानृतंवदेत् नच्छिंद्यान्नखरोमाणिनस्पृशेद्यदमंगलं ४७ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥

वति ४३ हेकुरुनंदनभगवान्मारीचःकश्यपःइतीत्थंसंचिंत्यालोच्यकिंचित्कुपितःमनसैवात्मानंगर्हयन्नुवाच ४४ हेभद्रेइदंमयोच्यमानं
व्रतमंजःसम्यक्संवत्सरपर्यंतंयदित्वंकरिष्यसितर्हींद्रस्यहंतापुत्रस्तवभविष्यतिनोचेद्देवानांबांधवोभविष्यतीति ४५ तद्वचःश्रु
त्वाहदितिःहेब्रह्मन्व्रतमहंधारयिष्येमेमयाकर्त्तव्यानिप्रवृत्तिनिवृत्तिरूपाणियानिचकर्माणिव्रतंनघ्नंतिव्रतघ्नानिवृत्तिरूपाणि
चकार्याणिमेब्रूहि ४६ एवमुक्तस्तावद्भूतानिभूतान्निवृत्तिरूपान्नियमानाहकश्यपः नेतिभूतजातानिप्राणिसमूहान्नहिंस्यान्न
हन्यात्तथाकंचननशपेन्नाक्रोशेत् तथाऽनृतमसत्यंचनवदेत्यदमंगलंकेशकपालास्थितुषभस्मादितन्नस्पृशेत्॥ ४७॥ ॥

भा०अ०
८२

ततो दितेर्गर्भो कुलिशेन वज्रेण बहुधा छिन्नोपि श्रीनिवासस्य भगवतोऽनुकंपयाऽनुकंपापूर्वकानुग्रहविशेषेण न ममार न मृतः यथा भवान्परीक्षिद्द्रौण्यस्त्रेण दग्धदेहोपि भगवतारक्षितस्तद्वत् ६५ अस्मिन्नर्थे उपपत्तिमाह सकृदिति पुमान्स कृदप्यादिपुरुषं भगवंतमिष्ट्वा तन्माहात्म्येन शनैः साम्यतां समानरूपतां याति किं पुनरसकृदिष्टेतिभावः यत एवमतः किंचिदूनं संवत्सरमेव दित्या हरिराधितः ६६ इंद्रेण सहजुषन्ते सेवन्त इति सजूः इंद्रेण सह वर्तमान इत्यर्थः हरिर्भगवानुपेंद्रोऽन्यथा दागत्य गर्भस्य खंडानजीवयदित्यर्थः ततः ते पंचाशदेकोनपंचाशदन्यथा मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः चकर्तसप्तधा गर्भं पुनरेकैकं सप्तधाचकर्तेति पूर्वोक्तिसंख्याविरोधापत्तेः मरुतो मरुत्संज्ञकाः मातृदोषमसुरत्वापदेशात्मकादेवाभवंस्तेच हरिणा इंद्रेण भगवता वा सोमपा विवे

न ममार दितेर्गर्भः श्रीनिवासानुकंपया बहुधा कुलिशच्छिन्नो द्रोण्यस्त्रेण यथा भवान् ६५ सकृदिष्ट्वादिपुरुषं पुरुषो याति साम्यतां संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः ६६ सजूरिंद्रेण पंचाशद्देवास्ते मरुतोऽभवन् व्यपोह्य मातृदोषं ते हरिणा सोमपाः कृताः ६७ दितिरुत्थाय ददृशे कुमाराननलप्रभान् इंद्रेण सहितान्देवी पर्यतुष्यदनिंदिता ६८ अथेंद्रमाह ताताहमादित्यानां भयावहं अपत्यमिच्छन्त्यचरं व्रतमेतत्सुदुष्करं ६९ एकः संकल्पितः पुत्रः सप्त सप्ताभवन्कथं यदि ते विदितं पुत्र सत्यं कथय मा मृषा ७० इंद्र उवाच अंब तेऽहं व्यवसितमुपधार्यागतोंतिकं लब्धांतरोऽच्छिदं गर्भमर्थबुद्धिर्न धर्मवित् ७१ कृत्तो मे सप्तधा गर्भ आसन्सप्त कुमारकाः तेपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ७२ ॥ ॥ ॥श्रीरामचंद्राय॥

तीति तथा यज्ञियधाराहाः कृता इत्यर्थः ६७ ततो दितिरुत्थाय कुमाराननिलप्रकारानिंद्रेण सहितान्ददर्श दृष्ट्वा च देवी दितिरनिंदिता वस्तुतः सुस्वभावा पर्यतुष्यत् ६८ अथानंतरमिंद्रमुवाच तदेवाह हे तात अहमादित्यानामदितेरपत्यानां युष्माकं भयापादकमेकमपत्यमहमिच्छन्ती सुदुष्करमेतत्पुंसवनं व्रतमचरमाचरितवत्यस्मि ६९ मया त्वेकः पुत्रः संकल्पितः कथं सप्तसप्तैकोनपंचाशदभवन् हे पुत्र एतद्यदि तव विदितं तर्हि सत्यं कथय मृषा मिथ्या मा कथय ७० एवमुक्तः शक्रस्तामाह हे अंब तव व्यवसितमभिप्रेतमुपधार्य ज्ञात्वाऽहं तवांतिकं समीपं गतः प्राप्तः लब्धमंतरं व्रतच्छिद्रं येन ताहशो हं गर्भमच्छिदं छिन्नवानस्मि यतोहमर्थे विषयिके पुरुषार्थ एव बुद्धिर्यस्य न धर्मवित ७१ यतो हमीदृशस्ततो मया तावत्सप्तधा गर्भः कृत्तश्छिन्नः कृत इति पाठे वज्रेणेति शेषः एवं सप्तधा कृत्तोपि गर्भः तावत्सप्तकुमाराः

दितिपुत्रोत्पत्तिवर्णनम्
राम
८२

तदेवाह नित्यमहरहः सुमनसः पुष्पाणि फलानि च समिधः कुशाः पत्राणि किसलयानि च दूर्वाङ्कुराश्च मृदः मृत्स्नाश्च आपश्च ताः काले काले उचितकाले उपाहरत् आनीय समर्पितवान् ५७ एवं तस्या दितेर्व्रतस्थायाः सत्यां हे नृप हरिरिन्द्रः व्रतस्य छिद्रं वैकल्यं प्रेप्सुः कामयमानः अत एव जिह्मः कुटिलचित्तः पर्यचरत् यथा मृगहा व्याधो मृगाकृतिर्मृगरूपः सन् मृगानुवर्तते तथा ५८ हे महीपते तत्परः व्रतच्छिद्रपर्यालोचन परोऽपि व्रतछिद्रं नाध्यगच्छत् नापश्यत् अथ नितरां चिन्तां प्राप्तः केन हेतुना मम शिवं भद्रं स्यादिति तीव्रां चिन्तां प्राप्तः ५९ एकदा सा दितिः व्रतकर्शिता अत एवाचान्ता अनस्पृष्टवारि जलं यया सा अधौतावप्रक्षालितावङ्घ्री यया सा उच्छिष्टा सती सन्ध्यायां सायंकाले विधिना दैवेन मोहिता सती सुष्वाप ६० तदा तदन्तरं व्रतछिद्रं लब्ध्वा शक्रो निद्रयापहृतं चेतो यस्यास्तस्या दितेरुदरं प्रविष्टः कथं परकायप्रवेशसामर्थ्यं

नित्यं वनात्सुमनसः फलमूलसमित्कुशान् पत्राङ्कुरमृदोऽपश्च काले काल उपाहरत् ५७ एवं तस्या व्रतस्थाया व्रतछिद्रं हरिर्नृप प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ५८ नाध्यगच्छद्व्रतछिद्रं तत्परोऽथ महीपते चिन्तां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह ५९ एकदा सा तु संध्यायामुच्छिष्टा व्रतकर्शिता अस्पृष्टवार्यधौताङ्घ्रिः सुष्वाप विधिमोहिता ६० लब्ध्वा तदन्तरं शक्रो निद्रापहृतचेतसः दितेः प्रविष्ट उदरं योगेशो योगमायया ६१ चकर्त सप्तधा गर्भं वज्रेण कनकप्रभं रुदन्तं सप्तधैकैकं मा रोदीरिति तान्पुनः ६२ ते तमूचुः पीड्यमानाः सर्वे प्राञ्जलयो नृप नो जिघांससि किमिन्द्र भ्रातरो मरुतस्तव ६३ मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः अनन्यभावान्पार्षदानात्मनो मरुतां गणान् ६४ ॥श्रीगुरुभ्यो नमः॥

तत्र तत्राह योगेशः परकायप्रवेशसामर्थ्यापादकयोगयुक्तः अत एव योगमायया विचित्रयोगसामर्थ्येनोदरं प्रविष्ट इत्यर्थः ६१ उदरं प्रविष्टः शक्रो वज्रायुधेन तं कनकप्रभं गर्भं सप्तधा चिच्छेद रुदन्तमेकैकं गर्भस्य भागं मा रोदीरिति वदन् तान्पुनः सप्तधा एकैकं चिच्छेद यतो मा रोदीरिति तान् चिच्छेद अत एव निमित्तान्मरुच्छब्दस्तेषु प्रवृत्तिः आर्षत्वान्मा रोदीरित्यस्य रुदः रुदभावेऽपि मान विद्यते इन्द्रवाक्यादुत्तरोऽस्त्येव बाते मरुतः ६२ हे नृप ते भिद्यमानाः सर्वे गर्भस्य भागाः तथैव प्रविभक्ताः पादाद्यवयवाः प्राञ्जलयः सन्तः तमिन्द्रमूचुः तदेवाह किमिति हे इन्द्र तव भ्रातरो मरुतः मरुत्संज्ञा नो ऽस्मान् किं किमर्थं जिघांससि हन्तुमिच्छसि ६३ इत्येवं उक्तः कौशिकः शक्रोऽपि यूयं मह्यं मम भ्रातरः तर्हि मा भैष्ट भयं मा कुरुतेत्याह तत्र आत्मनः स्वस्य पार्षदान् पार्षदत्वं प्राप्तान् अनन्यभावान् अन्यत्र भावो येषां ते तान् मरुतां गणानाह इति

७४

भा०ष०
८३

किंभूय इति प्रश्नार्थं चोदितः पृच्छति राजा व्रतमिति हे ब्रह्मन् भवता यदुदीरितं पुंसवनाख्यं व्रतं तस्य प्रपंचमिति शेषः ज्ञातुमिच्छामि येन व्र
तेन तच्छ्रवणेन वा भगवान्प्रसीदति १ एवमापृष्टः सप्रपंचं व्रतमाह मुनिः शुक्ल इत्यादिना मार्गशिरे मासि शुक्ले पक्षे कस्मिंश्चिच्छुभतिथौ भर्तु
रनुज्ञया योषिदिदं वक्ष्यमाणं सार्वकामिकमभिलषितसर्वपुरुषार्थसाधनं पुंसवनाख्यं व्रतमारभेत २ तत्रादितः प्रथमं मरुतां जन्म श्रु
त्वा ब्राह्मणाननुमंत्र्य अनुज्ञाप्य तैरनुज्ञात इत्यर्थः स्नात्वा च शुक्ला धौता दंता यस्याः साऽहते नूतने शुक्ले चांबरे वसित्वा ३ प्रातराशात्प्रागेव भ
गवंतं श्रिया लक्ष्म्या सह पूजयेत् ३ तावन्नमस्कारमंत्रानाह अलं ते इति ते तुभ्यमलं पर्याप्ता समेव न किंचिदन्यैः कृत्यमस्ति तत्र हेतुः हे पूर्णकामावाप्त
समस्तकाम अत एव निरपेक्षाय ते तुभ्यं नमः पूर्णकामत्वमेव विशदयंस्तं विशिंष्टि महाविभूतयो निखिललीलाविभूतयोरधिपतये अत एव सक
लाः सिद्धयो निखिलषितफलानि यस्मात्तस्मै ४ हे ईश यथा त्वं कृपादिभिः सर्वैर्गुणैः जुष्टः युक्तस्ततस्त्वं भगवान्प्रभुरसि तत्र कृपा स्वार्थापेक्षापर

राजोवाच॥ व्रतं पुंसवनं ब्रह्मन्भवता यदुदीरितं तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति १ श्रीशुक उवाच॥ शुक्ले मार्गशिरे पक्षे योषि
द्भर्तुरनुज्ञया आरभेत व्रतमिदं सार्वकामिकमादितः २ निशम्य मरुतां जन्म ब्राह्मणाननुमंत्र्य च स्नात्वा शुक्लदती शुक्ले वसीतालंकृतां
बरे पूजयेत्प्रातराशात्प्राक् भगवंतं श्रिया सह ३ अलं ते निरपेक्षाय पूर्णकाम नमोऽस्तु ते महाविभूतिपतये नमः सकलसिद्धये ४
यथा त्वं कृपया भूत्या तेजसा महिमौजसा जुष्ट ईश गुणैः सर्वैस्ततोऽसि भगवान्प्रभुः ५ विष्णुपत्नि महामाये महापुरुषलक्षणे प्रीयेथा
मे महाभागे लोकमातर्नमोऽस्तु ते ६ ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्बलिमुप
हराम्यनेनाहरहर्मंत्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासउपवीतविभूषणगंधपुष्पधूपदीपोपचारांश्च समाहित उपाहरे

दुःखनिराचिकीर्षा भूतिरैश्वर्यं तेजः पराभिभवसामर्थ्यं महिमा लोकोत्तरप्रभावः ओजो बलं सर्वैरिति स्वेनैतान्येव सर्वज्ञत्वसर्वशक्तित्वादयो गुणा अभि
प्रेताः ५ हे विष्णुपत्नि हे महामाये महदाश्चर्यशक्तियुक्ते लक्ष्यतेऽनयेति लक्षणं महापुरुषस्य चिह्नभूते इत्यर्थः तन्मम महापुरुषस्य प्रियेथा
मे सर्वलोकसंपदाश्रयभूते हे लोकानां मातः ते तुभ्यं नमः ६ पूजामंत्रमाह ॐ नम इति भगवते पूर्णषाड्गुण्याय निरस्तनिखिलदोषाय महापुरुषा
य पुरुषसूक्तप्रतिपाद्यमहात्म्ययुक्ताय महानुभावाय लोकविलक्षणप्रभावाय महाविभूतेः लक्ष्म्याः पतये विभूतिभिः सह सपार्षदाय तुभ्यं
तुभ्यं बलिमर्घ्यादिकमुपहरामि समर्पयामीत्यनेन मंत्रेणाहरहर्विष्णोरावाहनाद्युपचारानुपहारानुपाहरेत् तत्रोपस्पर्शनमाचमनं उ

राम
८३

ततोनंतरंइदंमहाश्चर्यंविलोक्यमयानिश्चितं अध्यवसितंएवाहमहापुरुषस्यभगवतःपूजायाःकार्यंपूजकाभिलषितंप्रयोजनंतदानुषंगि
कमप्रधानंफलंयस्याःसासिद्धिर्मुक्तिर्भवतीति असमाप्तायामपिमहापुरुषपूजायांपूजकाभिलषितप्रयोजनावहात्वमधुनावलोक्यमुक्तत्यर्थ
त्वेनापिकृतायास्तत्पूजायाःपरिपूर्णायाःमुक्तिरेवप्रधानंफलं पूजकाभिलषितंतुआनुषंगिकमितिमयानिश्चितमित्यर्थः यद्वामहापुरुषस्यपू
जायाःसिद्धिःपरिसमाप्तिरेवकार्यानुषंगिकीकार्येणप्रयोजनेनानुषज्यतेऽनुवध्यतेपूजकाभिलषितप्रयोजनावहाभवतीतिनत्वपरिपूर्णासानुवि
ने५ परीतफलदैवेतिमयानिश्चितमित्यर्थः १३ अतएवयेपुरुषाःनिराशिषोनिष्कामाःभगवतआराधनंकुर्वाणाःपरंमोक्षमपिनेछंति तएवस्वार्थेस्वस्य
निरतिशयपुरुषार्थेकुशलाःस्वस्यनिरतिशयपुरुषार्थप्रसाधनकुशलाःस्मृताः १४ एवमनभिसंहितफलंभगवदाराधनंप्रस्तुत्याभिसंहित।
फलंनिंदति आराध्येति आत्मप्रदंनिरतिशयपुरुषार्थरूपमात्मानंप्रददातीतितथातमात्मानंनिरतिशयप्रियमीश्वरंदेवंभगवंतंतमाराध्य

ततस्तत्परमाश्चर्यंवीक्ष्याध्यवसितंमया महापुरुषपूजायाःसिद्धिःकार्यानुषंगिकी १३ आराधनंभगवतईहमानानिराशिषः येतुने
छंत्यपिपरंतेस्वार्थकुशलाःस्मृताः १४ आराधनंआत्मप्रदंदेवस्वात्मानंजगदीश्वरं कोवृणीतेगुणस्पर्शंवुधःस्यान्नरकेपियत् १५ तदिदंममदौ
र्जन्यंवालिशस्यमहीयसि क्षंतुमर्हसिमातस्त्वंदिष्ट्यागर्भोमृतोत्थितः १६ शुकउवाच॥इंद्रस्तयाभ्यनुज्ञातःशुद्धभावेनतुष्टया मरुद्भिःसहतांन
त्वाजगामत्रिदिवंप्रभुः १७ एवंतेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि मंगलंमरुतांजन्मकिंभूयःकथयामिते १८ इतिश्रीषष्ठ०अष्टादशोध्याय १८

वुधोविवेकीचेत्कःपुमान्गुणस्पर्शंशब्दादिविषयानुभवंवृणीतेकामयेतगुणस्पर्शोविद्वान्नेषस्यादिति यद्गुणस्पर्शोनरकेपिस्यात्संभवेत्
१५ स्वापराधक्षमाप्रार्थनांप्रार्थयते तदितिहेमहीयसिपूज्येवालिशस्यमूर्खस्यममतदिदंगर्भछेदनादिरूपंदौर्जन्यंदुर्जनस्यकर्महेमातःत्वंक्षंतु
मर्हसिमातुरसह्योपराधोनास्तीत्यभिप्रायेणमातरितिसंवोधनं दिष्ट्यादैवान्मृतोपितवगर्भःपुनरुत्थितोजीवितः १६ एवमुक्तयाविशु
द्धभावेननिष्कपटभावेनतुष्टयादित्याभ्यनुज्ञातस्तांनत्वामरुद्भिःसहप्रभुरिंद्रस्त्रिदिवंस्वर्गंजिगाम १७ एवंपरस्परंकथनंआसुरंभावंइत्या
दिनातस्योत्तरमुक्तंइत्याह एवमितियन्मरुतांजन्मत्वंमांपरिपृच्छसिपर्यपृच्छः तच्च एवंनोमंगलावहंसर्वंसप्रपंचंयथातथाख्यातंमया
कथितंभूयःकिंकथयामियत्किंचित्पृष्टंशिष्टमस्तितर्हितत्कथयामीतिप्रश्नोत्साहनं १८ इतिश्रीभागवतेषष्ठस्कं०अष्टादशोध्यायः
॥२५॥

श्रियालक्ष्म्यासह सहितं श्रीनिवासं वरप्रदं इत्यमभिष्टूय तत्तत्र आवाहितं भगवत्सकाशात् उपहरणमवशिष्टं पूजाद्रव्यं निःसार्यापनीयभ
गवते आचमनीयं दत्वा सम्यक् पुनरर्चयेत् २४ ततः पुनः स्तोत्रेणस्तुवानाः स्तोत्रं कुर्वाणाः भक्तिकृतप्रह्वीभावेन चेतसा यज्ञोच्छिष्टं माघ्रायपुन
रपिहरिमर्चयेत् २५ महापुरुषचेतसेश्वरबुद्ध्या परया भक्त्या तैस्तैः प्रियैर्वस्तुभिश्च पतिमुपनमेद्भजेत् पतिरपिभार्यायां स्वयं प्रेमशीलः स
त्याः कर्माणि विभयात्पोषयेदुक्तधर्मानुकूलो भवेदित्यर्थः एवमनोन्यानुरूप्ये कारणमाह कृतमिति दंपत्योरन्यतरेणापि कृतं कर्मोभयो
रपिफलदं भवतियतस्ततोन्योन्यानुकूल्येन भाव्यमितिभावः २७ अनएवपत्नी मनर्हायामशक्तायां सत्यां पतिरेवैतद्व्रतं समाहितचित्तः स
न्कुर्यात्पत्न्या शक्तावेकर्तुं भर्त्राकुर्यादित्यर्थः विष्णोरिदं व्रतं विभ्रे [illegible] त्केनापि हेतुना न विहन्यादंततस्तं न कुर्यात् २८ विप्रान्वीरवतीःपु

इत्यभिष्टूय वरदं श्रीनिवासं श्रियासह तन्निःसार्योपहरणं दत्वाचमनमर्चयेत् २४ ततः स्तुवानास्तोत्रेणभक्तिप्रह्वेन चेतसा यज्ञोच्छि
ष्टमवघ्रायपुनरभ्यर्चयेद्धरिं २५ पतिंच परयाभक्त्या महापुरुषचेतसा प्रियैस्तैस्तैरुपनमेत्प्रेमशीलः स्वयंपतिः २६ बिभृयात्सर्वक
र्माणि पत्न्या उच्चावचानिच कृतमेकतरेणापिदंपत्योरुभयोरपि २७ पत्न्यांकुर्यादनर्हायां पतिरेतत्समाहितः विष्णोर्व्रतमिदं बिभ्रन्न
विहन्यात्कथंचन २८ विप्रान्स्त्रियोवीरवतीः स्रग्गंधबलिमंडनैः अर्चयेदहरहर्भक्त्या देवंनियममास्थितः २९ उद्वास्य देवंस्वेधाम्नि
तन्निवेदितमग्रतः अद्यादात्मविशुद्ध्यर्थं सर्वकामर्द्धयेतथा ३० एतेनपूजाविधिनामासान्द्वादशहायनं नीत्वाथोपरमेत्साध्वी
कार्तिकेचरमेहनि ३१ श्वोभूतेप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् पयःशृतेनजुहुयाच्चरुणासहसर्पिषा ३२ पाकयज्ञविधाने

नवतीजीवद्भर्तृकाः स्त्रियःस्रगादिभिरहरहरेवं व्रतमास्थितः पुमानभ्यर्चयेत् २९ ततोदेवं भगवंतं स्वेधाम्नि स्वस्थाने हृदादाविसर्थः उद्वास्या
ग्रतः तस्मै भगवते निवेदितं हविरात्मविशुद्ध्यर्थं सर्वकामप्राप्त्यर्थं चाद्यादश्नीयात् ३० अनेनोक्तेनपूजाविधानेन द्वादशमासान् हायनं संवत्
सरं नीत्वा कार्तिकेमासिचरमेहन्युपचरेद्व्रतोद्यापनांगमुपचारं कुर्यात् द्वादशमासानित्युक्ते कदाचित्तन्मध्ये मलमासे सतितेन सहद्वादश
संख्यायां सत्यां मुख्यस्यैकस्य त्यागः स्यात् हायनमित्युक्ते तन्मध्यपातिनः तस्यापि प्रसंगः स्यादुभयं वारयितुं द्वादशमासान्हायनमित्यु [illegible] भयोग्रह
णं ३१ उपचारमेवाह श्वइति श्वोभूते प्रातरुपउपस्पृश्य स्नात्वा पूर्ववद्भगवंतमभ्यर्च्य पयःशृतेन पयसिसिद्धेन चरुणाशृतंपाक
इति निपातितः शरदः सहसर्पिः सहितेन पाकयज्ञविधिना द्वादशैवाहुतीः पतिर्जुहुयात् ३२ ततो द्वादशब्राह्मणान्साध्व्यः समीचीः
नान्नैर्भक्त्याभोजयेदात्मविद्ब्राह्मणान्परमान्नरूपेनान्नपचनार्थः तेभ्योब्राह्मणेभ्यः पूर्णोदकपात्रैः सहितान्गंधान्वितान् तज आस्वद
येत ३३

मे

तत्रमंत्रमाह ॐनमइति यदिसर्वसंपदःइच्छेत्कामयेत्तर्हिदेवंश्रियंलक्ष्मीविष्णुंचाशिषांप्रभवंत्वाम्यांइतिप्रभवौउभौभक्त्यासम्यक्पूजयेत् ८ भक्त्याप्र णौतौनुक्रमेणशिर
सेतिशेषः चेतसाचदंडवद्भूमौप्रणमेत ततोमंत्रमोंनमोभगवतेमहानुभावायमहाविभूतिपतयइतिदशवारंजपेत् ततोवक्ष्यमाणंस्तोत्रमुदीरयेत्पठेत् ९ तदेवाह
युवांविश्वस्यविभुश्चविभ्वीचविभुपुमान्स्त्रियेत्येकशेषः जगतःपरंकारणंस्वयंकारणेतररहितकारणभूतावित्यर्थः इयंलक्ष्मीःप्रकृतिःस्त्रीनाम्नीलक्ष्मीर्भिन्नेये
त्युक्तप्रकारेणप्रकृत्यादिस्त्रीनामकपदार्थविभूतिमत्वात्प्रकृतिरित्युच्यते प्रकृतिपुरुषादिपदार्थानांस्त्रीपुमात्मकानांतयोर्विभूतित्ववर्णनात्मकमिदंस्तोत्रं।
विभूतिभूतांप्रकृतिंविशिनष्टि सूक्ष्माकारणावस्थायांनिरतिशयसूक्ष्मादुरवबोधस्वरूपायावामायाऽप्राकृतपरशक्तिःकार्योपयुक्ताभगवदपृथक्सिद्धविशेष
णभूतादुरत्ययाभगवत्प्रपन्नेतरनतिलंघ्या कथंभगवद्विभूतिभूतायाःप्रकृतेर्लक्ष्मीविभूतित्वमितिनशंकनीयं कृत्स्नस्यकार्यकारणात्मकस्यजगतउभयो
रपिशेषत्वात् १० तस्याःप्रकृतेरधीश्वरस्त्वमेवहेपुरुषोत्तमत्वमेवसर्वयज्ञःइज्याचियंलक्ष्मीः तत्रयज्ञःप्रधानयागःइज्यात्वंगभूतादीक्षणीयेष्ट्यादिकातया।

ॐनमोभगवतेमहापुरुषायमहाविभूतिपतयेस्वाहेति श्रियंविष्णुंचवरदावाशिषांप्रभवावुभौ भक्त्यासंपूजयेन्नित्यंयदीच्छेत्सर्वसंपदः ८ प्रणमेद्दंड।
वद्भूमौभक्तिप्रह्वेनचेतसा दशवारंजपेन्मंत्रंततःस्तोत्रमुदीरयेत् ९ युवांतुविश्वस्यविभूजगतःकारणंपरं इयंहिप्रकृतिःसूक्ष्मामायाशक्तिर्दुरत्यया।
१० तस्याअधीश्वरःसाक्षात्त्वमेवपुरुषःपरः त्वंसर्वयज्ञइज्येयंक्रियेयंफलभुग्भवान् ११ गुणव्यक्तिरियंदेवीव्यंजकोगुणभुग्भवान् त्वंहिसर्वशरीर्यात्मा
श्रीःशरीरेंद्रियाशया नामरूपेभगवतीप्रत्ययस्त्वमपाश्रयः १२ यथायुवांत्रिलोकस्यवरदौपरमेष्ठिनौ तथामउत्तमश्लोकसंतुसत्यामहाशिषः १३

स्मार्तक्रियाचइयंलक्ष्मीरिव फलदातृत्वेन तदाराध्यत्वेनचतद्विभूतित्वमुक्तं तदेवाहफलभुगिति त्वंइयंलक्ष्मी
श्चयज्ञियंयत्फलंचरुपुरोडाशादिकंतद्भुंक्तेइतितथा यद्वाक्रियेयंलक्ष्मीःफलभुक्क्रियाफलभोक्तातुत्वमित्यन्वयः क्रियालक्ष्म्याविभूतिः
कर्तातुत्वद्विभूतिरित्यर्थः ११ तथागुणव्यक्तिरियंदेवीलक्ष्मीःयासर्ववस्तुगतागुणाभिव्यक्तिःसालक्ष्मीत्वद्विभूतिरित्यर्थः भोज्य भोगो
पकरणादिगुणानांसर्ववस्तुगतानामभिव्यंजकस्तुभगवान्तद्विभूतिमहेत्यर्थः तथा गुणभुग्भवानुक्तिस्त्वियंदेवीत्यपिवो।
ध्यंत्वंसर्वशरीरिणांआत्माशरीरंयस्यतादृशःसर्वशरीरिणोजीवास्त्वद्विभूतिभूताश्रीर्लक्ष्मीःसर्वेंद्रियबुद्धिरूपातद्विभूतिमतीत्यर्थः तथानामरूपे।
भगवतीलक्ष्मीःप्रत्ययःनामरूपविषयकःप्रकाशोपाश्रयःआधारःनामरूपयोर्निर्वाहश्चत्वमित्यर्थः एवंतुनोऽस्तुत्वातपोरुक्तधर्मवैशिष्ट्य
वत्त्वस्वार्थनायाःअपिसत्यत्वंप्रतिजानीतेयथेति युवांयथात्रिलोकस्यवरदौपरमेष्ठिनौयथेदमपिसत्यंभवतीतिभावः हेउत्तमश्लो
कतथाममाशिषःत्वद्विषयप्रार्थनाःसर्वाःसत्यासंतु १३ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥ ॥राधापतयेनमः॥श्री श्री॥

श्री०
भा०स्क०टी०
८५

द्विजैःसमीरिताः प्रयुक्ताआशिषः शिरसाधायभूतेभ्यः प्रणम्यततः तदनुज्ञयास्वयंभुंजीत २४ ततोबंधुभिःसहाचार्यमग्रतःपुरतः
कृत्वोपवेश्यपसुप्रजास्त्वंसौभगत्वफलकंचरोर्हविषःशेषंपत्न्यैदद्यात् २५ एवंसविस्तरंव्रतमुपवर्ण्यतदनुष्ठानफलमाह एतद्विष्णोः
परमात्मनःव्रतंयथाविधिकृत्वापुमानिहलोकेऽभीप्सितंलभेत स्त्रीतुतद्व्रतमनुष्ठायसौभाग्यसंपत्पुत्रपतिदीर्घजीवनकीर्तिगृहा
न्लभते २६ अवीराविधवातुहतंकिल्बिषंयस्याःसागतिसङ्गतिंलभतेमृताःप्रजाःयस्याःसाजीवत्सुतोयस्याःसाभवेत्तथासुदु
र्भगासौभाग्यरहितासुभगाभवेत् २७ विरूपाऽन्यंश्रेष्ठंरूपंविंदेतयः पुमानामयावीरोगीसन्नेतद्व्रतंकृत्वाविरुजान्नानारोगा

म०ग्रं०४

५४

आशिषःशिरसादायद्विजैःप्रीतैःसमीरिताः प्रणम्यशिरसाभक्त्याभुंजीततदनुज्ञया २४ आचार्यमग्रतःकृत्वावाग्यतःस
हबंधुभिः दद्यात्पत्न्यैचरोःशेषंसुप्रजास्त्वंचसौभगं २५ एतच्चरित्वाविधिवद्व्रतंविभोरभीप्सितार्थंलभतेपुमानिह स्त्रीचैतदा
स्थायलभेतसौभगंश्रियंप्रजांजीवपतिंयशोगृहं २६ कन्याचविंदेतसमग्रलक्षणंपतिंत्ववीराहतकिल्बिषागतिं मृतप्र
जाजीवसुताधनेश्वरीसुदुर्भगासुभगारूपमग्र्यं २७ विंदेद्विरूपाविरुजाविमुच्यतेयआमयावीन्द्रियकल्पदेहं एतत्पठन्न
भ्युदयेचकर्मण्यनंततृप्तिःपितृदेवतानां २८ तुष्टाःप्रयच्छंतिसमस्तकामान्होमावसानेहुतभुक्श्रीहरिश्च राजन्महन्
मरुतांजन्मपुण्यंदितेर्व्रतंचाभिहितंमहत्ते २९ इतिश्रीमद्भागवतेमहापुराणेऽष्टादशसाहस्र्यांसंहितायांषष्ठस्कंधेएकोनविं

द्विमुच्यतेइंद्रियकल्पदेहंयदुत्तरेंद्रियदेहंविंदेत एवमेतद्व्रतंकल्पमभ्युदयेकर्मणिपठन्योवर्ततेतस्यपितृणांदेवानांचानंततृप्तिर्भवति २८॥
तेचपितरोदेवाश्चतस्मैपठतेसर्वान्कामान्प्रयच्छंतिपितृदेवतस्योर्होमयोरवसानेसाक्षाद्धरिःश्रीश्चहुतभुग्भवेत् तावपिप्रसन्नौभ
वेयातांइत्यर्थः उक्तमुपसंहरति राजन्निति हेराजन्मरुतांमहत्पुण्यंजन्मदितेर्व्रतंपुंसवनंचतेतुभ्यंमयाभिहितं २९ ॥ ॥ ॥
इतिवत्सान्वयपयःपारावारपूर्णकासुधाकरस्यसर्वविद्यानिधेःश्रीशैलगुरोःसुतेनतच्चरणकमलपरिचर्याप्रसन्नतत्सूक्तिसमधिगत
श्रीमद्भागवतार्थहृदयेनश्रीनिवासदासेनश्रीवीरराघवविदुषाविलिखितायांश्रीमद्भागवतचंद्रचंद्रिकायांषष्ठस्कंधेएकोनविं
शोऽध्यायः २९ ॥संवत्१८८१अश्विनकृष्णद्वादश्यां१०शनिदिने॥लिखितंश्रीदयालसर्मणेनसुतठंढिरामकालाडवामध्ये॥१

राम
८५

श्रीमद्भागवत चंद्रिकायां षष्ठम स्कंधे एकोनविंशोऽध्यायः (खण्डितः)

55